कलिकातासंस्कृतमहाविद्यालयगवेषणाग्रन्थमाला, ग्रन्थाङ्क :—३५

श्रीहरिरामतर्कवागीशकृत-

# प्रामाण्यवादः

S
181.43
H 225 P; 1

*Calcutta Sanskrit College Research Series No. XXXV*

Published under the auspices of the
Government of West Bengal

**Text No. 17**

श्रीहरिरामतर्कवागीशकृत—

# प्रामाण्यवादः

**SANSKRIT COLLEGE**
**CALCUTTA**
**1964**

*Calcutta Sanskrit College Research Series No. XXXV*

*Board of Editors:*

Dr Radhagovinda Basak, M.A., Ph.D.,
*Vidyāvācaspati, Chairman*

Dr Suniti Kumar Chatterji, M.A., D.Litt. (Lond)

Professor Durgamohan Bhattacharyya, M.A.,
*Kāvya-Sāṅkhya-Purāṇatīrtha*

Professor Satindra Chandra Nyāyācārya

Dr Gaurinath Sastri, M.A., D.Litt., P.R S.
*Secretary and General Editor*

*Calcutta Sanskrit College Research Series No. XXXV*

# PRĀMĀṆYAVĀDAḤ

OF

ŚRĪ HARIRĀMA TARKAVĀGĪŚA

WITH THE COMMENTARY 'PRABHĀ'

BY

VIŚVABANDHU BHATTACHARYA, NYĀYĀCHĀRYA,

TARKA-VEDĀNTATĪRTHA

LECTURER IN NYĀYA, SANSKRIT COLLEGE,

CALCUTTA

**SANSKRIT COLLEGE**

**CALCUTTA**

**1964**

Published by
The Principal, Sanskrit College,
1, Bankim Chatterjee Street, Calcutta-12.

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 1019
Date 8.10.65
SIMLA

Library IIAS, Shimla
S 181.43 H 225 P-H 225 P: 1
00001019

Price : Rupees Five only

S
181.43
H225P

Printed by
J. C. Sarkhel,
at the Calcutta Oriental Press Private Ltd.
9, Panchanan Ghose Lane, Calcutta-9.

कलिकातासंस्कृतमहाविद्यालयगवेषणाग्रन्थमाला—ग्रन्थाङ्कः ३५

श्रीहरिरामतर्कवागीशकृत–

# प्रामाण्यवादः

कलिकातासंस्कृतमहाविद्यालयस्य न्यायशास्त्राध्यापकेन
न्यायाचार्य-तर्कवेदान्ततीर्थोपनामकेन
श्रीविश्वबन्धुभट्टाचार्येण
विरचितया 'प्रभया' समलङ्कृतः

१८८५तमे शकवत्सरे कलिकातानगर्यां प्रकाशितः

# FOREWORD

I am very glad to be able to present yet another work of Mahāmahopādhyāya Harirāma Tarkavāgīśa Tarkālaṅkāra with an original commentary from the pen of Pandit Visvabandhu Nyāyācārya, Lecturer in Nyāya in the Tol Department of this college. The commentary is lucid and has adequately explained the difficult issues discussed in the text.

We have in contemplation to edit other works of Harirāma in near future.

GAURINATH SASTRI

# TABLE OF CONTENTS


| | Subject | Page |
|---|---|---|
| 1. | Foreword ... ... | 1 |
| 2. | Sanskrit Introduction ( प्राक्कथनम् ) ... | क-ङ |
| 3. | English Introduction ... ... | i-vi |
| 4. | Manuscript Material ... ... | अ |
| 5. | Text of *Prāmāṇyavāda* with the commentary *Prabhā* | १-११४ |

# प्राक्कथनम्

विदितमस्ति सर्वेषां विदुषां यत् प्रामाण्यज्ञानविषये भारतीयदार्शनिकानां महान् मतभेदोऽस्तीति। तत्र केचित् संशयवादिनः सर्वाण्येव ज्ञानानि संशयरूपाण्यामनन्ति। यदि ज्ञाने प्रमात्वमप्रमात्वं वा निश्चीयते तदा तस्य संशयरूपत्वमेव व्याहन्येत। अत एतन्मते ज्ञाने प्रमात्वस्याप्रमात्वस्य वा न निर्णयः, परन्तु संशय एवेति।

ज्ञानमात्रस्य संशयरूपत्वमपरे न स्वीकुर्वन्ति। तेषां मते स्वस्वसामग्रीबलात् क्वचिज्ज्ञाने प्रमात्वं क्वचिच्चाप्रमात्वमवगम्यते। ते तु ज्ञाने प्रमात्ववादिनः प्रधानतो द्विविधाः। तेषु केचित् प्रमात्वं स्वत एव गृह्यत इति वदन्ति। त एव च स्वतस्त्ववादिन इति प्रसिद्धाः। केचिच्च प्रमात्वं परतो गृह्यत इति वदन्ति। ते पुनः परतस्त्ववादिन इति प्रसिद्धाः।

तत्र नैयायिकाः परतस्त्ववादिनः, स्वतस्त्ववादिनस्तु मीमांसकाः। तेऽपि गुरुमिश्र-भट्टमतभेदेन त्रिविधाः। ये तु ज्ञानग्रहमात्र एव प्रामाण्यविषयकत्वमामनन्ति ते स्वतस्त्व-वादिनः। तेषां स्वतस्त्ववादिनां मते ज्ञानग्राहकसामग्रीग्राह्यत्वमेव प्रामाण्यस्य स्वतस्त्वम्। तत्र गुरुमते ज्ञानस्य स्वप्रकाशतया ज्ञानोत्पादकसामग्र्येव ज्ञानग्राहिका। अर्थाद् यया सामग्र्या ज्ञानस्योत्पत्तिस्तयैव तज्ज्ञानमपि गृह्यते। एवञ्च तयैव ज्ञानोत्पादकसामग्र्या तज्ज्ञानीयप्रामाण्यमप्यवगम्यते। तथाहि प्रामाण्यं तद्वति तत्प्रकारकत्वं तद्वद्विशेष्यक-त्वावच्छिन्नतत्प्रकारकत्वपर्यवसितम्। ज्ञानग्रहे ज्ञाननिष्ठो ज्ञानत्वादिधर्मो यथा गृह्यते ज्ञान-निष्ठं विशेष्यकत्वप्रकारकत्वादिकमपि तथैव गृह्यते ज्ञानधर्मत्वाविशेषात्। एवञ्च धर्मिणि तद्वत्त्वं व्यवसायेन गृह्यते। अपि च "नीलो घट"इति ज्ञाने घटांशे नीलस्य घटत्वस्य च ग्रहात् तयोर्नीलघटत्वयोः परस्परं सामानाधिकरण्यमप्यसति बाधके भासते तथैवासति बाधके एकत्र ज्ञाने भासमानयोः प्रकारकत्वविशेष्यकत्वयोरवच्छेद्यावच्छेदकत्वं प्रतीयते इति ज्ञानग्रहे तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपं प्रामाण्यमपि गृह्यत इति गुरूणामाशयः।

मुरारिमिश्रास्तु ज्ञानमनुव्यवसायेन गृह्यते तन्निष्ठं प्रामाण्यमपि अनुव्यवसायेनैव गृह्यत इति वदन्ति। एतन्मते ज्ञानग्राहकसामग्री अनुव्यवसायसामग्र्येव तया ज्ञानग्रहकाले ज्ञाननिष्ठं ज्ञानत्वादिकं यथा गृह्यते तथैव ज्ञाननिष्ठं विशेष्यकत्वप्रकारकत्वादिकमपि गृह्यते। एवञ्च "अयं घट"इति व्यवसायेन इदमि घटत्वं प्रकारीभूय भासते। अनुव्यवसायेन तादृशेदंविशेष्यकत्वं गृह्यते। अतोऽनुव्यवसायो घटत्ववदिदंविशेष्यकत्वं घटत्वप्रकारकत्वञ्च गृह्णाति। अयञ्च घटश्चेति समूहालम्बनज्ञानानुव्यवसायतः 'अयं घट'इति विशिष्टज्ञानानु-

व्यवसायस्य वैलक्षण्याय विशिष्टज्ञानानुव्यवसाये प्रकारकत्वविशेष्यकत्वयोरवच्छेद्यावच्छेदकभावाभ्युपगमात्। 'अयं घट' इति ज्ञानानुव्यवसाये घटत्ववदिदंविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वमवगाहत इति घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रामाण्यावगाही तादृशानुव्यवसाय इति वदन्ति।

भट्टास्तु ज्ञानमतीन्द्रियं ज्ञाततालिङ्गकानुमानेन ग्राह्यमित्यामनन्ति। तेषामयमभिप्रायः—घटादिविषयकज्ञानानन्तरं 'ज्ञातो घट' इत्यादि ज्ञानं सर्वेषामेव भवति। तत्र घटे ज्ञातत्वं विशेषणीभूय भासते। अत्र ज्ञातत्वं न ज्ञानविषयत्वं, पूर्वं ज्ञानस्यानुपस्थितेः ज्ञानघटितज्ञानविषयत्वरूपविशेषणज्ञानासम्भवात्। अतः घटनिष्ठं 'घट' इत्याकारकज्ञानजन्यं ज्ञानविषयत्वविलक्षणं ज्ञातत्वमभ्युपगन्तव्यम्। तच्च घटगतरूपादिवच्चक्षुरादीन्द्रिययोग्यम्। तस्य समवायिकारणं ज्ञाततायाः आश्रयीभूतो घटादिः। निमित्तकारणञ्च घटत्वप्रकारकज्ञानम्।

ननु घटत्वप्रकारकज्ञानमात्मनि विद्यमानं घटे ज्ञाततां कथं जनयेत् कार्यकारणयोर्वैयधिकरण्यात्। यदि च विषयतासम्बन्धेन घटत्वप्रकारकज्ञानं घटेऽपि विद्यत इति न कार्य्यकारणयोर्वैयधिकरण्यमित्युच्यते। तर्हि विषयतयैवोपपत्तेर्ज्ञातताखीकारो व्यर्थ इति चेत्। अत्रोच्यते—नहि वयं विषयतास्वीकारभयेन ज्ञाततामभ्युपगच्छामः। अपि तु ज्ञानविषययोः सम्बन्धः विषयत्वमवश्यमङ्गीकुर्मः। परन्तु तेन ज्ञानविषयत्वेन 'ज्ञातो घट' इत्यादिज्ञानान्यथानुपपत्त्या विषयतातिरिक्ते ज्ञाततानामके पदार्थान्तरे अस्माकमाग्रह इति।

अनेनैव ज्ञाततालिङ्गेन ज्ञानस्यानुमानं भवेत्। तथाहि घटो घटे घटत्वप्रकारकज्ञानविषयः घटत्वप्रकारकज्ञाततावत्त्वादिति विषयपक्षकानुमानेन, घटनिष्ठज्ञाततायाः अपि स्वजनकज्ञानवत्तासम्बन्धेनात्मनिष्ठतया अहं घटविशेष्यकघटत्वप्रकारकज्ञानवान् घटत्वसमानाधिकरणघटत्वप्रकारकज्ञाततावत्त्वादित्येतादृशात्मपक्षकानुमानेन वा प्रामाण्यविशिष्टज्ञानस्यानुमितिरिति भट्टानामभिप्रायः।

एतानि गुरुमिश्रभट्टमतानि न्यायमतोक्तयुक्त्या निराकर्तुं महामहोपाध्याया हरिरामभट्टाचार्यपादाः प्रामाण्यवादनामानं ग्रन्थमिमं व्यरचयन्।

तत्र त्रिष्वेव मतेषु व्यवसायतृतीयक्षणे व्यवसायधर्मिकप्रामाण्यसंशयानुपपत्तिर्दोषः। अत्र हि चिन्तामणिकारैः 'प्रामाण्यं न स्वाश्रयग्राह्यं स्वाश्रयातिरिक्तग्राह्यं वा स्वाश्रये सत्यपि तदुत्तरतृतीयक्षणवृत्तिसंशयविषयत्वादप्रामाण्यवदि'त्यनुमानेन प्रामाण्यस्य गुरुसम्मतस्वतस्त्वाभाववत्त्वं साधितम्। तत्रापि च 'अयं व्यवसायस्तत्र प्रामाण्यग्राहकस्तत्र प्रामाण्यग्राहकसामग्रीजन्यत्वादि'त्यनुमानेन सत्प्रतिपक्षत्वमाशङ्क्य प्रामाण्यग्राहकसामग्रीजन्यत्वरूपप्रतिहेतोः पक्षे व्यवसाये सन्दिग्धत्वेन प्रतिपक्षस्य हीनबलत्वात् स्वपक्ष-

सिद्धि'रित्युपदर्शितं दीधितिकारेण। हरिरामभट्टाचार्यास्तु 'वस्तुतस्तु ज्ञानस्य स्वप्रकाशतायामेव प्रामाण्यस्योपदर्शितस्वतोग्राह्यत्वमुपपद्यते तामेव दूषयिष्याम इति न प्रामाण्यस्य स्वतोग्राह्यते'त्यनेनापरमपि दोषमुद्भावितवन्तः।

एवं मिश्रभट्टमतखण्डनावसरेऽपि चिन्तामणिकाराः—'विवादपदं न यावत्स्वाश्रयग्राहकग्राह्यं स्वाश्रयनिश्चये सति तदुत्तरतृतीयक्षणेऽप्रामाण्यसंशयं विना सन्दिह्यमानत्वादप्रामाण्यवदित्य'नुमानेन मिश्रमतसिद्धयावत्स्वाश्रयग्राहकानुव्यवसायग्राह्यत्वरूपस्वतोग्राह्यत्वाभावं भट्टमतसिद्धयावत्स्वाश्रयग्राहकज्ञाततालिङ्गकानुमानग्राह्यत्वरूपस्वतोग्राह्यत्वाभावञ्चासाधयन्।

अत्र हरिरामभट्टाचार्यास्तु 'प्रथमानुव्यवसायस्य प्रामाण्यग्राहकत्वे व्यवसायतृतीयक्षणे तद्धर्मिकप्रामाण्यसंशयानुपपत्तिरित्यनायत्या प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यज्ञानत्वेन हेतुता कल्प्यते। अतो न प्रामाण्यस्य स्वतस्त्वमि'त्याहुः।

ननु इदं रजतमिति व्यवसायस्य इदन्त्वरजतत्वरूपस्वप्रकाराश्रयधर्मिविषयकत्वेऽनुव्यवसाय एव मानमिति अनुव्यवसायस्य इदन्त्वरजतत्वरूपप्रकारविशिष्टधर्मिविषयकत्वमावश्यकम्। तथा सति व्यवसायविषयैर्यावद्भिः प्रकारैः विशेषित एव धर्मो विषयिताविशेषणतयानुव्यवसायविषयो भवति। एवं व्यवसायस्य इदन्त्वरजतत्वप्रकारकत्वेऽपि अनुव्यवसाय एव मानमिति तदपि तस्य विषयः। अपि च इदंविषयकत्वरजतत्वविषयकत्वाभ्यामिदन्त्वप्रकारकत्वरजतत्वप्रकारकत्वयोरवच्छेद्यावच्छेदकभावौऽपि बाधाभावादिघटितसामग्रीबलाद्विषय इति रजतत्ववदिदंविषयकत्वावच्छिन्नरजतत्वप्रकारकत्वरूपप्रामाण्यविषयकत्वमनुव्यवसायस्यावर्जनीयमिति चेत्। अत्र मणिकाराः 'अनुव्यवसाये विषयिताविशेषणीभूते इदमि रजतत्वं न प्रकारीभूय भासते बहिर्विशेष्यके मनसोऽस्वातन्त्र्यात्' अर्थात् मानसज्ञाने रजतत्वस्य विशेष्यतया बहिर्विषयस्य इदमो भानासम्भवात्, इदं इदन्त्वेन रजतत्वेन जानामीत्यनुव्यवसायः। तत्र इदमिति द्वितीयाया ज्ञानान्वयिविशेष्यकत्वमर्थः, तृतीयान्तद्वयेन इदन्त्वप्रकारकत्वं रजतत्वप्रकारकत्वञ्च ज्ञाने भासते। एवञ्चानुव्यवसायेन व्यवसायरूपधर्मिणि इदंविशेष्यकत्वं इदन्त्वप्रकारकत्वं रजतत्वप्रकारकत्वञ्च ज्ञायते। न तु प्रामाण्यघटकीभूतं रजतत्ववद्विशेष्यकत्वमिति नानुव्यवसायस्य प्रामाण्यग्राहकते'त्याहुः।

दीधितिकारास्तु प्रामाण्यस्य संशयान्यथानुपपत्त्या तद्धर्मविशिष्टे तत्प्रकारकत्वस्य ग्राहकत्वेऽनुव्यवसायस्यासामर्थ्यं कल्प्यते। तेन पुरोवर्तिनि रजतत्वप्रकारकमिति ग्रहेऽपि पुरोवर्तिनि रजते रजतत्वप्रकारकमिति न ग्रह इत्याहुः।

हरिरामभट्टाचार्यास्तु प्रथमानुव्यवसायस्य प्रामाण्यग्राहकत्वे व्यवसायतृतीयक्षणे तद्धर्मिकप्रामाण्यसंशयानुपपत्तिरित्यनायत्या प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यज्ञानत्वेन हेतुता कल्प्यते। अतो न प्रामाण्यस्य स्वतस्त्वमिति प्राहुः।

भट्टमतखण्डनावसरे तु हरिरामभट्टाचार्यपादैरुक्तं 'ज्ञातो घट' इत्यादि प्रत्ययो यदि ज्ञानविषयत्वं नावलम्बते अपि तु अतिरिक्तां ज्ञाततां तदा अतीतघटादिविषयकज्ञानाद्यनन्तरं तथाविधप्रत्ययानुपपत्तिः। तत्र विषयरूपसमवायिकारणस्यातीतत्वात् ज्ञाततानुत्पत्तेः। तथाच ज्ञाततायाः शशविषाणायमानतया तल्लिङ्गकानुमितिरपि तादृश्येवेति गतं तथाविधानुमितिग्राह्यत्वरूपस्वतस्त्वेनापी'ति।

तत्रैव पुनरप्युक्तम् 'एवं ज्ञानस्यातीन्द्रियत्वमप्यनुपपन्नम्। इच्छासुखादिप्रत्यक्षानुरोधेनात्मसमवेतप्रत्यक्षं प्रति क्लृप्तकारणभावस्य मनःसंयुक्तसमवायस्य ज्ञानेऽपि सत्त्वेन तत्प्रत्यक्षे बाधाभावादि'ति।

ननु प्रामाण्यनिश्चयः प्रवृत्तौ उपयुज्यते न वा? नोपयुज्यते चेत् किं तदुपायानुसन्धानेन काकदन्तपरीक्षावत् व्यर्थमेव तत्। अत्र मीमांसकाः—अर्थनिश्चयधर्मिकप्रामाण्यनिश्चयस्यापि प्रवृत्तावपेक्षितत्वात्। सति चार्थनिश्चये तद्धर्मिकाप्रामाण्यसंशये तद्धर्मिकाप्रामाण्यनिश्चये वा प्रवृत्त्यनुदयात् यस्य संशयव्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयस्तद्धेतुरिति न्यायेन प्रामाण्यनिश्चयस्यापि प्रवृत्तौ हेतुत्वात्। एवमनुमितावपि उक्तरीत्या परामर्शधर्मिकप्रामाण्यनिश्चयस्यापेक्षितत्वात्, परामर्शधर्मिकप्रामाण्यानुमित्यर्थं अपरप्रामाण्यनिश्चयस्य इत्येवं रीत्यानवस्थाभिया प्रामाण्यस्य स्वतस्त्वम्। तथाच प्रामाण्यनिश्चयस्य प्रवृत्तौ हेतुत्वेन तदुपायानुसन्धानमर्थवदित्याहुः।

अत्र न्यायमतानुयायिनः केचिद् बहुवित्तव्यायायाससाध्ये कर्मणि प्रवृत्तिरर्थनिश्चयधर्मिकप्रामाण्यनिश्चयं विना न भवतीति निष्कम्पप्रवृत्तिं प्रति प्रामाण्यनिश्चयस्यापेक्षितत्वात् विचारप्रवृत्तिरिति वदन्ति।

अन्ये तु प्रवृत्तिं प्रति अर्थनिश्चयस्यैवापेक्षा, न तु तद्धर्मिकप्रामाण्यनिश्चयस्यापि। यस्य संशयव्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयस्तद्धेतुरिति नियमस्याप्रयोजकत्वात्। अर्थनिश्चयधर्मिकाप्रामाण्यसंशयदशायां तद्धर्मिकाप्रामाण्यनिश्चयदशायाञ्च प्रवृत्त्यनुत्पत्त्या तद्धर्मिकाप्रामाण्यसंशयस्य तादृशाप्रामाण्यनिश्चयस्य च अर्थनिश्चयधर्मिकाप्रामाण्यज्ञानत्वेनानुगतरूपेण प्रवृत्तिप्रतिबन्धकत्वमेवायाति। तथाचार्थनिश्चयधर्मिकाप्रामाण्यज्ञानाभावविशिष्टार्थनिश्चयत्वेन अर्थनिश्चयधर्मिकाप्रामाण्यज्ञानाभावत्वेन वा स्वातन्त्र्येण प्रवृत्तिं प्रति हेतुत्वं कल्पनीयम्।

ननु तर्हि बहुवित्तव्ययायाससाध्येऽपि कर्मणि निष्कम्पप्रवृत्तावनुपयोगित्वान्निष्फलं प्रामाण्यज्ञानमिति किं तदुपायानुसरणेन इति चेदत्र मणिकाराः "स्वर्गसाधनं याग इति ज्ञानप्रामाण्ये निश्चिते तत्समानविषयकज्ञानान्तरेऽप्रामाण्यशङ्का न भवतीति ज्ञानान्तरमगृहीत-प्रामाण्यमपि स्वार्थनिश्चयरूपं निष्कम्पप्रवृत्तिं जनयतीत्यप्रामाण्यशङ्काप्रतिबन्धद्वारा निष्कम्प-प्रवृत्तावुपयुज्यते प्रामाण्यज्ञानमिति न निष्फलमि"ति ॥

ननु प्रामाण्यनिश्चयो यदि अप्रामाण्यशङ्कानिवृत्तिद्वारैव प्रवृत्तावुपयुज्यते तर्हि प्रामाण्य-स्यानुमापकः प्रामाण्यव्याप्यवत्तापरामर्श एव प्रामाण्यसंशयोच्छेदकोऽस्तु इति कृतं प्रामाण्या-नुमित्या । न च यत्र निश्चये प्रामाण्यनिश्चयः स न प्रवर्तकः, प्रामाण्यनिश्चयेन तस्य नाशात्, अपि तु तत्समानाकारकनिश्चयान्तरमेव । एवञ्च प्रवर्तकनिश्चये न प्रामाण्यव्याप्यवत्ता-परामर्श इति कथं प्रामाण्यव्याप्यवत्ता परामर्शस्य प्रवर्तकनिश्चयधर्मिकाप्रामाण्यसंशयादि-विरोधित्वमिति वाच्यम् । तथा सति प्रामाण्यनिश्चयस्यापि ईदृश्येव गतिरिति चेत् ।

अत्र दीधितिकाराः—पक्षतावच्छेदकपुरोवर्तिविशेष्यकत्वावच्छेदेन प्रामाण्यानुमाने उत्तरज्ञानस्यानुव्यवसायेन ग्राह्याभावावच्छेदकपुरोवर्तिविशेष्यकत्वग्रहात् प्रामाण्यावच्छेदकज्ञान-विषयैवाप्रामाण्यज्ञानप्रतिबन्धकत्वम् ।

पुरोवर्तिविशेष्यकत्वावच्छेदेन प्रामाण्यव्याप्यवत्ताग्रहस्तु उदीच्यज्ञाने संशयनिवृत्ता-वनुपयुक्तः । तदभावव्याप्यव्याप्यस्येव तदभावव्याप्यावच्छेदकधर्मस्यापि ग्रहस्य तद्वत्ता-ज्ञानाप्रतिबन्धकत्वात् । न प्रामाण्यपरामर्शस्योक्तरीत्याऽप्रामाण्यग्रहप्रतिबन्धकत्वमिति शम् ॥

श्रीविश्वबन्धुभट्टाचार्यस्य

# INTRODUCTION

The discovery of a number of manuscripts of Harirāma in the Sanskrit College Library has been a fresh incentive here to the study of some of the interesting topics of Navya-Nyāya philosophy. So far as we know Harirāma did not write any commentary on the Tattvacintāmaṇi of Gaṅgeśa. But there cannot be any doubt that he was working under the influence of the master.

The present brochure discusses one of the most fundamental points of the Navya-Nyāya school in which it differs from the Mīmāṁsā school. Harirāma proposes to examine at the outset the Mīmāṁsaka view that the validity of a cognition is apprehended by the same collocation of causal conditions (*sāmagrī*) which enables us to apprehend the cognition itself (*jñānagrāhakasāmagrīgrābya*) and finally explains the Naiyāyika view that the validity of a cognition is not apprehended by the *anuvyavaśāya* which apprehends the cognition but by something other than the *anuvyavasāya.*

It is, therefore, necessary for us to see how the Mīmāṃsaka describes the *sāmagrī* for the apprehension of a cognition and in this context we may take note of the three different schools of Mīmāṃsā.

According to the Prābhākara Mīmāṃsaka, cognition is self-luminous (*svaprakāśa*); the cognizing subject, the object of cognition and the cognition itself are apprehended at one and the same point of time. According to the Bhāṭṭa, cognition is not self-lumious, but it is inferred on the strength of a property, called cognizedness (*jñātatā*), which is produced in the object through the cognition. According to Murārimiśra, another Mīmāṁsaka, a cognition is apprehended by a subsequent cognition known as *anuvyavasāya* or introspection. It is worthy of notice here that the Naiyāyika also thinks that a cognition is apprehended by what he calls *anuvyavasāya.* But there is a very fundamental point of difference between Murārimiśra as an advocate of *anuvyavasāya* and the Naiyāyika as an advocate of *anuvyavasāya.* The difference between

the two lies in the fact that while Murārimiśra believes that *anuvyavasāya* apprehends a cognition as well as its validity, the Naiyāyika believes that *anuvyavasāya* apprehends the cognition only, but not its validity.

To return to the point. Philosophers of the Nyāya and the Mīmāṁsā schools have been at variance with one another with regard to the manner in which the validity (*prāmāṇya*) of a cognition is apprehended. According to a section of philosophers all cognitions are dubious in nature (*saṁśaya*) and as such it is not possible to determine the validity (*prāmāṇya*) or otherwise (*a-prāmāṇya*) of any cognition. But this is not universally admitted; for there are philosophers who opine that it is possible to ascertain or apprehend the validity or otherwise of a cognition. Those whe hold this view are, however, divided into two main groups: the advocate of the *svataḥ-prāmāṇya* theory and the advocate ot the *parataḥ-prāmāṇya* theory. The former again is divided into three camps the Prābhākara, the Miśraite and the Bhāṭṭa. According to all of these three views, the validity of a cognition is apprehended by the same *sāmagrī* (collocation of all causal conditions) as enables us to apprehend the cognition itself (*jñānagrāhakasāmagrīgrāhya*).

The Prābhākara holds that every cognition being self-luminous (*svaprakāśa*) by nature, the *sāmagrī* that produces a cognition not only enables us to apprehend the cognition itself, but also to apprehend its validity. It should be borne in mind that by *validity* of a cognition we mean '*tadvati tat-prakārakatva*'. To explain: a cognition is valid (*pramā*) if and only if the property *x* appearing as a qualifier (*prakāra*) in that cognition occurs in, or is possessed by, the object *y* which appears as the qualificand (*viśeṣya*) of that cognition. On a careful analysis, '*tadvati tat-prakārakatva*' will resolve itself into '*tadvadviśeṣyakatvāvacchinna-tatprakārakatva*'. To be precise, for a cognition to be valid it is also necessary that the qualifierness in the property *x* be *delimited* by the qualificandness of the object *y* which possesses *x*.

In the above definition of a valid cognition we have mentioned three elements as its constituents: —

(1) *tadvattva* — the property of the qualificand's possessing the qualifier *x*

(2) *viśeṣyakatva* + *prakārakatva* — qualificandness + qualifierness

(3) *avacchinnatva* — the relation of delimitation between the two relational abstracts i. e. qualificandness and and qualifierness.

Now, it is wellknown that when a cognition is apprehended such properties of the cognition as cognition-universal (*jñānatva*) etc. are apprehended along with it. So we may say that other properties of the cognition *viz.*, qualifierness, are also apprehended by the same cognition. In a determinate cognition the qualificand *y* appears as qualified by the qualifier *x* and the same feature also becomes a part of the apprehension of such determinate cognition.

Further, in the case of a determinate cognition say, 'a white flower', when the two properties *viz.*, white colour and flowerness, are apprehended the relation of co-occurrence between them are also apprehended provided the situation does not contain any definite impediment to it. Similarly, the relation of delimitation between the qualificandness and the qualifierness is also apprehended in the apprehension of a cognition which apprehends the two relational abstracts, qualificandness and qualifierness. Thus the Prābhākara argues that when all the elements constituting the validity of a cognition are seen to be apprehended along with the apprehension of the cognition, it can be asserted that the validity of the cognition is apprehended in the apprehension of the cognition itself. The *svataḥprāmāṇya* theory is thus established.

Murārimiśra holds that the *anuvyavasāya* or introspection of a cognition apprehends not only the cognition itself but also its validity. To be sure, the *sāmagrī* for the apprehension of a cognition in this view is identical with the *sāmagrī* for the *anuvyavasāya* or introspection. In the determinate cognition, "This is a jar," jarness appears as qualifying the object mentioned by "this". In the *anuvyavasāya*

coming after it, the object mentioned by "this" is grasped as the qualificand of the previous *vyavasāya* or determinate cognition Now, in order to distinguish between the cognition "This is a jar", and the conjunctive cognition (*samūhālambana*) "This is *and* a jar is," it should be said that while the *anuvyavasāya* of the latter does not register the relation of *delimitation* between the qualifierness and the qualificandness of the cognition concerned, the *anuvyavasāya* of the former does so register. This amounts to saying that such *anuvyavasāya* also apprehends the validity of the cognition in question.

The Bhāṭṭa maintains that cognition is not amenable to sense-perception (*atīndriya*) by nature but it is apprehended through inference. When a jar is cognized a cognition of the type "The jar is cognized" follows. In this second cognition the property cognizedness (*jñātatā*) appears as a qualifier of the jar. The Bhāṭṭa posits this unique property viz., cognizedness and argues that it is different from what we call *jñānaviṣayatā* or the property of being the content of a cognition. The property cognizedness of the jar is also asserted to be perceivable by the sense-organ which perceives the jar. Now, the Bhāṭṭa says that just as a cognition is apprehended (i. e. inferred) on the strength of this property, *viz.*, cognizedness, the validity of that cognition is also apprehended by the same token.

The *svataḥ-prāmaṇya* theary as explained above has been severely criticized by Gaṅgeśa in his *magnum opus*, the *Tattvacintāmaṇi*, and following him by Harirāma in the present text. Before we study the objection raised by them it is essential that a few fundamental points are clearly elucidated. First, a cognition in the philosophy of the Mīmāṃsaka and the Naiyāyika is mometary (*kṣaṇika*) by nature. That is to say, it perishes on the third moment of its birth. Thus a cognition is born at one moment of time, it continues to exist for another moment and it dies out on the third. The position is, therefore, different from that of the Buddhist according to whom momentariness (*kṣaṇikatva*) means destruction of each entity on the second moment of its birth. Secondly, the Mīmāṃsaka agrees that the

apprehension of validity of a cognition will be a certitude or a certain knowledge of such validity. For, a cognition usually becomes a certitude (*niścaya*) unless something is present in the situation to make it a dubiety (*saṃśaya*). Thus, according to the Prābhākara, the validity is apprehended i. e. certainly known by the *sāmagrī* which produces the cognition and at the same time does not contain any element that that might apprehend its invalidily (cf. *aprāmāṇyāgrāhakajñānotpādakasāmagrīgrāhyatva.*) And according to Murārimiśra as well as the Bhāṭṭa, validity is apprehended i. e. certainly known by the *sāmagrī* which apprehends the cognition itself and at the same time does not contain any thing that might apprehend its invalidity (cf. *aprāmāṇyāgrāhakajñānagrāhakasāmagrīgrāhyatva.*)

Now, if it be held that the validity of a cognition is apprehended only by the *sāmagrī* of the same cognition, i. e. if the *svataḥ-prāmāṇya* theory is held to be true, it follows that in the third moment of its origin there cannot be any dubiety (*saṃśaya*) with regard to the validity of a determinate cognition (*vyavasāya*). For, the cognition and a certitude of its validity do not cease to exist in the *second* moment of their origin and as such they will set aside any apprehension of invalidity. To be sure, dubiety (*saṃśaya*) being a sort of vacillatory cognition between two contradictory qualifiers like '*a*' and 'not-*a*', the presence of a certain knowledge of validity in the *second* moment will rule out the possibility of dubiety on the third moment since such dubiety if it is to arise at that moment will require both validity and its contradictory, *viz.*, invalidity, as the qualifiers of the determinate cognition—but this is not possible in view of the fact that a certitude of validity being already there will serve as an impediment to the production of dubiety in the next moment.

But it is a fact, so argues the advocate of the *parataḥ-prāmāṇya* theory, that we can sometimes doubt as to the validity of a cognition in the third moment of its origin. This forces the Naiyāyika to conclude that the validity of a cognition is apprehended through something else over and above the *sāmagrī* for the apprehension of that cognition.

Gaṅgeśa advances the above argument and Harirāma also follows him to some extent in refuting the *svataḥ-prāmāṇya* theory. But in addition, Harirāma also points out that the Prābhākara bases his theory of *svataḥ-prāmāṇya* on the theory of the self-luminousity (*svaprakāśatva*) of cognitions. Thus the Prābhākara view can be easily destroyed by refuting the thesis that cognition is self-luminous. In reply to the Bhaṭṭa, Harirāma points out that the contention for an additional property *jñātatā* or cognizedness is a myth. It is actually indistinguishable from *jñānaviṣayatā* or the contentness of a cognition. Moreover, the assumption that cognition is not amenable to sense-perception (*atīndriya*) is wrong.

In this way the three different views of the Mimāṃsā school have been by refuted the Naiyāyika and it is only then that he proceeds to establish his own theory of the *parataḥ-prāmāṇya* of cognition.

GAURINATH SASTRI

The present edition of Harirāma Tarkavāgīśa's Prāmāṇyavāda has been prepared on the basis of a single manuscript available so far. The manuscript is preserved in the library of the Sanskrit College, Calcutta and has been described in the descriptive catalogue of manuscripts of that library, The relevant extract given below from the catalogue will give the readers of this volume a clear idea of the manuscript material that was available to the editor.

Extract:[1]

**1085 प्रामाण्यवादः ।**

Prāmaṇyavāda.

By Harirāma Tarkavagīśa.

Substance: Country-made paper. Size $17\frac{1}{2} \times 3$ inches. Folia 1-11(55-65). Lines 8 on a page. Extent 484 ślokas. Bengali character. Appearance old. Prose. Generally correct. Complete.

At the beginning of the manuscript is found the end, etc. of manuscript No. 1083, just noticed, e.g.

**End:** तत्र च तथाविधानुमितिः........इति सिद्धं अनुमितेः प्रत्यक्षवैलक्षण्यं अतोऽनुमानस्य पृथक्कारणत्वमिति ।

**Colophon:** अनुमितेर्मानसत्वविचारः समाप्तः ।

**Post-Colophon:** श्रीश्रीहरिशर्मणः स्वाक्षरमिति ।

**Beginning:** प्रामाण्यं स्वत एव गृह्यत इति मीमांसकाः ।

**End:** सामग्री अतीव लघीयसी, प्रतिबन्धकतासामान्यावच्छेदकलाघवात् इति संक्षेपः ।

---

1 A Descriptive Catalogue of Sanskrit Manuscripts (pp. 4-5), Calcutta Sanskrit College Research Series No. XX.

# प्रामाण्यवादः

## प्रामाण्यं स्वत एव गृह्यत इति मीमांसकाः ॥१॥

---

### प्रभा

ॐनमः सर्वभूतानां सृष्टिस्थित्यन्तकारिणे ।
सच्चिदानन्दरूपाय कृष्णाय परमात्मने ॥१॥
नमामि भक्त्या करुणावतारं प्रशान्तमूर्तिं प्रियशिष्यसङ्घम् ।
अपारशास्त्रार्थकृताधिपारं गुरुं वरं श्रीमदनन्तसंज्ञम् ॥२॥
अनाथबन्धुं पितरं नमामि स्मृत्यादिशास्त्रेषु विशालकीर्तिम् ।
सौदामिनीं मे जननीं प्रशान्तां स्नेहार्द्रचित्तां सरलां प्रणौमि ॥३॥
प्रामाण्यवाद इति यो हरिरामसूक्तो ग्रन्थः कुतर्कतिमिरापहसूर्यतुल्यः ।
तस्य प्रशस्तमनसां विदुषां सुतृप्त्यै व्याख्यां प्रभां वितनुते द्विजविश्वबन्धुः ॥४॥

तापत्रयदग्धं जगत् समुद्दिधीर्षुः परमहितकामी भगवान् गौतमो न्यायशास्त्रं प्रणिनाय । तत्र "प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगम" इति प्रथमं सूत्रम् । अत्र प्रमाणतत्त्वं प्रमाणत्वमेव, तस्य ज्ञानासम्भवान्निःश्रेयसमेव न भवितुमर्हति । तथाहि प्रामाण्यं न स्वतो गृह्यते न वा परतो वक्ष्यमाणदूषणगणग्रासादिति पूर्वपक्षं नैयायिकाः प्रामाण्यस्यानुमानग्राह्यत्वरूप-परतस्त्व-व्यवस्थापनेन निराकुर्वन्ति । तत्र मीमांसकाः शङ्कन्ते—"प्रामाण्यं स्वत एव गृह्यत" इति । तत्र मीमांसकमतं निराकृत्य न्यायमतव्यवस्थापनाय महामहोपाध्याया नैयायिककुलतिलका गदाधरभट्टाचार्याणां गुरवो हरिरामतर्कवागीश( तर्कालङ्कार )-महोदयाः प्रामाण्यवादनामानं ग्रन्थमारभन्ते "**प्रामाण्यं स्वत एवे**"त्यादिना ।

ननु अधिकारि-विषय-सम्बन्ध-प्रयोजनरूपानुबन्धचतुष्टयाकथनेन न प्रेक्षावतामत्र प्रवृत्तिरिति चेन्न । अस्य गोतमोक्तन्यायशास्त्रैकदेशप्रतिपादकत्वेन तदीयैरेवानुबन्धचतुष्टयैस्तद्वत्तासिद्धेरनुबन्धचतुष्टयं पृथङ् नालोचितम् ।

ननु शिष्टाचारपरम्पराप्राप्तमङ्गलाकरणाद् ग्रन्थकारस्य न्यूनतेति चेन्न, ग्रन्थाद् बहिर्मङ्गलाचरणान्न शिष्टाचारव्याघातः । अथवा प्रमाणशब्दस्य भगवद्वाचित्वेन प्रामाण्यशब्दस्यापि भगवन्नामघटितत्वाद् भगवत्तासमानार्थकत्वाच्च मङ्गलरूपतया न शिष्टाचारव्याघातः ।

"**प्रामाण्यं स्वत एव गृह्यत इति मीमांसका**"इति । 'मीमांसका' इत्यनेन

गुरुमिश्रभट्टानां ग्रहणम्। तत्र मतत्रयसाधारणं स्वतस्त्वञ्च स्वाश्रयीभूतज्ञानग्राहक-सामग्रीग्राह्यत्वम्। स्वं प्रामाण्यम्। तथा च गुरुमते ज्ञानमात्रस्य स्वप्रकाशतया स्वेनैव ज्ञानं गृह्यते, तन्निष्ठं प्रामाण्यमपि तेनैव गृह्यत इति प्रामाण्यस्य स्वाश्रयग्राहकग्राह्यत्वात् स्वतोग्राह्यत्वम्।

मिश्रमते च प्रामाण्याश्रयीभूतज्ञानमनुव्यवसायेन गृह्यते, तन्निष्ठं प्रामाण्यमप्यनुव्यवसायेन गृह्यत इति प्रामाण्यस्य प्रामाण्याश्रयग्राहकग्राह्यत्वात् स्वतोग्राह्यत्वम्। भट्टमते तु प्रामाण्याश्रयीभूतज्ञानं ज्ञाततालिङ्गकानुमित्या गृह्यते, तन्निष्ठं प्रामाण्यमपि ज्ञाततालिङ्गकानु-मित्या एव गृह्यत इति प्रामाण्याश्रयग्राहकग्राह्यत्वम्।

न्यायमते तु ज्ञानमनुव्यवसायेन गृह्यते तन्निष्ठं प्रामाण्यञ्च सफलप्रवृत्तिजनकत्वादि-हेतुकानुमित्या गृह्यत इति तन्मते प्रामाण्याश्रयीभूतज्ञानग्राहकसामग्रीग्राह्यत्वाभावान्न स्वतोग्राह्यत्वम्।

तथाच मतत्रयसाधारणी विप्रतिपत्तिस्तु तज्ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्-ज्ञानग्राहकसामग्रीग्राह्यं न वेति। तत्र विधिकोटिर्मीमांसकानां निषेधकोटिश्च नैयायिकानाम्। अत्र तज्ज्ञानप्रामाण्यं पक्षः। घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यस्य रजतत्ववति रजतत्वप्रकारकत्वरूपप्रामाण्याश्रययावज्ज्ञानग्राहकसामग्रीग्राह्यत्वाभावाद् विधौ बाधवारणाय निषेधे सिद्धसाधनवारणाय च तज्ज्ञानेति तत्-पदम्। तथा च यज्ज्ञाननिष्ठं प्रामाण्यं पक्षस्तज्ज्ञानग्राहकसामग्रीग्राह्यत्वं साध्यमिति न दोषः। "प्रमीयत इति प्रमाण"मिति भावव्युत्पत्त्या प्रामाण्यशब्दस्य प्रमात्वमर्थः, प्रमीयतेऽनेनेति करण-व्युत्पत्त्या प्रामाण्यशब्दस्य प्रमाकरणत्वमर्थः। तत्र भावव्युत्पत्त्या प्रमात्वरूपार्थलाभाय ज्ञानपदं सावधारणं ज्ञानमात्रवृत्तीत्यर्थकम्। तथा च ज्ञानकरणत्वस्य मनःप्रभृतिवृत्तित्वेन ज्ञानमात्रवृत्तित्वासम्भवान्न तल्लाभः। यथा "गङ्गायां घोषः" इत्यादौ प्रवाहे घोषान्वया-सम्भवाद् गङ्गापदेन न प्रवाहो लभ्यते तद्वदिहापि ज्ञानकरणत्वरूपप्रामाण्ये ज्ञानमात्र-वृत्तित्वान्वयासम्भवान्न ज्ञानकरणत्वरूपार्थो लभ्यत इत्यर्थः। यद्यपि ज्ञानकरणत्वस्य करणभेदेन भिन्नत्वाद् व्याप्तिज्ञानादिनिष्ठमनुमित्यादिप्रमाकरणत्वं ज्ञानमात्रवृत्ति एवेति तादृशप्रमाकरणत्वे स्वतोग्राह्यत्वाभावाद् विधौ बाधस्तथापि विशेष्यतावच्छेदकावच्छेदेन विशेषणान्वयस्यौत्सर्गिकत्वात् प्रमाकरणतात्वावच्छेदेन ज्ञानमात्रवृत्तित्वान्वयानुपपत्त्या तद्वति तत्प्रकारकज्ञानत्वत्वावच्छेदेन ज्ञानमात्रवृत्तित्वान्वयसम्भवेन च तत्परतैव गृह्यत इति भावः।

इदं ज्ञानमप्रमेति ज्ञानग्राहकेण प्रामाण्याग्रहाद् विधौ बाधवारणाय "अप्रामाण्या-ग्राहके"ति। अत्राप्रामाण्यपदस्य भ्रमत्वार्थकत्वे प्रमात्वाभावग्राहकेण प्रामाण्याग्रहाद्बाधः,

**तत्र गुरुमते प्रामाण्यग्रहप्रतिबन्धकाभावकालीनयावत् स्वाश्रयीभूतज्ञान-ग्राह्यत्वमेव स्वतोग्राह्यत्वम् ॥२॥**

**एवञ्च प्रामाण्यं स्वविषयकग्रहप्रतिबन्धकाभावकालीनस्वाश्रयज्ञानत्व-**

---

प्रमात्वाभावार्थकत्वे भ्रमत्वग्राहकेण प्रामाण्याग्रहाद्बाध इति अप्रामाण्यपदं प्रामाण्यविरोधित्वेन रूपेण तदुभयपरम्।

ज्ञानग्राहिकां ज्ञानपक्षकप्रामाण्यसाध्यकानुमितिसामग्रीमादाय विधौ सिद्धसाधनस्य, निषेधे बाधस्य च वारणाय यावदिति। अत्र च यावत्त्वं न सामग्रीविशेषणं यावत्सामग्रीजन्यग्रहाप्रसिद्धेः। अतो यावदिति ग्रहविषयत्वरूपस्य ग्राह्यत्वस्य घटकीभूते ग्रहे विशेषणम्। ज्ञानग्राहकात्मादिजन्ययावद्ग्रहविषयत्वस्याप्रसिद्धेः सामग्रीति ॥१॥

"**तत्रे**"ति—पूर्वोक्तेषु गुरुमिश्रभट्टमीमांसकेषु मध्ये। "**गुरुमत**"इति स्वतोग्राह्यत्वमित्यनेनान्वयः। किन्तत् स्वतोग्राह्यत्वमित्याह "**प्रामाण्ये**"ति। "**स्वाश्रयीभूतज्ञाने**"ति—स्वं प्रामाण्यं तदाश्रयीभूतं ज्ञानं 'अयं घटः' इत्याकारकं ज्ञानं तद्ग्राह्यत्वं तद्विषयमित्यर्थः। गुरुमते 'अयं घटः' इत्याकारकेण ज्ञानेन यथा घटो गृह्यते तथा तादृशं ज्ञानमपि एवं तादृशज्ञाननिष्ठं यत् प्रामाण्यं घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपं तदपि गृह्यते। प्रामाण्याश्रयीभूतज्ञानग्राहकग्राह्यत्वमेव स्वतस्त्वमिति गुरुमते ज्ञानस्य स्वप्रकाशतया घटज्ञानं स्वात्मकेन घटज्ञानेन गृह्यते तन्निष्ठं प्रामाण्यमपि तेनैव गृह्यत इति यावत्स्वाश्रयीभूतज्ञानग्राह्यत्वं प्रामाण्येऽस्त्ततम्। भ्रमत्वग्रहकाले प्रामाण्याभावग्रहकाले च प्रामाण्याग्रहात् कालीनान्तं स्वाश्रयीभूतज्ञानविशेषणम् ॥२॥

'यावत्स्वाश्रयीभूतज्ञानग्राह्यत्व'मित्यत्र ज्ञानग्राह्यत्वं ज्ञानविषयत्वम्। तद्घटकज्ञाने यावत्त्वस्यान्वयात्; यावत्पदस्य च व्यापकत्वबोधकतया व्यापकत्वार्थगन्तर्भाव्य विप्रतिपत्तिं दर्शयति "**एवञ्चे**"ति। "एवञ्च" स्वतोग्राह्यत्वस्य प्रामाण्यग्रहप्रतिबन्धकाभावकालीनयावत्स्वाश्रयीभूतज्ञानग्राह्यत्वात्मकत्वाच्चेत्यर्थः। "**स्वविषयके**"त्यादि। स्वं प्रामाण्यं तद्विषयको यो ग्रहः प्रामाण्यज्ञानम्, तत्प्रतिबन्धकं यज्ज्ञानं भ्रमत्वज्ञानं प्रमात्वाभावज्ञानं वा, तदभावकालीनं स्वाश्रयीभूतं यज्ज्ञानं तादृशज्ञानत्वव्यापिका या विषयिता तत्प्रतियोगि तन्निरूपकमित्यर्थः। तथाच यत्र प्रामाण्यविरोधि प्रामाण्याभावज्ञानं भ्रमत्वज्ञानं वा नास्ति अथ च प्रामाण्याश्रयीभूतम् "अयं घटः" इत्याद्याकारकं ज्ञानं विद्यते तत्र तादृशज्ञानमात्र एव गुरुमते प्रामाण्यविषयितायाः सत्त्वात्, तादृशज्ञानत्वव्यापिका या प्रामाण्यविषयिता तन्निरूपकत्वं प्रामाण्ये सत्त्वेन गुरुमते तस्य स्वतो ग्राह्यत्वं निर्वहति। न्यायमते च

**व्यापकविषयिताप्रतियोगि न वेति तन्मते विप्रतिपत्तिः ॥३॥**

**प्रामाण्यग्रहप्रतिबन्धकीभूतबाधादिबुद्धिकालीनज्ञानस्य प्रामाण्याविषयकतया बाधवारणाय कालीनान्तं ज्ञानविशेषणम् ॥४॥**

---

तादृशस्वाश्रयीभूतज्ञानमात्रे प्रामाण्यविषयितायां असत्त्वात् प्रामाण्यविषयिता न तादृशज्ञानत्वव्यापिका, अपि तु घटत्वादिविषयितैव तन्निरूपकत्वं घटत्वादावेव न तु घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रामाण्य इति न तत्र तादृशस्वतत्त्वमिति भावः ।

"**विप्रतिपत्तिरि**"ति मध्यस्थस्य विचाराङ्गसंशयजननीत्यर्थः । एवञ्च विपरीतोद्भावकपरविजिगीषया न्यायप्रयोगरूपस्य विचारस्य जिज्ञासासम्पादनेन प्रयोजकः संशयः, तज्जनकत्वेन विप्रतिपत्ते र्विचारोपयोगित्वमिति भावः । ॥३॥

'इदं ज्ञानमप्रमे'त्यप्रामाण्यभ्रमकाले "इदं ज्ञानं भ्रमः" इति भ्रमत्वभ्रमकाले च ज्ञानेन प्रामाण्यं न गृह्यत इति न प्रामाण्यविषयिता प्रामाण्याश्रयज्ञानत्वव्यापिका, अतः प्रामाण्ये स्वाश्रयज्ञानत्वव्यापकविषयिताप्रतियोगित्वाभावाद् गुरुमते बाधः, तद्वारणाय कालीनान्तं सार्थकयति—"**प्रामाण्यग्रहे**"त्यादिना । प्रामाण्यग्रहप्रतिबन्धकीभूतबुद्धिश्च अप्रामाण्यनिश्चयो भ्रमत्वनिश्चयश्च तज्ज्ञानधर्मिकाप्रामाण्यनिश्चये भ्रमत्वनिश्चये वा न तज्ज्ञानधर्मिकप्रामाण्यबुद्धिरिति तज्ज्ञानधर्मिकप्रामाण्यबुद्धिं प्रति तज्ज्ञानधर्मिकाप्रामाण्यनिश्चयः, तज्ज्ञानधर्मिकभ्रमत्वनिश्चयश्च प्रतिबन्धक इति भावः ।

अत्र च लाघवात् प्रमात्वविरोधित्वेन प्रमात्वाभावं भ्रमत्वञ्चानुगमय्य तन्निश्चयत्वेन तयोः प्रमात्वज्ञानप्रतिबन्धकत्वं कल्प्यम् । प्रमात्वविरोधित्वञ्च तत्प्रमात्वावच्छेदकावच्छेदेन तद्वृत्तिभिन्नत्वम् । "अयं घटः" इति ज्ञाने घटत्वावच्छेदेनैव घटत्वप्रमात्वस्य सत्त्वात्तदवच्छेदेन प्रमात्वाभावस्य भ्रमत्वस्य चासत्त्वात्, तयोः प्रमात्वविरोधित्वम् । तद्वृत्तिभिन्नत्वमात्रोक्तौ यत्र घटत्वेन घटपटविषयकं ज्ञानं तत्र ज्ञाने घटरूपविषयावच्छेदेन घटत्वादिप्रमात्वम्, पटरूपविषयावच्छेदेन तदभाव इति तदभावस्य विरोधित्वानुपपत्तिस्तद्वृत्तित्वाद् अतस्तत्प्रमात्वावच्छेदकावच्छेदेनेति । तथा च घटत्वादिप्रामाण्यावच्छेदकीभूतो यो घटस्तदवच्छेदेन तदभावस्यावृत्तित्वात् प्रमात्वविरोधित्वमक्षतमिति । प्रमात्वस्य तत्तदर्थभेदेन भिन्नत्वात् किमपि प्रमात्वं न सामान्यतः प्रमात्वावच्छेदकावच्छेदेन विद्यत इति घटत्वादिप्रमात्वस्यापि तद्विरोधित्वापत्तिरिति तत्प्रमात्वेति ।

यद्यपि व्याप्यवृत्तेरवच्छेदकानभ्युपगमाद् व्याप्यवृत्तेर्ज्ञानत्वादेः प्रमात्वावच्छेदकावच्छेदेन वृत्तित्वविरहात्तस्य प्रमात्वविरोधित्वापत्तिरित्युच्यते, तदा प्रमात्वावच्छेदकानवच्छिन्नत्वा-

**प्रामाण्याश्रयज्ञाने प्रामाण्यग्रहप्रतिबन्धिका बाधादिबुद्धिश्चान्यथाख्याति-मनङ्गीकुर्वतां गुरूणां मतेऽगृहीतासंसर्गकज्ञानद्वयरूपैवेति ध्येयम् ॥५॥**

**पटादिविषयकज्ञानेन घटादिज्ञानीयप्रामाण्याग्रहाद्बाधवारणाय स्वाश्रयत्वमपि तद्विशेषणम् ॥६॥**

---

वच्छिन्नत्वोभयाभाववत्प्रमानिष्ठाधिकरणताकान्यत्वं प्रमात्वविरोधित्वं वक्तव्यम् । एवञ्च प्रमानिष्ठं यज्ज्ञानत्वाधिकरणत्वं तस्य व्याप्यवृत्तित्वात्तत्तावच्छिन्नत्वाभावसत्त्वेनोभयाभावसत्त्वात्, तादृशोभयाभाववदधिकरणताकान्यत्वविरहेण न प्रमात्वविरोधित्वम् । भ्रमत्वाधिकरणतायां प्रमात्वाभावाधिकरणतायाञ्च प्रमात्वावच्छेदकानवच्छिन्नत्वस्यावच्छिन्नत्वस्य चोभयोः सत्त्वेन तत्तोभयाभावविरहात्तादृशाधिकरणताकान्यत्वेन भ्रमत्वप्रमात्वाभावयोः प्रमात्वविरोधित्वम् । प्रमात्वाधिकरणतायामवच्छिन्नत्वसत्त्वाद् अवच्छिन्नत्वाभाववदधिकरणताकान्यत्वात् प्रमात्वस्यापि प्रमात्वविरोधित्वापत्तिरिति प्रमात्वावच्छेदकानवच्छिन्नत्वेति । ज्ञानत्वस्य प्रमात्वविरोधित्ववारणाय "अवच्छिन्नत्वे"ति ।

ननु भ्रमत्वस्यातीन्द्रियतया साक्षात्कारिप्रामाण्यज्ञानं प्रति भ्रमत्वज्ञानस्य प्रतिबन्धकत्वमेव न सम्भवति । साक्षात्कारिज्ञाने साक्षात्कारिविपरीतनिश्चयस्यैव प्रतिबन्धकत्वादिति चेन्न । अनायत्या भ्रमत्वनिश्चयस्यासाक्षात्कारिग्रहस्यापि साक्षात्कारिप्रमात्वज्ञाने प्रतिबन्धकत्वस्वीकारात् ।

भट्टाचार्यास्तु भ्रमत्वस्यापि साक्षात्कारं स्वीकुर्वन्ति । वस्तुतस्तु तदभाववति तत्प्रकारकत्वरूपं भ्रमत्वं तदभावधर्मितावच्छेदकतत्प्रकारकाहार्यभ्रमे लौकिकप्रत्यक्षविषय इति ध्येयमित्युक्तत्वात् ॥४॥

ननु गुरुमते ज्ञानमात्रस्यैव प्रमात्वादिति ज्ञानेऽप्रामाण्यायसत्त्वेन प्रामाण्यग्रहप्रतिबन्धिकाऽप्रामाण्यादिबुद्धिर्न सम्भवति । तादृशप्रामाण्यादिबुद्धेरन्यथाख्यातित्वेन तेनानभ्युपगमादित्यत आह-"**प्रामाण्याश्रये**"ति । "**अगृहीतासंसर्गके**"ति—यत्र स्वातन्त्र्येणाप्रामाण्योपस्थितौ धर्मिज्ञानम्, परन्तु तादृशाप्रामाण्योपस्थितिधर्मिज्ञानयोः परस्परं भेदो न गृहीतस्तादृशज्ञानविषययोश्च परस्परमसंसर्गाग्रहस्तादृशज्ञानद्वयस्यैव गुरुमते भ्रमरूपत्वात् । प्रामाण्यविरोधिप्रकारतानिरूपिततज्ज्ञाननिष्ठविशेष्यतानिरूपकज्ञानमेव प्रामाण्यविरोधिज्ञानमिति यावत् । गुरुमते भ्रमस्थले विभिन्नज्ञानगोचरयोरपि धर्मधर्मिणोर्विशेषणविशेष्यभावोपगमात्र तन्मतसिद्धाप्रामाण्यभ्रमासंग्रहः ॥५॥

स्वविषयकग्रहप्रतिबन्धकाभावकालीनज्ञानत्वव्यापकत्वमेव विषयितायां निवेशयतां किं तादृश-

**इच्छादीनामपि तद्वति तत्प्रकारकत्वरूपप्रामाण्याश्रयत्वात्, तेषाञ्च तद्ग्राहकत्वाद्वाध इत्यतो ज्ञानत्वनिवेशः ॥७॥**

**घटज्ञानं प्रमेत्याकारकानुमित्यादीनां घटत्ववति घटत्वप्रकारकत्वादिरूप-प्रामाण्याश्रयत्वात्, तत्र च तादृशप्रामाण्यावगाहनस्य नैयायिकानामपि सम्मततया सिद्धसाधनमतस्तादृशज्ञानवृत्तिविषयिताप्रतियोगिकत्वं परित्यज्य**

---

स्वाश्रयज्ञानत्वव्यापकत्वनिवेशेन इत्यत आह—"**पटादिविषयकज्ञानेने**"ति। "**स्वाश्रयत्व-मपि तद्विशेषण**"मिति। यादृशं प्रामाण्यं पक्षस्तदेव स्वपदार्थः, तथाच घटज्ञानीय-प्रामाण्याश्रयत्वस्य पटज्ञाने विरहात् तादृशप्रामाण्यस्य तद्ग्राह्यत्वेऽपि न क्षतिरिति भावः ॥६॥

ज्ञानत्वनिवेशप्रयोजनमाह—"**इच्छादीनामपी**"ति। प्रामाण्याश्रयत्वव्यापकविषयिता-प्रतियोगित्वस्य साध्यत्वे इच्छादावपि तद्वति तत्प्रकारकत्वरूपप्रामाण्यस्य सत्त्वात् तत्र च प्रामाण्यविषयिताया असत्त्वान्न प्रामाण्यविषयितायां तादृशप्रामाण्याश्रयत्वव्यापकतेत्यतः प्रामाण्याश्रयज्ञानत्वव्यापकतानिवेशः। ज्ञानत्वनिवेशे च तादृशप्रामाण्याश्रयज्ञानत्वस्य प्रामाण्याश्रयीभूतज्ञाने एव सत्त्वात् तत्र च प्रामाण्यविषयिताया गुरुमतेऽवश्याङ्गीकारा-त्तादृशज्ञानत्वव्यापकविषयिताप्रतियोगित्वरूपं साध्यं प्रामाण्ये निराबाधमेव ॥७॥

विषयितायां तादृशज्ञानवृत्तित्वमपहाय तादृशज्ञानत्वव्यापकत्वनिवेशप्रयोजनमाह—"**घटज्ञान**"मित्यादि। "**प्रामाण्याश्रयत्वादि**"ति। घटज्ञानं प्रमेत्याकारकानुमित्यादौ पक्षांशे विशेषणीभूते घटे घटत्वस्य प्रकारत्वाद् घटत्ववति घटत्वप्रकारकत्वरूपं प्रामाण्यं तत्र निराबाधमेव। "**सिद्धसाधन**"मिति। प्रामाण्याश्रयीभूतज्ञानरूपायां तादृशानुमितौ प्रामाण्यविषयिताया नैयायिकैरप्यङ्गीकारात् प्रामाण्याश्रयवृत्तिविषयिता-प्रतियोगित्वं प्रामाण्ये न्यायमतसिद्धत्वेन सिद्धसाधनम्। तादृशज्ञानत्वव्यापकत्वनिवेशे च "अयं घटः" इति व्यवसायात्मकज्ञाने तादृशज्ञानत्वस्य सत्त्वेनापि तत्र प्रामाण्यविषयिताविरहान्न तन्मते प्रामाण्यविषयितायास्तादृशज्ञानत्वव्यापकत्वमिति प्रामाण्ये तादृशज्ञानत्वव्यापक-विषयिताप्रतियोगिकत्वस्यासिद्धतया न सिद्धसाधनम्।

यद्यपि नैयायिकमतेऽपि प्रामाण्यविषयितायाः प्रमेयत्वादिना प्रामाण्याश्रयज्ञानत्व-व्यापकत्वात् सिद्धसाधनम्। घटत्ववति घटत्वप्रकारकत्वत्वावच्छिन्नविषयितात्वेन व्यापकत्व-निवेशे च न्यायमते तादृशव्यापकत्वाप्रसिद्ध्या तादृशव्यापकत्वघटितसाध्याप्रसिद्धेः, नैयायिकान् प्रति निरुक्तस्वतस्त्वसाधनासंगतेः। न च घटत्ववति घटत्वप्रकारकत्वरूप-

**तथाविधज्ञानत्वव्यापकविषयिताप्रतियोगित्वपर्यन्तानुधावनम्। विधिप्रसिद्धिस्तादृशप्रामाण्यघटकीभूतघटत्वादौ ॥८॥**

**अत्र गुरुमतानुयायिनो ज्ञानं नानुव्यवसायग्राह्यं किन्तु स्वयमेव स्वं गृह्णाति।**

---

प्रामाण्ये तादृशप्रामाण्याश्रयज्ञाननिष्ठभेदप्रतियोगितानवच्छेदकविषयितानिरूपकत्वस्य साध्यतया नानुपपत्तिः, न्यायमतेऽपि घटत्वादावुक्तसाध्यस्य प्रसिद्धेः गुरुमते च प्रामाण्याश्रयज्ञाने प्रामाण्यविषयिताया नियमेन सत्त्वात्तस्या अपि प्रामाण्याश्रयज्ञाननिष्ठभेदप्रतियोगितानवच्छेदकत्वेन तन्निरूपकत्वस्य प्रामाण्येऽक्षततया सामञ्जस्यादिति वाच्यम्। ज्ञानभेदेन विषयिताभेदात् प्रामाण्यविषयितायास्तत्तदाश्रयभेदेन भिन्नतया चालनीयन्यायेन तादृशग्रहनिष्ठभेदप्रतियोगितावच्छेदकत्वात्, तदनवच्छेदकप्रामाण्यविषयित्वाप्रसिद्धेः। तथापि प्रामाण्यस्यापि विषयितारूपत्वेन ज्ञानभेदेन भिन्नत्वात् तत्तत् प्रामण्यं पक्षीकृत्य तत्प्रामाण्याश्रयग्रहनिष्ठभेदप्रतियोगितानवच्छेदकविषयितानिरूपकत्वस्य साध्यत्वान्नानुपपत्तिः।

वस्तुतस्तु तादृशग्रहनिष्ठाभावप्रतियोगितात्वावच्छिन्नं पक्षीकृत्य विशिष्टप्रामाण्यविषयितात्वावच्छिन्नत्वकोटिकविप्रतिपत्तौ तात्पर्यम्। अत्र विधिकोटिर्नैयायिकादीनाम्, अभावकोटिर्गुरूणाम्। न्यायमते प्रामाण्यानवगाहिप्रामाण्याश्रयीभूतज्ञाने विशिष्टप्रामाण्याविषयितात्वावच्छिन्नाभावसत्त्वात्, तादृशाभावप्रतियोगितात्वावच्छिन्ने पक्षे विशिष्टप्रामाण्यविषयितात्वावच्छिन्नत्वसत्त्वाद् विधिप्रसिद्धिः। गुरुमते तु प्रामाण्याश्रयज्ञानमात्रस्य प्रामाण्यावगाहितया प्रामाण्याश्रयीभूते कस्मिंश्चिदपि ज्ञाने विशिष्टप्रामाण्यविषयितात्वावच्छिन्नाभावासत्त्वात् प्रामाण्याश्रयीभूतज्ञाननिष्ठाभावप्रतियोगितात्वावच्छिन्ने तादृशप्रतियोगित्वे पक्षे विशिष्टप्रामाण्यविषयितात्वावच्छिन्नत्वाभावसत्त्वात्तत्र निषेधप्रसिद्धिः।

ननु तादृशज्ञानत्वव्यापकविषयिताप्रतियोगित्वरूपं साध्यं न कुत्रापि सर्वमतसिद्धमिति साध्यस्यैवाप्रसिद्धिरित्याशङ्कां परिहरति **"विधिप्रसिद्धि"**रिति। **"तादृशप्रामाण्यघटकीभूतघटत्वादा"**विति—घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्याश्रयीभूतं ज्ञानं घटत्वविषयकमेवेति घटत्वविषयितायास्तादृशज्ञानत्वव्यापकत्वात् तादृशविषयिताप्रतियोगित्वं घटत्वे सर्वमतसिद्धमेवेति घटत्वे विधिकोटिप्रसिद्धिरिति भावः ॥८॥

गुरुमतं परिष्कर्तुमाह—**"अत्र गुरुमतानुयायिन"** इति। ज्ञानमनुव्यवसायेन गृह्यत इति न्यायमतम्, गुरुमते तु ज्ञानं नानुव्यवसायग्राह्यमित्याह **"ज्ञान"**मिति। गुरुमते ज्ञानस्य स्वप्रकाशतया व्यवसायेनैव व्यवसायस्य ग्रहणं भवतीत्याह—**"किन्त्व"**-त्यादि। यज्ज्ञानं यद्विषयकव्यवहारजनकं तज्ज्ञानं तद्विषयकमिति नियमाद् व्यवसायस्य

**तावतैव स्वविषयकव्यवहारादिरूपकार्योपपत्ते र्ज्ञानविषयकज्ञानान्तरकल्पने प्रमाणाभावाद्। स्वस्मिन् गृह्यमाणे ज्ञानत्वादिरूपस्ववृत्तिधर्मवत् स्ववृत्तिप्रामाण्यमप्यसति प्रतिबन्धके स्वयमवगाहते। स्वोत्पादकसामग्र्याः स्ववृत्तिज्ञानत्वादिविषयितानियामकत्ववत् स्ववृत्तिप्रामाण्यविषयितानियामकत्वस्याभ्युपगमाद्॥९॥**

**अथ घटज्ञानादिजनकीभूतघटसन्निकर्षादीनां प्रामाण्यविषयितावच्छिन्नजन्यतानिरूपितजनकत्वाभावात् कथं तेषां प्रामाण्यभासकत्वमिति चेन्न,**

---

व्यवसायविषयकव्यवहारजनकत्वे सिद्ध एव व्यवसायविषयकत्वं सिध्यतीत्यतो व्यवसायस्य व्यवसायविषयकव्यवहारजनकत्वमुपपादयति "**तावतैवे**"ति। "**स्वविषयके**"ति—स्वं व्यवसायः, तथा च व्यवसायस्य व्यवसायविषयकव्यवहारजनकत्वाद् व्यवसायस्य व्यवसायविषयकत्वं स्वीकार्यमिति भावः। ननु यो यद्विषयकव्यवहारजनकः स तस्माद्भिन्नः, यथा घटविषयकव्यवहारो घटभिन्नेन घटविषयकज्ञानेन भवतीति नियमाद् व्यवसायविषयकव्यवहारोऽपि व्यवसायभिन्नेन व्यवसायविषयकज्ञानान्तरेणैव भवत्वित्याशङ्कानिरासायाह— "**ज्ञानविषयके**"ति। "**ज्ञानान्तरे**"तिव्यवसायातिरिक्तव्यवसायविषयकज्ञानान्तरकल्पन इत्यर्थः। "**प्रमाणाभावादि**"ति—तथाचोक्तव्याप्तौ प्रयोजकविरहात्तन्मूलकं ज्ञानान्तरकल्पनं न स्यादिति भावः।

ज्ञानस्य प्रामाण्यावगाहितां दृष्टान्तेन व्युत्पादयति—"**स्वस्मिन्नि**"ति। स्वस्मिन् व्यवसाये। '**स्ववृत्तिधर्मवदि**"ति—यथा व्यवसाये गृहीते व्यवसायवृत्तिज्ञानत्वादिधर्मोऽपि गृह्यते तथा व्यवसायवृत्तिप्रामाण्यमपि गृह्यत इत्यर्थः। यत्र व्यवसायेऽप्रामाण्यग्रहो भ्रमत्वग्रहो वा तत्र व्यवसायेन प्रामाण्यं नावगाह्यत इत्याह— "**असती**"ति। ननु यथा घट इत्याकारके ज्ञाने घटविषयितायां ज्ञानविषयितायां ज्ञानत्वविषयितायाश्च तादृशज्ञानोत्पादकसामग्र्येव नियामिका तद्वदुक्तज्ञाने यदि प्रामाण्यमप्यवगाहते तदा प्रामाण्यविषयिताया अपि नियामकं किमपि वाच्यम्, किन्तदित्यपेक्षायामाह—"**स्वोत्पादकसामग्र्या**"इति। व्यवसायोत्पादिका सामग्री यथा व्यवसायविषयितानियामिका व्यवसायवृत्तिज्ञानत्वादिविषयितानियामिका च तथा व्यवसायवृत्तिप्रामाण्यविषयितानियामिकाऽपीति गुरुमते स्वीकारादित्यर्थः॥६॥

घटेन्द्रियसन्निकर्षाद् घटविषयकं ज्ञानं भवत्येवेति घटविषयकं प्रति घटसन्निकर्षत्वेन कारणत्वं स्वीकार्यम्, परन्तु कदाचिद् घटसन्निकर्षजन्यघटज्ञाने प्रामाण्यग्रहः, कदाचिच्चाप्रामाण्यग्रह इति प्रामाण्यविषयकं प्रति न घटसन्निकर्षत्वेन कारणत्वं सम्भवति अप्रामाण्य-

सन्निकर्षादिजन्यतावच्छेदककोटौ प्रामाण्यविषयकत्वानिवेशेऽपि ज्ञानं न प्रमेत्येतादृशबाधाभावादिजन्यतावच्छेदककोटौ तन्निवेशस्यावश्यकत्वात्। घटचक्षुःसंयोगादिसहकृततादृशबाधाभावाद्यात्मकसामग्रीबलादेव तत्र प्रामाण्यभानोपपत्तेः ॥१०॥

अथ विशेषणताविशेषेणात्मसमवेतवृत्तिविषयकप्रत्यक्षे मनःसंयुक्तसमवेत-विशेषणताया हेतुत्वमिच्छादौ विषयत्वादिप्रत्यक्षानुरोधेन कल्पनीयम्। एवञ्च

---

ग्रहस्थलेऽपि घटेन्द्रियसन्निकर्षसत्त्वेन व्यभिचारादित्याशङ्कते "**अथे**"त्यादि। "**जनकत्वा-भावा**"दिति। घटेन्द्रियसन्निकर्षजन्ये गृहीताप्रामाण्यकज्ञाने अन्वयव्यभिचारेण जनकत्वा-भावादित्यर्थः।

सन्निकर्षादीनां प्रामाण्यभासकत्वासम्भवेऽपि बाधाभावादीनां तद्भासकत्वमिति समाधत्ते "**ने**"ति। "**तन्निवेशस्यावश्यकत्वा**"दिति। "तन्निवेशस्य" प्रामाण्यविषयकत्व-निवेशस्येत्यर्थः। ज्ञानं न प्रमेत्याद्याकारकबाधज्ञानसत्त्वे प्रामाण्यज्ञानं न भवतीति, उक्त-बाधज्ञानस्य प्रामाण्यविषयकत्वावच्छिन्नं प्रति प्रतिबन्धकतया प्रतिबन्धकाभावस्य च कारणतया बाधाभावजन्यतावच्छेदककोटौ प्रामाण्यविषयकत्वमवश्यं निवेश्यमिति भावः।

ननु प्रामाण्यविषयकत्वावच्छिन्नं प्रति बाधाभावस्य कारणत्वे इन्द्रियसन्निकर्षाद्य-सत्त्वेऽपि केवलबाधाभावादेव कथं न प्रामाण्यविषयकोत्पत्तिरित्यत आह—"**घटचक्षुः-संयोगादिसहकृते**"ति। अयं भावः—प्रामाण्यविषयकत्वावच्छिन्नस्य प्रत्यक्षानुमित्याद्य-न्यतमव्याप्यतया व्याप्यकार्यं प्रति व्यापकोत्पादकस्यापि कारणतया प्रामाण्य-विषयकत्वावच्छिन्नं प्रत्यपि प्रत्यक्षानुमित्याद्यन्यतमोत्पादकानां सन्निकर्षादीनां कारणत्वात् तत्सहकृतबाधाभावस्यैव सामग्रीत्वात् तादृशसन्निकर्षादिघटितबाधाभावबलादेव ज्ञाने प्रामाण्यभानं भवेदिति न केवलं बाधाभावादेव प्रामाण्यभानापत्तिः। नैकस्मादेव कारणात् कार्यं भवति, अपि तु सामग्रीबलादिति नियमात्। "**तत्रे**"ति। 'तत्र' ज्ञाने। "**प्रामाण्य-भानोपपत्ते**"रिति। प्रामाण्यविषयकत्वोपपत्तेरित्यर्थः ॥१०॥

इच्छादिवृत्तिविषयत्वस्य मानसप्रत्यक्षानुरोधेन विशेषणताविशेषसम्बन्धेनात्मसमवेत-वृत्तिविषयकप्रत्यक्षं प्रति मनःसंयुक्तसमवेतविशेषणतासन्निकर्षस्य हेतुत्वेन ज्ञानगतविषयत्वस्यापि विशेषणताविशेषेणात्मसमवेतवृत्तितया तत्प्रत्यक्षेऽपि मनःसंयुक्तसमवेतविशेषणतासन्निकर्षस्य हेतुत्वमवश्यं स्वीकार्यम्। एवञ्च प्रामाण्यस्यापि ज्ञानवृत्तिविषयतारूपत्वेन प्रामाण्यविषयक-प्रत्यक्षेऽपि मनःसंयुक्तसमवेतविशेषणताया हेतुत्वम्। तथाच प्रामाण्याश्रयव्यवसायोत्-

**तथाभूते प्रामाण्येऽव्यवहितपूर्वमाश्रयविरहेण तद्घटितोपदर्शितसन्निकर्षरूप-कारणविरहात् कथं स्वाश्रयोत्पत्तिक्षणे तस्य प्रत्यक्षमुत्पद्यत इति चेत्।**

**तर्हि इच्छादिप्रत्यक्षानुरोधेनात्मसमवेतगोचरप्रत्यक्षे मनःसंयुक्तसम-वायस्य हेतुतायाः क्लृप्तत्वादव्यवहितपूर्वक्षणावच्छेदेन च ज्ञाने तादृशहेत्व-भावात् स्वोत्पत्तिक्षणे ज्ञानप्रत्यक्षमेव कथमुत्पद्यत इत्येव किं नाशङ्कसे? एतत् समाधानञ्च स्वप्रकाशविचारे वक्ष्यामः ॥११॥**

---

पत्त्यव्यवहितपूर्वक्षणे प्रामाण्ये तादृशव्यवसायघटितसन्निकर्षासम्भवेन प्रामाण्याश्रय-व्यवसायोत्पत्तिक्षणे कथं प्रामाण्यभानम्, कारणस्य पूर्वक्षणेऽपेक्षणीयत्वादित्याशङ्कते "**अथे**"ति। "**आत्मसमवेतवृत्तिविषयकप्रत्यक्ष**" इति। आत्मसमवेतो ज्ञानेच्छादिः, विशेषणताविशेषेण तद्वृत्ति यद्विषयत्वं प्रकारत्वविशेष्यत्वादि, तद्वति तत्प्रकारकत्वरूप-प्रामाण्यञ्च तद्विषयकप्रत्यक्ष इत्यर्थः। "**हेतुत्व**"मिति। सन्निकर्षविधया इति बोध्यम्। "**इच्छादौ विषयत्वादी**"ति। इच्छादिनिष्ठविषयत्वादीत्यर्थः। "**तथाभूते प्रामाण्य**"इति। 'तथाभूते' विशेषणताविशेषेणात्मसमवेतवृत्तिविषयितारूपे तद्वति तत्प्रकारत्वरूप इति यावत्। "**अव्यवहितपूर्व**"मिति। प्रामाण्याश्रयाव्यवहितपूर्वक्षण इत्यर्थः।

समाधत्ते—"**तर्ही**"ति। यथा आत्मसमवेतेच्छानिष्ठविषयताप्रत्यक्षे मनःसंयुक्तसमवेत-विशेषणताया अपेक्षितत्वात्तदनुरोधेन च विशेषणतासम्बन्धेनात्मसमवेतवृत्तिविषयकप्रत्यक्ष-सामान्यं प्रत्येव तादृशसन्निकर्षस्य हेतुत्वं कल्प्यते तथात्मसमवेतेच्छादिप्रत्यक्षे मनःसंयुक्तसमवाय-स्यापेक्षा। तदनुरोधेनैव आत्मसमवेतविषयकप्रत्यक्षसामान्यं प्रत्येव मनःसंयुक्तसमवायस्य हेतुत्वं कल्प्येत इति ज्ञानोत्पत्त्यव्यवहितपूर्वक्षणावच्छेदेन ज्ञाने तादृशसन्निकर्षाभावात् स्वोत्पत्तिक्षणे ज्ञानप्रत्यक्षमेव न भवितुमर्हतीत्यपि गुरुमते आपत्तिर्भवितुमर्हति। एतद्वारणाय गुरुमतानुयायिभिर्यादृशी रीतिरवलम्ब्यते तेनैव पूर्वोक्तापत्तिरपि वार्यत इत्यर्थः। उक्तदोष-वारणप्रकारः क इत्यपेक्षायामाह—"**एतत् समाधानञ्च**"त्यादि। अत्रायमभिसन्धिः-वक्ष्यमाणदूषणगणग्रासाज्ज्ञानस्य स्वप्रकाशत्वमेवाभ्युपगन्तव्यम्, एवञ्च ज्ञानप्रत्यक्षे यदीन्द्रिय-सन्निकर्षादेरपेक्षा स्यात् तर्हि स्वप्रकाशत्वमेव न स्यात्, इन्द्रियसन्निकर्षादिप्रकाश्यत्वात्। तथा च इन्द्रियसन्निकर्षं विनैव ज्ञानप्रत्यक्षं भवतीति सिद्धम्। एवञ्चेन्द्रियसन्निकर्षादिकं विना ज्ञानस्य प्रत्यक्षत्वे ज्ञानगतज्ञानत्वविशेष्यकत्वप्रकारकत्वादिवज्ज्ञाननिष्ठं तद्वति तत्प्रकारकत्व-पर्यवसितं प्रामाण्यमपि इन्द्रियसन्निकर्षादिकं विनैव प्रकाशते; तथाच प्रामाण्यप्रत्यक्षेऽपी-न्द्रियसन्निकर्षादेरपेक्षाविरहेण स्वाश्रयोत्पत्तिक्षणे प्रामाण्यप्रत्यक्षस्य नानुपपत्तिरिति ॥११॥

**प्रामाण्यरूपविशेषणोपस्थितिं विना कथं प्रथमतो ज्ञानांशे प्रामाण्यविशिष्ट-बुद्धिरित्यपि नाशङ्कनीयम्। यतः प्रभाकरा विशिष्टबुद्धौ विशेषणज्ञानहेतुतामेव नोपगच्छन्ति ॥१२॥**

---

ननु ज्ञानधर्मिकप्रामाण्यज्ञानस्य प्रवृत्त्याद्युपयोगित्वेन ज्ञानविशेषणतया प्रामाण्य-भानमेवाभ्युपगन्तव्यं तच्च व्यवसायोत्पत्तिक्षणे न सम्भवति, विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुतया व्यवसायोत्पत्तिपूर्वक्षणे प्रामाण्यज्ञानाभावादित्याशङ्कते—"**प्रामाण्यरूपे**"ति। द्वितीयादिज्ञानांशे प्रथमज्ञानोपस्थितस्य प्रामाण्यस्य भानसम्भवेनाह "**प्रथमत**"-इति।

समाधत्ते—"**नाशङ्कनीय**"मिति। प्रभाकरमते पूर्वोक्ताशङ्का न कर्तव्येत्यर्थः। कथमित्यपेक्षायामाह "**यत**"इति। "**नोपगच्छन्ती**"ति। न च 'यद् यद्विशिष्टज्ञानं तत्तज्ज्ञानसाध्यम्' इति व्याप्त्या विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतासिद्धिरिति वाच्यम्। उक्तव्याप्तेरनुकूलतर्कविरहात्। न च गौरयमित्यादिगोत्वविशिष्टबुद्धौ गोत्वरूपविशेषण-ज्ञानं कारणम्। अतएव निर्विकल्पकज्ञानमपि स्वीकार्यमिति वाच्यम्। विशेष्ये विशेषणे च युगपदिन्द्रियसन्निकर्षादेव विशिष्टज्ञानमुत्पद्यते, न तु विशेषणज्ञानमपि तत्र कारणम्, विशेषणज्ञानस्य कारणत्वे निर्विकल्पकज्ञानादिकल्पनेन महागौरवात्।

तत्र नैयायिकाः—घटत्वप्रकारकज्ञानं द्विविधम्, स्वरूपतः घटत्वप्रकारकं, जातित्वादिना घटत्वप्रकारकञ्च। विशेषणज्ञानस्य हेतुत्वमते यत्र पूर्वं स्वरूपतो घटत्वरूपविशेषणस्य ज्ञानं तत्रैव स्वरूपतः घटत्वप्रकारकज्ञानमुत्पद्यते, यत्र तु जातित्वादिना घटत्वज्ञानं पूर्वं जातं तत्र जातित्वादिना घटत्वप्रकारकज्ञानमुत्पद्यते। विशेषणज्ञानस्य हेतुत्वाभावे तूक्तज्ञानद्वयस्य विशेषनियामकाभावात् सर्वत्रैव ज्ञानद्वयापत्तेः, इन्द्रियसन्निकर्षादेरुभयत्र तुल्यत्वात्। अतो विशेषणज्ञानस्य हेतुत्वमवश्यमेवाभ्युपगन्तव्यम्। तदनुरोधेन च निर्विकल्पकज्ञानापेक्षाऽपि सिद्धान्तसिद्धेति ध्येयम्।

अत्रेदं चिन्त्यते—विशेषणज्ञानस्य कारणत्वेऽभावबुद्धावभावत्वनिर्विकल्पकज्ञानं कारणम्, तच्च 'अभावाभावत्वे' इत्याकारकम्। अत्र निर्विकल्पकं प्रतियोगिविशेषितम-भावमवगाहते प्रतियोग्यविशेषितं वा? आद्ये निर्विकल्पकत्वानुपपत्तिः प्रतियोग्यभावयोः सम्बन्धावगाहित्वात्। द्वितीये तु 'प्रतियोग्यविशेषितोऽभावो नावगाहत' इति सिद्धान्त-विरोधः स्यात्। एवं ज्ञानत्वनिर्विकल्पके ज्ञानज्ञानत्वे इत्याकारके ज्ञानं विषयविशेषितं सद् भासते विषयाविशेषितं वा? आद्ये ज्ञानविषययोः सम्बन्धावगाहनान्निर्विकल्पकत्वानुप-

**अथ पटत्वादिप्रकारकप्रत्यक्षकालेऽपि बाधाभावादिबलाद् घटत्ववति घटत्वप्रकारकत्वादिरूपप्रामाण्यग्रहप्रसङ्गः। घटत्वादिप्रकारकज्ञानजनकीभूतघटचक्षुःसंयोगादिकं विना कदापि घटत्ववति घटत्वप्रकारकत्वादीनामग्रहाद् बाधाभावादीनां तादृशसहकारिसमवहितानामेव तादृशप्रामाण्यग्रहप्रयोजकत्वमभ्युपेयते। पटत्वादिप्रकारकप्रत्यक्षकाले च तादृशसहकारिविरहान्न तदापत्तिरिति तु न विचारसहम्।**

**यतस्तथाविधप्रामाण्यग्रहे बाधाभावादिना जनयितव्ये घटचक्षुःसंयोगादीनां घटचक्षुःसंयोगत्वादिना सहकारिता न सम्भवति। चाक्षुषादौ चक्षुःसंयोगादीनां घटादिकमनिवेश्य सामान्यतश्चक्षुःसंयोगत्वादिनैव हेतुत्वाद् घटचक्षुःसंयोगत्वादीनां तादृशप्रामाण्यावगाहिग्रहनिष्ठकार्यतानिरूपितकारणतानवच्छेदकत्वात्, किन्तु तथाविधचक्षुःसंयोगत्वादिनैव सहकारित्वमुपगन्तव्यम्। तदवच्छिन्नघटितसामग्री च पटादिचक्षुःसंयोगकालेऽप्यक्षतैवेति नापत्तिवारणसम्भवः ॥१३॥**

---

पत्तिः। द्वितीये तु 'निर्विषयं ज्ञानं नावगाहत' इति सिद्धान्तविरोधः स्यादित्यादिकं विशेषदर्शिभिरवहितैः समाधातव्यम् ॥१२॥

शङ्कते—"**अथे**"ति। "**बाधाभावादिबला**"दिति। घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहप्रतिबन्धकाभावादिबलादित्यर्थः। "**प्रामाण्यग्रहप्रसङ्ग**"इति। बाधाभावस्यैव प्रामाण्यग्राहकत्वात्तत्सत्त्वेन घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहापत्तिरित्यर्थः।

घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहे घटचक्षुःसंयोगादीनामप्यपेक्षणात्, पटत्वादिप्रकारकप्रत्यक्षकाले तदभावान्न तदानीं घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहापत्तिरित्याशङ्कते—"**घटत्वादी**"ति। तादृशप्रामाण्यग्रहे घटत्वादिप्रकारकज्ञानजनकघटचक्षुःसंयोगादीनां कारणताग्राहकं व्यतिरेकसहचारं दर्शयति—"**घटचक्षुःसंयोगादिकं विने**"ति। "**तादृशसहकारिविरहा**"दिति। घटचक्षुःसंयोगादिरूपसहकारिविरहादित्यर्थः। निराकरोति—"**न विचारसह**"मिति।

विचारासहत्वे हेतुमाह—"**यत**"इति। "**सामान्यतश्चक्षुःसंयोगत्वादिनैव हेतुत्वादि**"ति। सामान्यतः प्रामाण्यचाक्षुषे सामान्यतश्चाक्षुषसामग्र्याः सहकारिता, न तु घटत्वादिप्रकारकचाक्षुषसामग्र्याः पटत्वादिप्रकारकचाक्षुषसामग्रीतोऽपि प्रामाण्यग्रहात्। तथा च सामान्यतश्चाक्षुषं प्रति चक्षुःसन्निकर्षस्य घटादिकमनिवेश्य चक्षुः-

**घटत्वादिप्रत्यक्षं प्रति संस्थानविशेषावच्छिन्नसन्निकर्षत्वादिना हेतुत्वस्यावश्यकत्वात्। घटत्ववति घटत्वप्रकारकत्वादिग्रहप्रयोजकसामग्रीव्याप्तौ कम्बुग्रीवाद्यवच्छिन्नसन्निकर्षत्वावच्छिन्नं निवेश्योक्तापत्तेः शक्यवारणमिति चेत्।**

**एवमपि तद्घटादिवृत्तीदन्त्वादिप्रकारकत्वघटितप्रामाण्यस्य घटान्तरसन्निकर्षदशायां ग्रहणं दुर्वारमेव, न हि तद्घटसन्निकर्षत्वादिनापि सन्निकर्षस्य हेतुतां कश्चिदभ्युपैति, येन तत्तद्घटवृत्तीदन्त्वादिप्रकारकत्वघटितप्रामाण्यग्रहप्रयोजकसामग्रीव्याप्तौ तत्तद्व्यक्तिसन्निकर्षत्वावच्छिन्नं निवेश्यातिप्रसङ्गं वारयिष्यसि ॥१४॥**

---

सन्निकर्षत्वेन हेतुत्वम्, एवञ्च घटचक्षुःसंयोगत्वस्य प्रामाण्यविषयकत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकत्वविरहान्न तदवच्छिन्नघटचक्षुःसंयोगविरहात् पूर्वोक्तप्रामाण्यभानापत्तिवारणं सम्भवतीति भावः ॥१३॥

ननु सामान्यतः प्रामाण्यचाक्षुषं प्रति सामान्यतश्चाक्षुषसामग्र्याः सहकारित्वेऽपि घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यचाक्षुषादिकं प्रति घटत्वप्रकारकचाक्षुषादिसामग्र्याः सहकारिता, तथा च तदसत्त्वान्न पटत्वप्रकारकचाक्षुषादिकाले घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यचाक्षुषापत्तिरित्याह "**घटत्वादी**"ति। "**संस्थानविशेषावच्छिन्नसन्निकर्षत्वादिने**"ति। मीमांसकमते जातेः संस्थानविशेषव्यङ्ग्यत्वेन संस्थानविशेषावच्छिन्नसन्निकर्षाभावे संस्थानविशेषाग्रहाद् घटत्वादिजातिग्रहोऽपि न भवितुमर्हतीति संस्थानविशेषावच्छिन्नसन्निकर्षत्वेन हेतुत्वमावश्यकमिति भावः। "**शक्यवारण**"मिति। तथा च पटत्वादिप्रकारकप्रत्यक्षकाले घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहकारणीभूतबाधाभावादिसहकारिणो घटत्वप्रकारकप्रत्यक्षहेतोः संस्थानविशेषावच्छिन्नसन्निकर्षादेरभावान्न घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रह इति भावः।

उक्तरीत्या पटादिप्रत्यक्षकाले घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहापत्तिवारणेऽप्येकघटप्रत्यक्षकालेऽपरघटवृत्तीदन्तादिमतीदन्ताप्रकारकत्वरूपप्रामाण्यग्रहापत्तिर्दुर्वारेत्याह "**एवमपी**"ति। पूर्वोक्तप्रणाल्या पटादिप्रत्यक्षकाले घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहापत्तेर्वारणसम्भवेऽपीत्यर्थः। "**न हि तद्घटसन्निकर्षत्वादिनापि सन्निकर्षस्य हेतुतां कश्चिदभ्युपैती**"ति। न चैकघटसन्निकर्षदशायामपरघटप्रत्यक्षापत्तिवारणाय तत्तद्घटसन्निकर्षत्वेनापि हेतुत्वमावश्यकमिति वाच्यम्। विषयतासम्बन्धेन प्रत्यक्षं प्रति

**अत्रोच्यते—तद्धर्मावच्छिन्नविशेष्यकतदत्यन्ताभावतदवच्छिन्नभेदव्याप्यवत्ता-निर्णयात्तद्धर्मावच्छिन्नविशेष्यकतदत्यन्ताभावाद्यनुमितेरापत्तिवारणाय विशेष्य-तावच्छेदकतासम्बन्धेन तदभावाद्यनुमितौ तत्तद्धर्मभेदस्य हेतुत्वान्तरमुभय-**

---

आश्रयत्वसम्बन्धेन सन्निकर्षस्य हेतुत्वादेकघटसन्निकर्षस्यापरघटे आश्रयत्वसम्बन्धेन विरहादुक्ता-पत्तिवारणसम्भवेन तत्तद्घटसन्निकर्षत्वेन हेतुत्वाकल्पनादिति हृदयम् ॥१४॥

समाधानमाह—"**अत्रोच्यत**"इति । "**आपत्तिवारणाये**"ति । तथाच 'घटो घटत्वाभावव्याप्यवान्' इत्याकारकात् परामर्शाद् 'घटो घटत्वाभाववानि'त्याकारकानुमिते-र्वारणाय 'घटो घटभेदव्याप्यवानि'त्याकारकपरामर्शाद् 'घटो न घट' इत्याकारकानुमिते-र्वारणाय चेत्यर्थः । ननु घटो घटत्वाभावव्याप्यवानित्याद्याकारकपरामर्शस्याहार्यत्वेनानु-मित्यजनकतया कथमुक्तापत्तिः संगच्छते? न च स्वविरोधिधर्मधर्मितावच्छेदक-स्वप्रकारकज्ञानत्वमाहार्यत्वम्, तथा चात्र घटत्वरूपधर्मितावच्छेदके घटत्वाभावव्याप्यस्य घटभेदव्याप्यस्य च विरोधित्वाभावात्, स्वाभावस्य स्वाभावव्याप्यस्य च विरोधित्वात्, घटत्वाभावव्याप्ये घटभेदव्याप्ये च घटत्वविरोधित्वसत्त्वेऽपि तस्य धर्मितावच्छेदकत्वा-भावादुक्तज्ञानं नाहार्यमिति वाच्यम् । स्वविरोधिज्ञानकालीनेच्छाप्रयोज्यज्ञानत्वमेवाहार्य-त्वमन्यथा पर्वतो वह्निमान् वह्न्यभाववांश्चेति समूहालम्बनस्याहार्यत्वानुपपत्तेः । न च तथाप्यत्र विरोधित्वस्य प्रतिबन्धकत्वघटिततया प्रतिबन्धकज्ञानकालीनेच्छा-प्रयोज्यप्रतिबध्यज्ञानत्वमेवाहार्यत्वमित्यर्थः पर्यवसितः । तथा च पर्वतो वह्निमान् वह्न्यभाववांश्चेति ज्ञानस्याहार्यत्वानुपपत्तिः, उक्तज्ञानस्याप्रतिबन्धकत्वादप्रतिबध्यत्वाच्चेति प्रतिबन्धकतावच्छेदकविषयताशालिज्ञानसमानकालीनप्रतिबध्यतावच्छेदकविषयताशालिज्ञानत्व-मेवाहार्यत्वं वक्तव्यम्, तथा च घटो घटत्वाभावव्याप्यवानित्याद्याकारकज्ञानस्य नाहार्यत्वम्, उक्तज्ञानस्य घटत्वांशे निर्धर्मितावच्छेदकतया घटत्वादिविषयित्वस्य प्रतिबध्यत्व-प्रतिबन्धकत्वयोरनवच्छेदकत्वादिति वाच्यम् । एवं सति निर्वह्निर्वह्निमानिति ज्ञानस्याहार्यत्वेना-प्रतिबध्यत्वोक्तिर्भट्टाचार्याणामसंगता स्यात् । निर्वह्निर्वह्निमानित्यत्र वह्न्यभावप्रकारकत्वस्य निर्धर्मितावच्छेदकतया प्रतिबध्यत्वप्रतिबन्धकत्वयोरनवच्छेदकत्वात् ।

एवञ्चेच्छाप्रयोज्यस्वविरोधिविषयकज्ञानकालीनस्वविषयकप्रत्यक्षत्वमाहार्यत्वं वाच्यम् । प्रयोज्यान्तं प्रत्यक्षविशेषणम् । स्वविरोधित्वन्तु स्वाभाववत्वं स्वाभावव्याप्यत्वञ्च । निर्वह्नि-र्वह्निमानिति प्रत्यक्षे इच्छाप्रयोज्यत्वस्य वह्निविरोधिवह्न्यभावविषयकज्ञानसमानकालीन-वह्निविषयकप्रत्यक्षत्वस्य सत्त्वादाहार्यत्वम् । तथाच घटत्वतदभावव्याप्ययोरपि विरुद्धतयैकत्र

**वादिसिद्धमेव। यथा च तथाविधानुमितेरप्रसिद्धावपि तदापत्तिस्तत्प्रकारं बाधविचारे दर्शयिष्यामः ॥१५॥**

**एवञ्च तादृशस्थले विशेष्यतावच्छेदकतासम्बन्धेन तदभावानुमितित्वस्य कार्यतावच्छेदकत्वं नोपेयते, अपि तु तद्धर्मान्यवृत्तिविषयतासम्बन्धेन**

---

तयोर्ज्ञानमप्याहार्यतयाऽनुमित्यजनकत्वादिति चेत्। सत्यम् इच्छां विनाप्येकदैकधर्मिणि तत्तदभावव्याप्ययोर्ज्ञानोत्पत्तौ बाधकाभावान्नोक्तज्ञानस्येच्छाप्रयोज्यत्वम्। यथा तज्ज्ञानतदभावज्ञानयोः कार्यकालवृत्तितया प्रतिबध्यप्रतिबन्धकभावापन्नयोरिच्छां विना नैकदोत्पत्तिर्न तथा तज्ज्ञानतदभावव्याप्यज्ञानयोः। तथाहि प्रतिबन्धकत्वं द्विविधं तदभावनिश्चयत्वेन तद्विरोधिसामग्रीत्वेन च। तदभावव्याप्यवत्तानिश्चयस्य विरोधिसामग्रीत्वेनैव प्रतिबन्धकत्वम्। सामग्र्यास्तु पूर्वक्षणवृत्तित्वेनैव कार्यकारितया पूर्वक्षणवृत्तित्वेनैव प्रतिबन्धकत्वम्, न तु कार्यकालवृत्तितया। अत एकक्षणे घटत्ववतदभावव्याप्ययोर्निश्चये घटत्वघटभेदव्याप्ययोर्निश्चये च बाधकाभावात्, तत्रेच्छाया अकिञ्चित्करत्वेन न तादृशज्ञानस्याहार्यत्वमिति प्राचीनतमानां केषाञ्चिन्मतमनुसृत्य तद्धर्मावच्छिन्नविशेष्यकतदत्यन्ताभावतदवच्छिन्नभेदव्याप्यवत्तानिश्चयात्तदत्यन्ताभावाद्यनुमित्यापत्तिरिति दिक्।

ननु यादृशं कार्यं कुत्रापि प्रसिद्धं तादृशस्यैव कार्यस्यान्यत्र क्लृप्तसामग्रीसत्त्वे आपत्तिसम्भवः, तथा च घटत्वावच्छिन्नविशेष्यतानिरूपितघटत्वाभावत्वावच्छिन्नप्रकारताशाल्यनुमितेरप्रसिद्ध्या कथं तदापत्तिरित्यत आह—"**यथा चे**"ति। "**दर्शयिष्याम**" इति अनुमितिपरामर्शयोः समवायसम्बन्धेन कार्यकारणभावकल्पने धर्मितावच्छेदकभेदेन कार्यकारणभावबाहुल्यापत्तेः, अतो धर्मितावच्छेदकतासम्बन्धेन तद्विधेयकानुमितौ धर्मितावच्छेदकतासम्बन्धेन तद्व्याप्यहेतुमत्त्वनिश्चयत्वेन कारणत्वमित्येव कार्यकारणभावः स्वीकार्यः। तथाच घटत्वाभावत्वावच्छिन्नविधेयताशाल्यनुमितेर्धर्मितावच्छेदकतासम्बन्धेन पटत्वादौ प्रसिद्ध्या, घटत्वे धर्मितावच्छेदकतासम्बन्धेन घटत्वाभावव्याप्यवत्तापरामर्शादिरूपसामग्रीबलाद्घटत्वाभावविधेयकानुमित्यापत्तिरिति ध्येयम् ॥१५॥

ननु धर्मितावच्छेदकतासम्बन्धेन तदभावानुमितिं प्रति तद्धर्मभेदत्वेन कारणत्वेऽपि घटो न घटः, घटो घटत्वाभाववान्, घटो घट इत्याद्याकारकशाब्दबोधाद्यापत्तिस्तुल्यैवेत्यत आह—"**एवञ्च**"ति। "**नोपेयत**" इति। घटो न घट इत्याद्याकारकशाब्दबोधाद्यवारणादिति शेषः। ननु तादृशशाब्दबोधाद्यापत्तिवारणाय धर्मितावच्छेदकतासम्बन्धेन तदभाववत्त्वावच्छिन्नतादात्म्यसम्बन्धावच्छिन्नप्रकारताशालिशाब्दबोधं प्रति तद्धर्मभेदः कारणम्, एवं

**ज्ञानत्वस्यैव, तावतापि विशेष्यतावच्छेदकताप्रत्यासत्त्या तदभावाद्व्याप्य-वत्तापरामर्शेन फलजनने तद्भेदस्य सहकारितामुपगम्य तादृशापत्तेर्वारयितुं शक्यत्वात् ॥१६॥**

**तादृशप्रणाल्या च तत्तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानत्वावच्छिन्नं प्रति तत्तद्धर्मभेदानां कारणत्वे सिद्धे तत्प्रकारेन्द्रियसन्निकर्षादिशून्यकाले तत्तत्प्रकारघटितप्रामाण्यस्य न बाधाभावादिबलाद्ग्रहणापत्तिः। बाधा-**

---

धर्मितावच्छेदकतासम्बन्धेन घटत्वावच्छिन्नतादात्म्यसम्बन्धावच्छिन्नप्रकारताशालिशाब्दबोधं प्रति तद्धर्मभेदः कारणम्, इत्येवं रीत्या पृथक् पृथक् कार्यकारणभावकल्पनेन घटो घटत्वाभाववान्, घटो घट इत्यादिशाब्दबोधापत्तिवारणसम्भवेऽपि तदपेक्षया लघुतरकार्यकारणभावमेव ग्रन्थकृद्दर्शयति—"**अपि त्वि**"ति। "**ज्ञानत्वस्यैवे**"ति। तथाच तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति तद्धर्मभेदः कारणमिति लघुतरकार्यकारणभावः। नन्वेतादृशकार्यकारणभावकल्पनेऽपि विशेष्यतावच्छेदकतासम्बन्धेन पूर्वोक्तानुमित्याद्यापत्तिः कथं वार्यते? इत्यत आह "**तावतापी**"ति। "**सहकारितामुपगम्ये**" ति। अयंभावः—यत्र यत्र विशेष्यतावच्छेदकतासम्बन्धेन घटत्वाभावत्वावच्छिन्नस्वरूपसम्बन्धावच्छिन्नप्रकारताशाल्यनुमितिस्तत्रैव घटत्वान्यवृत्तिविषयतासम्बन्धेन ज्ञानमिति नियमाद्घटत्वान्यवृत्तिविषयतासम्बन्धेन ज्ञानस्य विशेष्यतावच्छेदकतासम्बन्धेन तादृशानुमितिव्यापकत्वाद्व्याप्यकार्ये व्यापककार्यसामग्र्यपेक्षितत्वाद् विशेष्यतावच्छेदकतासम्बन्धेन तादृशानुमितिं प्रत्यपि व्यापकस्य घटत्वान्यवृत्तिविषयतासम्बन्धेन ज्ञानस्य सामग्री अपेक्षिता भवेत्, तथा च घटत्वान्यवृत्तिविषयतासम्बन्धेन ज्ञानस्य कारणं घटत्वभेदोऽपि तादृशकार्ये अपेक्षितः, घटत्वे घटत्वभेदस्यासत्त्वान्न तत्र विशेष्यतावच्छेदकतासम्बन्धेन घटत्वाभावानुमितिरिति ॥१६॥

ननु तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति तद्धर्मभेदस्य कारणत्वेऽपि कथं घटत्वादिप्रकारकप्रत्यक्षकाले बाधाभावादिबलाद्घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यप्रत्यक्षापत्तिवारणमित्याकाङ्क्षायामाह—"**तादृशप्रणाल्ये**"त्यादि। "**कारणत्वे सिद्ध**" इति—पूर्वोक्तप्रणाल्या तत्तद्धर्मभेदानां कारणत्वे सिद्धे तादृशीमेव प्रणालीमवलम्ब्य घटत्वप्रकारकप्रत्यक्षकालेऽपि बाधाभावादिबलाद् घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहणापत्तेर्वारणीयत्वादिति भावः। "**तत्प्रकारे**"ति। तस्य ज्ञानस्य प्रकारीभूतं यद्घटत्वं तस्येन्द्रियसन्निकर्षादिशून्यकाले इत्यर्थः। घटत्वेन्द्रियसन्निकर्षशून्यकाले इति यावत्। "**तत्तत्प्रकारघटितप्रामाण्यस्य**"। घटत्वादिप्रकारघटितप्रामाण्यस्य। तादृशापत्तिवारणप्रकारं दर्शयति—

**भावादिना तद्ग्रहजनने तत्तत्प्रकारभिन्ना ये ये धर्मास्तद्भेदकूटसन्निकर्षाद्यात्मिकाया विषयनिष्ठप्रत्यासत्त्या कार्योत्पादकसामग्र्या अपि अपेक्षितत्वात्। तदानीञ्च धर्मान्तरसन्निकर्षसत्त्वेऽपि तत्तद्भेदकूटसन्निकर्षघटितसामग्र्याः कुत्रचिदपि विषयेऽसत्त्वात्। घटत्वादिसन्निकर्षशून्यकाले धर्मान्तरसन्निकर्षादिसहकृतभूतलत्वाद्यवच्छिन्नधर्मिकघटत्वाद्यवच्छिन्नविशिष्टबुद्ध्युत्पादकबाधाभावादिबलात् तादृशविशिष्टबुद्धेरापत्तिवारणाय पुनरीदृशी रीतिरुभयोरेवादरणीयेति** ॥१७॥

---

"**बाधाभावादिने**"ति। "**तद्ग्रहजनने**" प्रमाण्यग्रहजनने। "**तत्तत्प्रकारे**"-त्यादि। प्रामाण्यघटकीभूततत्तत्प्रकारो घटत्वादिस्तद्भिन्ना ये ये धर्माः पटत्वादयस्तद्भेदकूटसमानाधिकरणो यः सन्निकर्षस्तदात्मिकाया इत्यर्थः। "**अपेक्षितत्वादि**"ति। तथाच विषयतासम्बन्धेन घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यग्रहं प्रति तादृशप्रामाण्यघटकप्रकारीभूतघटत्वभिन्ना ये पटत्वादयस्तद्भेदकूटसमानाधिकरणसन्निकर्षघटितायाः सामग्र्या अपेक्षितत्वादित्यर्थः। निरुक्तसामग्र्या अपेक्षितत्वेऽपि कथं तादृशापत्तिवारणमित्यत आह "**तदानीञ्चे**"ति। पटत्वप्रकारकप्रत्यक्षकाले चेत्यर्थः। "**धर्मान्तरसन्निकर्षसत्त्वेऽपी**"ति। प्रामाण्यघटकघटत्वभिन्नो यः पटत्वादिस्तत्सन्निकर्षसत्त्वेऽपि। "**तत्तद्भेदकूटसन्निकर्षे**"ति। प्रामाण्यघटकघटत्वभिन्ना ये ये धर्मास्तद्भेदकूटसमानाधिकरणसन्निकर्षेत्यर्थः। "**कुत्रचिदपि विषय**"इति। तथाच घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यज्ञानं विषयतासम्बन्धेन घट-घटत्व-प्रकारकत्व-विशेष्यकत्वादौ विद्यते, तेषु तादृशसन्निकर्षस्यासत्त्वादित्यर्थः। पटत्वादिप्रकारकप्रत्यक्षकाले पटत्वादावेव सन्निकर्षो वर्तते। तत्र च घटत्ववति घटत्वप्रकारत्वरूपप्रामाण्यघटकप्रकारभिन्नपटत्वादिभेदस्यासत्त्वेन तादृशभेदसमानाधिकरणसन्निकर्षस्यैवालाभावादिति भावः।

एतादृशी रीतिर्न केवलमस्माकमनुमता, अपितु भवतामपि इत्याह—"**घटत्वादी**"ति। "**धर्मान्तरसन्निकर्षादी**"ति पटत्वादिसन्निकर्षादीत्यर्थः। "**तादृशविशिष्टबुद्धे**"रिति। घटत्वाद्यवच्छिन्नविशिष्टबुद्धेरित्यर्थः। "**आपत्तिवारणाये**"ति। प्रत्यक्षत्वावच्छिन्नं प्रति सन्निकर्षत्वेन हेतुत्वात् सन्निकर्षघटितबाधाभावबलाद्घटविशिष्टभूतलादिप्रत्यक्षापत्तिस्तद्वारणायेत्यर्थः। "**ईदृशी रीति**"रिति। विषयतासम्बन्धेन घटत्वाद्यवच्छिन्नप्रकारकप्रत्यक्षे प्रकारीभूतघटत्वादिभिन्नधर्मान्तरभेदकूटसमानाधिकरणसन्निकर्षत्वेन हेतुतेति रीतिरित्यर्थः। तथा चोक्तस्थले पटत्वादावेव सन्निकर्षस्य सत्त्वात्,

**स्यादेतत्—एताद्दशरीत्या अतिप्रसङ्गवारणादिसम्भवेऽपि ज्ञानस्य स्ववृत्ति-प्रामाण्यविषयकत्वे लाघवादिविरहात्तदुपगमो निरर्थकः।**

**अथायं घट इत्यादिज्ञानस्य इदंविशेष्यकघटत्वप्रकारकत्वादिना प्रत्यक्षं नैयायिकानामपि सम्मतम्। इयांस्तु विशेषो यत्ताद्दशप्रत्यक्षं नैयायिकमते व्यवसायान्तरमुत्पद्यते, गुरुमते तु व्यवसाय एव तद्रूपः; तत्र व्यवसायस्य**

---

तत्र च घटत्वभिन्नपटत्वभेदासत्त्वेन ताद्दशसन्निकर्षस्य ताद्दशभेदकूटसामानाधिकरण्या-भावात्। ताद्दशभेदकूटसमानाधिकरणसन्निकर्षस्य विरहान्न घटत्वावच्छिन्नभूतलादि-प्रत्यक्षमित्युभयवादिसिद्धां रीतिमवलम्ब्यैव पटत्वप्रकारकप्रत्यक्षकाले घटत्ववति घटत्व-प्रकारकत्वरूपप्रामाण्यप्रत्यक्षापत्तिवारणमिति भावः ॥१७॥

गुरुमतोपरि शङ्कयते "**स्यादेत**"दिति। "**एताद्दशरीत्या**"। तत्तत्प्रकारभिन्ना ये ये धर्मास्तत्तद्भेदकूटसन्निकर्षात्मिकाया विषयनिष्ठप्रत्यासत्त्या कार्योत्पादकसामग्र्याः सह-कारिताखीकारेणेत्यर्थः। "**अतिप्रसङ्गवारणादिसम्भवेऽपि**"। पटत्वादिप्रकारक-प्रत्यक्षकाले बाधाभावादिबलाद्घटत्ववति घटत्वप्रकारकत्वादिरूपप्रामाण्यग्रहप्रसङ्गादिवारण-सम्भवेऽपीत्यर्थः। "**ज्ञानस्य**"। प्रामाण्याश्रयीभूतज्ञानस्य। "**स्ववृत्तिप्रामाण्य-विषयकत्वे**"। ज्ञानवृत्तिप्रामाण्यविषयकत्वे। "**लाघवादी**"ति। आदिना तदुपपादक-युक्तेः परिग्रहः। तथाच ज्ञानस्य स्ववृत्तिप्रामाण्यविषयकत्वे लाघवविरहात् प्रामाण्य विषयकत्वोपपादकयुक्त्यन्तरविरहाच्चेत्यर्थः। "**तदुपगमो**"—प्रामाण्यविषयकत्वोपगमो निर्युक्तिक इत्यर्थः।

गुरुमतं समर्थ्यते "**अथे**"त्यादिना। "**घटत्वप्रकारकत्वादिना प्रत्यक्ष**"मिति। अनुव्यवसायरूपमित्यर्थः। "**नैयायिकानामपी**"ति। अपिकारेण गुरूणां परिग्रहः। ननु ताद्दशप्रत्यक्षस्य उभयसम्मतत्वे न्यायमतगुरुमतयोः को विशेष इत्याह "**इयांस्त्वि**"ति। "**नैयायिकमत**" इति। प्रथमम् "अयं घट" इति प्रत्यक्षं व्यवसायरूपं, तदनन्तरं 'इदं घटत्वेन जानामी'ति मानसप्रत्यक्षमनुव्यवसायरूपमुत्पद्यत इत्यर्थः। "**गुरुमते त्वि**"ति। प्राथमिकप्रत्यक्षमेव 'इदं घटत्वेन जानामी'त्याकारकम् आत्मस्वात्मविषयभासकमित्यर्थः। प्राथमिकज्ञानस्य आत्मस्वात्मविषयावभासकत्वे युक्तिमाह "**तत्रे**"ति। "**तद्रूपत्वे**" ज्ञान-प्रकाशरूपत्वे। "**ज्ञानान्तरकल्पनप्रयुक्तलाघवस्य**"—ज्ञानान्तरकल्पनप्रतियोगिलाघवस्य। न्यायमते व्यवसायान्तरं ज्ञानावभासकोऽनुव्यवसायः कल्पनीयः, गुरुमते तु व्यवसायस्य स्वप्रकाशरूपतया न ज्ञानान्तरं कल्प्यमिति न्यायमतापेक्षया तत्र लाघवमित्यर्थः।

**तद्रूपत्वे ज्ञानान्तरकल्पनप्रयुक्तलाघवस्य स्वप्रकाशविचारे वक्ष्यमाणलाघवान्तरस्य च सत्त्वात् ॥१८॥**

**तथाविधव्यवसायस्य इदंविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वावगाहित्वं निष्प्रत्यूहमेव। एवं तादृशव्यवसायस्य इदमंशे घटत्वाद्यवगाहनं सर्ववादिसिद्धमेवेति किमवशिष्यते घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वादिप्रकारकत्वरूपप्रामाण्यावगाहने इति चेत् ॥१९॥**

**न, नहीदानीं वास्तवघटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारत्वादिरूपप्रामाण्यनिरूपितयथाकथञ्चिद्विषयताया एव तादृशप्रामाण्याश्रयग्रहत्व-**

---

"**स्वप्रकाशविचारे वक्ष्यमाणलाघवान्तरस्ये**"ति। ज्ञानस्य परप्रकाश्यत्वे ज्ञानप्रकाशकमनःसंयुक्तसमवायादिसन्निकर्षघटितसामग्र्यन्तरस्यावश्यकत्वात्, स्वप्रकाशमते चोभयमतसिद्धज्ञानोत्पादकसामग्र्या एव निर्वाहादिति स्वप्रकाशमते ज्ञानोत्पादकसामग्र्यतिरिक्तज्ञानग्राहकसामग्र्यकल्पनप्रयुक्तलाघवस्य च सत्त्वादित्यर्थः ॥१८॥

व्यवसायस्य इदं घटत्वेन जानामीत्याकारकत्वे तत्र प्रामाण्यावगाहित्वमपि अवश्यं स्वीकार्यमित्याह "**तथाविधे**"ति। "**निष्प्रत्यूहमेवे**"ति। तथाहि 'इदं घटत्वेन जानामी'त्यत्र इदमिति द्वितीयार्थो विशेष्यकत्वं तस्य च ज्ञाधात्वर्थे विशेषणत्वम्। "**घटत्वेने**"ति तृतीयार्थः प्रकारकत्वं, तदपि ज्ञाधात्वर्थे एव विशेषणम्। तथा च इदंविशेष्यकघटत्वप्रकारकज्ञानाश्रयोऽहमिति बोधः। 'अयं घट'श्चेति समूहालम्बनज्ञानेऽपि इदंविशेष्यकत्वं घटत्वप्रकारकत्वञ्च विद्येते इति तादृशसमूहालम्बनव्यावर्तनाय ज्ञाने विशेषणतापन्नयोः इदंविशेष्यकत्वघटत्वप्रकारकत्वयोः परस्परावच्छेद्यावच्छेदकभावः स्वीकार्यः, तथा च इदं घटत्वेन जानामीत्याकारकगुरुमतसिद्धव्यवसायस्य इदंविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वावगाहित्वं निराबाधमेवेति भावः। ननु तथापि तादृशज्ञाने इदंविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वावगाहित्वेऽपि घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रामाण्यानवगाहनात् कथमुक्तव्यवसायस्य प्रामाण्यावगाहित्वमित्यत आह "**एव**"मिति। "**सर्ववादिसिद्धमेवेती**"ति। तथाच व्यवसाये इदमंशे घटत्वभानाद् इदंविशेष्यकत्वं वस्तुतो घटत्ववद्विशेष्यकत्वमेवेति व्यवसाये वास्तविकघटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वमव्याहतमिति भावः ॥१६॥

यद्यपि 'इदं घटत्वेन जानामी'त्याद्याकारकज्ञाने वास्तवं यद् घटत्ववत् तद्विशेष्यकत्वावच्छिन्नं घटत्वप्रकारकत्वं तदवगाहते। परन्तु तादृशविशेष्यकत्वमिदंविशेष्यकत्वत्वेना-

**व्यापकत्वे विवदामहे, अपितु 'अयं घटः' 'अत्र घटत्वप्रकारकं ज्ञानमि'त्याकारकविशृङ्खलविषयिताशालिज्ञानव्यावृत्ताया 'घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्ववद् इदं ज्ञानम्' इत्याद्याकारकज्ञानीयविलक्षणविषयिताया एव तथात्वे। तथाविधप्रामाण्यग्रहस्यैव प्रवृत्त्याद्युपयुक्तत्वात्। एवञ्चोपदर्शितरीत्या**

---

वगाहते न तु घटत्ववद्विशेष्यकत्वत्वेन। यथा 'वह्निमत्त्वेन द्रव्यमहं जानामी'त्याकारकज्ञाने द्रव्यविशेष्यकत्वावच्छिन्नवह्निमत्त्वप्रकारकत्वमवगाहते, किन्तु तादृशद्रव्यविशेष्यकत्वस्य वस्तुतः पर्वतविशेष्यकत्वत्वेऽपि द्रव्यविशेष्यकत्वत्वेनैवावगाहते न तु पर्वतविशेष्यकत्वत्वेन, 'वह्निमत्त्वेन पर्वतमहं जानामी'त्याकारके च पर्वतविशेष्यकत्वत्वेन पर्वतविशेष्यत्वमवगाहते। तथा 'इदं घटत्वेन जानामी'त्याकारके इदंविशेष्यकत्वत्वेन वास्तवघटत्ववद्विशेष्यकत्वमगाहते, 'इदं ज्ञानं घटत्ववद्विशेष्यकं घटत्वप्रकारकमि'त्याकारके 'इदं ज्ञानं घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकमि'त्याकारके च घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वमवगाहते। अत्र च घटत्ववद्विशेष्यकत्वं घटत्ववद्विशेष्यकत्वत्वेनैवावगाहते, इति तादृशज्ञाने एव घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपविशिष्टप्रामाण्यविषयिता स्वीक्रियते, न तु इदंविशेष्यकत्वत्वेन इदंविशेष्यकत्वावगाहि 'इदं घटत्वेन जानामी'त्याकारके। तथा च 'अयं घट'इत्याकारकव्यवसायस्य गुरुमते घटत्वेन इदमहं जानामीत्याकारकानुव्यवसायरूपत्वेऽपि तत्र इदंविशेष्यकत्वस्य इदंविशेष्यकत्वत्वेनावगाहनाद् घटत्ववद्विशेष्यकत्वत्वेनानवगाहनेन घटत्ववद्विशेष्यकत्वत्वेन घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपविशिष्टप्रामाण्यं नावगाहत इति न तत्र विशिष्टप्रामाण्यविषयिता इत्याशयवद्भिर्नैयायिकैः शङ्क्यते "**नही**"त्यादि। "**विवदामह**" इति। प्रामाण्यं स्वविषयकग्रहप्रतिबन्धकाभावकालीनस्वाश्रयज्ञानत्वव्यापकविषयिताप्रतियोगि न वेति विप्रतिपत्तौ प्रामाण्यनिरूपितयत्किञ्चिद्विषयितायां तादृशग्रहत्वव्यापकत्वं नैयायिकानामपि सम्मतमिति नास्ति तत्र विवादः; परन्तु तादृशप्रामाण्यनिरूपितविशिष्टविषयिताया एव तादृशग्रहत्वव्यापकत्वं गुरूणामभिमतं, नैयायिकानान्तु तदभावोऽभिमत इति विवादः। 'अयं घटः' 'अत्र घटत्वप्रकारकं ज्ञान'मित्यादि ज्ञानानां प्रामाण्यनिरूपितविशिष्टविषयकत्वाभावं दर्शयितुमाह "**अयं घट**"इति। अयं घट इति व्यवसायस्य गुरुमते अनुव्यवसायरूपतया इदंविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वसत्त्वेऽपि न्यायमते तस्याभावादाह "**अत्रे**"ति। "**ज्ञानीये**"ति ज्ञाननिष्ठेत्यर्थः। "**विलक्षणविषयितायाः**"—प्रामाण्यनिरूपितविशिष्टविषयतायाः। "**तथात्व**"इति। विवदामह इति पूर्वेणान्वयः। एतादृशप्रामाण्यज्ञानस्य विवादास्पदत्वे हेतुमाह

प्रामाण्यघटकीभूतसकलपदार्थानां विशृङ्खलविषयित्वसिद्धावपि तादृशविलक्षण-विषयिता तथाविधव्यवसायेऽसिद्धैवेति ॥२०॥

अथ विशिष्टविषयितायास्तादृशग्रहत्वव्यापकतासिद्धिरेव गुरूणामुद्देश्या तदा प्रामाण्यपक्षकयावत्तदाश्रयग्राह्यत्वतदभावकोटिकमणिकाराद्युपदर्शित-विप्रतिपत्तौ प्रामाण्यस्य विशृङ्खलक्रमेण तदाश्रययावद्ग्राह्यतयार्थान्तर-प्रसङ्गो दुर्वारः। न च तादृशयावद्ग्रहवृत्तितथाविधविशिष्टविषयिता-प्रतियोगित्वकोटिकविप्रतिपत्तावेव मणिकारादीनां तात्पर्यमिति वाच्यम्। तादृशविधिकोटिः पक्षातिरिक्तेऽप्रसिद्धेरिति चेन्न, तादृशविषयितापक्षकतथा-विधयावद्ग्रहवृत्तित्वकोटिकविप्रतिपत्तावेव तेषां तात्पर्यात् ॥२१॥

---

"**प्रवृत्ताद्युपयुक्तत्वा**"दिति। निश्चितप्रामाण्यनिश्चयस्यैव प्रवर्तकत्वेन प्रामाण्यनिश्चया-भावे प्रवृत्तिरेव न भवितुमर्हतीत्याक्षेपे एव प्रामाण्यनिश्चयस्य परीक्ष्यमाणत्वादिति भावः। "**तादृशविलक्षणविषयिते**"ति। घटत्ववद्विशेष्यकत्ववत्त्वेन घटत्ववद्विशेष्यकत्वावच्छिन्न-घटत्वप्रकारकत्वरूपविशिष्टप्रामाण्यनिरूपितविषयितेत्यर्थः ॥२०॥

यदि प्रामाण्यनिरूपितविशिष्टविषयितायास्तादृशग्रहत्वव्यापकत्वसाधनं गुरूणामाकाङ्क्षितं तदा मणिकारीयविप्रतिपत्तिविरोधप्रसङ्ग इत्याह "**अथे**"ति। "**विप्रतिपत्ता**"विति। स्वाश्रयेण गृह्यत इति मणिकारीयचतुर्थविप्रतिपत्तावित्यर्थः। "**अर्थान्तरप्रसङ्ग**"इति। मणिकारीयतादृशविप्रतिपत्तौ स्वाश्रययावद्ग्राह्यत्वं विधिकोटिः। अत्र प्रामाण्यस्य विश्टङ्खलक्रमेण तदाश्रययावद्ग्राह्यत्वेऽपि विधिकोटिनिर्वाहः, परन्तु तेन न गुरूणामाकाङ्क्षित-सिद्धिस्तेषां विशिष्टविषयितायास्तादृशग्रहत्वव्यापकतासाधनस्यैवाकाङ्क्षितत्वादित्यनाकाङ्क्षि-ताभिधानरूपार्थान्तरप्रसङ्ग इति भावः। "**तादृशयावद्ग्रहे**"ति। प्रामाण्याश्रययावद्-ग्रहेत्यर्थः। तथाच प्रामाण्यं प्रामाण्याश्रययावद्ग्रहवृत्तितद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्व-रूपप्रामाण्यनिरूपितविशिष्टविषयताप्रतियोगि न वेति विप्रतिपत्तौ मणिकारादीनां तात्पर्य-मित्यर्थः। "**तादृशविधिकोटि**"रिति। प्रामाण्याश्रययावद्ग्रहवृत्तितद्वद्विशेष्यकत्वावच्छिन्न-तत्प्रकारकत्वरूपभावकोटिरित्यर्थः। "**पक्षातिरिक्ते**"ति। पक्षः विप्रतिपत्तिधर्मी। तथाच प्रामाण्यनिरूपितविशिष्टविषयताप्रतियोगित्वं प्रामाण्यमात्रे एव विद्यते न त्वन्यत्र। एवञ्च पक्षभिन्ने दृष्टान्तादौ साध्यस्यासत्त्वेन व्याप्तिग्रहासम्भवात् तादृशसाध्यस्य साधनानर्हत्वादिति भावः। "**तादृशविषयितापक्षके**"ति। तादृशविषयिताधर्मिक इत्यर्थः। तथाच तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपप्रामाण्यनिरूपितविशिष्टविषयिता तादृशप्रामाण्या-

**अत्राहुः—प्रामाण्यस्य परतोग्राह्यत्वेऽनवस्थानादन्यथानुपपत्तिसिद्धमेव तस्य स्वतोग्राह्यत्वम्। तथाहि अप्रामाण्यज्ञानास्कन्दितज्ञानात् प्रवृत्त्यादिकार्यानुत्पत्त्या गृहीतप्रामाण्यकज्ञानत्वेनैव प्रवृत्त्यादिहेतुत्वमुपगन्तव्यम्** ॥२२॥

---

श्रययावद्दृत्तिर्न वेति विप्रतिपत्तौ तात्पर्यमित्यर्थः। तत्र च घटत्ववद्विशेष्यकत्वावच्छिन्न-घटत्वप्रकारकत्वरूपप्रामाण्याश्रययावद्वृत्तित्वरूपविधिकोटिर्घटत्वविषयितायां सौलभ्यात् तादृशघटत्वविषयिताया दृष्टान्तत्वसम्भवात्, तस्य च प्रामाण्यनिरूपितविशिष्टविषयितायां साधनसम्भव इति भावः ॥२१॥

"**अत्राहु**"रिति। 'अत्र' इत्यस्य ज्ञानस्य स्ववृत्तिप्रामाण्यविषयकत्वे लाघवादि-विरहात्तदुपगमो निरर्थक इति पूर्वपक्ष इत्यर्थः। "आहु"रिति प्राभाकरा इति शेषः। "**अनवस्थाना**"दिति। तथाच प्रामाण्यं न परतोग्राह्यमनवस्थानादित्यनुमानेन प्रामाण्यस्य परतोग्राह्यत्वाभावनिश्चय इति भावः। "**अन्यथानुपपत्तिसिद्ध**"मिति। पूर्वानुमानेन प्रामाण्यस्य परतोग्राह्यत्वाभावनिश्चये सति परतोग्राह्यत्वाभाववतः प्रामाण्यस्य स्वतोग्राह्यत्वं विना ग्राह्यत्वमनुपपन्नमित्यनुपपत्तिप्रमाणादेव परतोग्राह्यत्वाभाववतः प्रामाण्यस्य स्वतोग्राह्यत्व-मवधार्यत इत्यर्थः।

ननु न्यायमतेऽनुपपत्तेः प्रमाणत्वाभावादनुपपत्त्या नैयायिकान्प्रति प्रामाण्यस्य स्वतस्त्वं साधयितुं न शक्यत इति चेन्न, न्यायमतेऽनुपपत्तेरनुमानान्तर्भावाद-नुमित्या एव स्वतोग्राह्यत्वं साध्यते। तथाहि—प्रामाण्यं स्वतोग्राह्यं परतो-ग्राह्यत्वाभाववत्त्वे सति ग्राह्यत्वादित्यनुमानमेव नैयायिकान् प्रति स्वतो ग्राह्यत्वे प्रमाणं भवितुमर्हतीति प्राभाकराणामाशय इति ध्येयम्। प्रामाण्यस्य परतोग्राह्यत्वेऽनवस्थानं दर्शयति "**तथाही**"त्यादिना। "**गृहीतप्रामाण्यकज्ञानत्वेनैव प्रवृत्त्यादिहेतुत्व-मुपगन्तव्य**"मिति। प्रवृत्तिं प्रति इष्टसाधनताज्ञानं कारणम्। तथा च यस्मिन् वस्तुनि सुखसाधनत्वं, सुखसाधनसाधनत्वं, दुःखाभावसाधनत्वं वा ज्ञायते तस्मिन् वस्तुनि प्रवृत्तिरुत्पद्यत इत्यनुभवसिद्धम्। यथा 'भोजनं तृप्तिरूपसुखसाधन'मिति सुखसाधनत्वस्य, अन्नं तृप्तिसाधनभोजनसाधनमिति सुखसाधनसाधनत्वस्य, रुग्णस्य भेषजं रोगाभावसाधनमिति दुःखाभावसाधनत्वस्य च ज्ञानात् प्रवृत्तिर्भवेत्। परन्तु उक्तज्ञाने यदि अप्रामाण्यं ज्ञायते तदा प्रवृत्तिर्न भवेदिति निश्चितप्रामाण्यकमेवेष्टसाधनताज्ञानं प्रवर्तकं वाच्यम्। नचाप्रामाण्य-ज्ञानात् प्रवृत्तिर्न भवतीति अप्रामाण्यज्ञानस्य प्रवृत्तिप्रतिबन्धकत्वमेवायाति, न तु प्रामाण्यज्ञानस्य प्रवर्तकत्वमिति वाच्यम्। यस्य संशयव्यतिरेकनिश्चयौ यस्य प्रतिबन्धकौ

**एवं प्रामाण्यग्रहस्याप्यप्रामाण्यज्ञानास्कन्दितस्याकिञ्चित्करतया तत्रापि गृहीतप्रामाण्यकत्वमवश्यं निवेशनीयम्। एवं तादृशप्रामाण्यग्रहादावपि गृहीतप्रामाण्यकत्वं निवेश्यम्।**

---

तत् तन्निश्चयापेक्षमिति व्याप्त्या प्रामाण्यनिश्चयस्य प्रवर्तकतासिद्धेः। तथाहि इष्टसाधनताज्ञानधर्मिकप्रामाण्यसंशये प्रामाण्यव्यतिरेकनिश्चये वा न प्रवृत्तिर्भवेत्; अतः प्रवृत्तिं प्रति प्रामाण्यसंशयस्य प्रामाण्यव्यतिरेकनिश्चयस्य च प्रतिबन्धकत्वात् प्रामाण्यनिश्चयः प्रवर्तकः। तथा च प्रवृत्तिः प्रामाण्यनिश्चयापेक्षा प्रामाण्यसंशयप्रतिबध्यत्वे सति प्रामाण्यव्यतिरेकनिश्चयप्रतिबध्यत्वादनुमितौ व्याप्तिनिश्चयवदित्यनुमानेन प्रामाण्यनिश्चयस्य प्रवर्तकत्वसिद्धिः। गृहीतप्रामाण्यकेष्टसाधनताज्ञानस्य प्रवृत्तिजनकत्वे प्रामाण्यनिश्चयस्य जनकतावच्छेदकत्वादपेक्षणीयत्वसिद्धेः। यद्यपि इष्टसाधनताज्ञानधर्मिकप्रामाण्यनिश्चयस्य स्वतन्त्रकारणत्वेऽपि प्रवृत्तावपेक्षितत्वसिद्धिस्तथापि तस्य स्वातन्त्र्येण कारणत्वे इष्टसाधनताज्ञानस्य इष्टसाधनताज्ञानधर्मिकप्रामाण्यनिश्चयस्य च कारणताद्वयकल्पनेन गौरवात्। प्रामाण्यनिश्चयविशिष्टेष्टसाधनताज्ञानस्य कारणत्वे तु विशिष्टस्य एककारणत्वकल्पनाल्लाघवमिति भावः।

वस्तुतस्तु प्रामाण्यनिश्चयविशिष्टस्य इष्टसाधनताज्ञानस्य इष्टसाधनताज्ञानविशिष्टस्य प्रामाण्यनिश्चयस्य वा कारणत्वमित्यत्र विनिगमनाविरहेण गुरुतरकारणताद्वयकल्पनप्रयुक्तगौरवमिति तदपेक्षया प्रामाण्यनिश्चयत्वेनैककारणत्वमिष्टसाधनतानिश्चयत्वेन चापरमिति रीत्या लघुरूपेण कारणत्वद्वयकल्पनमेवोचितमिति ध्येयम् ॥२२॥

"**एवं प्रामाण्ये**"त्यादि। "**एव**"-गृहीतप्रामाण्यकनिश्चयत्वेन हेतुतासिद्धौ। "**प्रामाण्यग्रहस्यापि**" इष्टसाधनताज्ञानधर्मिकप्रामाण्यग्रहस्यापि। "**अप्रामाण्यज्ञानास्कन्दितस्ये**"ति। अप्रामाण्यज्ञानविशिष्टस्येष्टसाधनताज्ञानधर्मिकप्रामाण्यनिश्चयस्येत्यर्थः। "**अकिञ्चित्करतये**"ति। प्रवृत्तिजनकतानवच्छेदकतयेत्यर्थः। इष्टसाधनताज्ञानधर्मिकप्रामाण्यनिश्चये यदि अप्रामाण्यज्ञानं भवेत् तदा इष्टसाधनताज्ञानेऽपि अप्रामाण्यग्रहो भवेत्। प्रामाण्यज्ञानधर्मिकाप्रामाण्यज्ञानस्य प्रामाण्यज्ञानविषयेऽप्रमाण्यग्राहकत्वात्। अतोऽप्रामाण्यज्ञानास्कन्दितस्य प्रामाण्यनिश्चयस्य प्रवृत्तिजनकतानवच्छेदकत्वमिति भावः।

"**तत्रापि**"। प्रवृत्तिजनकतावच्छेदकप्रामाण्यनिश्चयेऽपि। "**गृहीतप्रामाण्यकत्वं**"। निश्चितप्रामाण्यकत्वम्। "**निवेशनीय**"मिति। प्रवृत्तिजनकतावच्छेदकतावच्छेदकतया विवक्षणीयमित्यर्थः। "**एवं तादृशप्रामाण्यग्रहादावपी**"ति। प्रवृत्तिजनकतावच्छेदक-

**एवञ्च परतःप्रामाण्यग्रहपक्षे प्रवृत्त्यादिजनकज्ञानेऽनुमानाद्यधीनप्रामाण्यग्रहोऽपेक्षणीयः, एवं तत्रापि तथाविधप्रामाण्यग्रहान्तरमपेक्षणीयमिति क्रमेणानवस्थितप्रामाण्यग्रहधाराया अपेक्षितत्वात् कदापि प्रवृत्त्यादिकं कार्यं नोत्पद्यते। मन्मते तु प्रवृत्त्यादिजनकज्ञानस्यैव स्वीयप्रामाण्यादिविषयकतया न प्रामाण्यग्रहान्तरापेक्षा ॥२३॥**

**न च प्रामाण्यग्रहान्तरानपेक्षणेऽपि विषयानवस्थितिः स्वतस्त्वमते दुर्वारैव। तन्मते 'अयं घट' इत्याद्याकारकज्ञानस्यैव घटत्वतत्प्रामाण्यादि-**

---

तावच्छेदके प्रामाण्यग्रहेऽपि। "**निवेश्य**"मिति। गृहीतप्रामाण्यकत्वं प्रवृत्तिजनकतावच्छेदकतावच्छेदकतया वक्तव्यमित्यर्थः।

प्रामाण्यस्य परतोग्राह्यत्वेऽनवस्थां सङ्गमयति "**एवञ्चेति**"। "एवञ्च" प्रवृत्त्यादिकारणज्ञाने तत्कारणतावच्छेदकीभूतप्रामाण्यग्रहादौ गृहीतप्रामाण्यकत्वनिवेशे चेत्यर्थः। "**अपेक्षणीयः**"। प्रवृत्तिजनकतावच्छेदकतया अपेक्षणीय इत्यर्थः। "**एवं तत्रापि**"। प्रवृत्तिजनकतावच्छेदकीभूतप्रामाण्यग्रहेऽपि। "**तथाविधप्रामाण्यग्रहान्तरम्**"। अनुमानाद्यधीनप्रामाण्यग्रहधर्मिकप्रामाण्यग्रहान्तरम्। अनवस्थितप्रामाण्यग्रहधाराया अपेक्षितत्वे दोषमाह "**कदापी**"ति। अनन्तप्रामाण्यग्रहाणां कदाप्यसम्भवात् प्रवृत्त्यादिकार्यमपि कदापि नोत्पद्यत इत्यर्थः। प्रामाण्यस्य स्वतस्त्वेऽनवस्थां वारयति "**मन्मते त्वि**"ति। प्रामाण्यस्य स्वतस्त्वे प्रवृत्तिजनकज्ञाने गृह्यमाणे तदीयप्रामाण्यमपि गृहीतं भवेत् तादृशप्रामाण्ये च गृह्यमाणे तदीयप्रामाण्यमपीत्यादिरीत्या एकज्ञानस्यानन्तप्रामाण्यावगाहित्वेन न प्रामाण्यग्रहाणामनवस्थेति भावः ॥२३॥

शङ्कते—"**नचे**"ति। "**प्रामाण्यग्रहान्तरानपेक्षणेऽपी**"ति। प्रामाण्यस्य स्वतोग्राह्यत्वमते गृहीतप्रामाण्यकनिश्चयत्वेन प्रवर्तकतया प्रवर्तकप्रामाण्यज्ञानेऽप्यपरप्रामाण्यग्रहापेक्षा एवं तादृशप्रामाण्यज्ञानेऽपि प्रामाण्यग्रहान्तरापेक्षेत्यादिरीत्या परतोग्राह्यत्ववदनवस्थाविरहेऽपीत्यर्थः। "**विषयानवस्थितिरि**"ति। एकज्ञानस्य तादृशानन्तप्रामाण्यविषयकत्वे तादृशज्ञानस्य विषयकल्पनाऽविश्रान्तिः। विषयानवस्थितिमेव विवृणोति "**तन्मत**"इति। गुरुमत इत्यर्थः। ज्ञानस्य प्रामाण्यधारावगाहित्वोपगमे 'अयं घट' इति ज्ञानस्य घटविषयकत्वेन घटत्ववति घटत्वप्रकारकत्वरूपघटत्वप्रामाण्यावगाहित्वम्, घटत्वप्रामाण्यावगाहित्वेन तादृशप्रामाण्यवति तादृशप्रामाण्यप्रकारकत्वरूपप्रामाण्यप्रामाण्यावगाहित्वम्, एवं तादृशप्रामाण्यप्रामाण्यावगाहित्वेन तादृशप्रामाण्यप्रामाण्यप्रामाण्याव-

घटितप्रामाण्यधारावगाहित्वस्य स्वीकरणीयत्वात्। तत्तत्प्रामाण्यघटितप्रामाण्यावगाहित्वानभ्युपगमे गृहीतप्रामाण्यकप्रामाण्यज्ञानविरहेण प्रवृत्त्याद्यनुदयापत्तेरिति वाच्यम्। एकज्ञानस्य प्रामाणिकप्रामाण्यधारावगाहित्वोपगमे क्षतिविरहात् ॥२४॥

एवं परतःपक्षे प्रवर्तकज्ञानादौ आनुमानिक एव प्रामाण्यग्रहो वाच्यः। तत्र च गृहीतप्रामाण्यकलिङ्गादिज्ञानमपेक्षितम्, तत्र प्रामाण्यग्रहोऽपि गृहीतप्रामाण्यकलिङ्गादिज्ञानान्तरादित्येवंरीत्याऽनवस्थितलिङ्गादिज्ञानतत्प्रामाण्यग्रहधारापेक्षणेन प्रवृत्त्यादिकार्यानुत्पत्तिरपि दुर्वारैव ॥२५॥

अथ स्यादेवं यदि गृहीतप्रामाण्यकज्ञानत्वेन प्रवृत्त्यादिहेतुता स्यात्, तदेव न। अप्रामाण्यज्ञानास्कन्दितज्ञानात् प्रवृत्त्यादिवारणाय अप्रामाण्यज्ञानाभावविशिष्टज्ञानत्वेनैव तद्धेतुत्वोपगमात्।

---

गाहित्वमितिरीत्या घटत्वतत्प्रामाण्यतत्प्रामाण्यादिघटितानन्तप्रामाण्यावगाहित्वस्य स्वीकरणीयत्वाद् विषयानवस्थितिर्दुर्वारैवेत्यर्थः। ज्ञानस्य तादृशानन्तप्रामाण्यविषयकत्वानभ्युपगमे दोषमाह "**गृहीतप्रामाण्यके**"ति। तथाच अनन्तप्रामाण्यधारावगाहित्वानभ्युपगमे प्रवृत्त्याद्यनुदयप्रसङ्गः। तदभ्युपगमे च विषयानवस्थितिर्दुर्वारेति शङ्काकर्तुराशयः।

समाधत्ते—"**एकज्ञानस्ये**"ति। "**प्रामाणिके**"ति। यद्यत्प्रामाण्यविषयकं ज्ञानं प्रवृत्त्यादौ यथा कथञ्चिदपेक्षणीयं तत्तत्प्रामाण्यमित्यर्थः। अयमाशयः। प्रथमद्वितीयादिप्रामाण्यज्ञानस्यैव प्रवर्तकत्वमनुभूयते, न तु तत्तदूर्ध्वं यावत्प्रामाण्यज्ञानमिति प्रवर्तकत्वेनानुभूयमानप्रामाण्यावगाहित्वोपगमान्न विषयानवस्थितिरिति ॥२४॥

परतःपक्षे दोषान्तरमाह "**एवं परतःपक्ष**"इति। "**आनुमानिक एवे**"ति। न्यायमते प्रामाण्यस्येन्द्रियायोग्यत्वेनेत्यादिः। "**तत्र चे**"ति। प्रवर्तकज्ञानधर्मिकानुमानिकप्रामाण्यग्रहे चेत्यर्थः। "**अपेक्षित**"मिति। व्याप्तिप्रकारकलिङ्गज्ञानेऽप्रामाण्यग्रहेऽनुमितिर्नोत्पद्यत इति गृहीतप्रामाण्यकव्याप्तिप्रकारकमेव लिङ्गज्ञानमनुमापकमिति भावः। "**तत्र**"—लिङ्गादिज्ञानधर्मिकप्रामाण्यज्ञाने। "**प्रवृत्त्यादिकार्यानुत्पत्तिरपि दुर्वारैवे**"ति। इदमुपलक्षणम्। प्रामाण्यस्य परतोग्राह्यत्वे गृहीतप्रामाण्यकलिङ्गादिज्ञानस्यानुमितिहेतुत्वेन लिङ्गादिज्ञानस्य प्रामाण्यानुमानार्थं गृहीतप्रामाण्यकलिङ्गान्तरज्ञानमपेक्षितं तादृशलिङ्गान्तरज्ञाने च प्रामाण्यानुमापकं गृहीतप्रामाण्यकापरलिङ्गज्ञानमेवं क्रमेणानवस्थानादनुमितिमात्रस्यैवोच्छेदप्रसङ्गो बोध्यः ॥२५॥

**प्रामाण्यग्रहवैशिष्ट्यनिवेशापेक्षया अप्रामाण्यग्रहाभाववैशिष्ट्यनिवेशे गौरवमिति तु न वाच्यम्। यतः सन्दिह्यमानप्रामाण्यकनिश्चयात् तत्तत्-कार्यविशेषापत्तिवारणाय निश्चितप्रामाण्यकत्वमेव भवता निवेशनीयम्। मम तु संशयसाधारणाप्रामाण्यग्रहत्वावच्छिन्नाभावस्य निवेश इति निश्चयत्वा-निवेशे लाघवमिति चेत् ॥२६॥**

---

परतस्त्ववादी शङ्कते "**अथे**"ति। "**एवं**" पूर्वोक्तप्रकारेणानवस्थादिदोषः। "**तदेव**" गृहीतप्रामाण्यकेष्टसाधनताज्ञानत्वेन प्रवृत्त्यादिहेतुतैव। "**न**" इत्यनन्तरं स्यादित्यस्यान्वयः। "**तद्धेतुत्वोपगमा**"दिति। इष्टसाधनताज्ञानं प्रवृत्तिजनकमिति सर्ववादिसिद्धम्, अपि तु इष्टसाधनताज्ञानसत्त्वेऽपि यदि तादृशज्ञानधर्मिकमप्रामाण्यज्ञानं जायते तदा प्रवृत्तिर्नोत्-पद्यत इत्यपि सर्वेषामनुमतम्। तत्र सामग्रीसत्त्वे यत्सत्त्वे कार्यं नोत्पद्यते तस्य प्रतिबन्धकत्वं स्वीक्रियते। दृश्यते तु इष्टसाधनताज्ञानादिघटितप्रवृत्तिसामग्रीसत्त्वेऽपि इष्टसाधनताज्ञानधर्मिकाप्रामाण्यज्ञानसत्त्वे प्रवृत्तिर्नोत्पद्यत इति प्रवृत्तिं प्रति इष्टसाधनता-ज्ञानधर्मिकाप्रामाण्यज्ञानं प्रतिबन्धकं वाच्यम्। प्रतिबन्धकाभावविशिष्टस्यैव कारणस्य कार्योत्पादकतया अप्रामाण्यज्ञानाभावविशिष्टेष्टसाधनताज्ञानत्वेन हेतुत्वं कल्पनीयम्। न तु गृहीतप्रामाण्यकेष्टसाधनताज्ञानत्वेन कारणत्वसिद्धिरित्याशयः। वस्तुतस्तु अत्रापि अप्रामाण्य-ज्ञानाभावविशिष्टेष्टसाधनताज्ञानत्वेन कारणत्वम्, इष्टसाधनताज्ञानविशिष्टाप्रामाण्यज्ञाना-भावत्वेन वा इत्यत्र विनिगमनाविरहेण गुरुतरकारणताद्वयकल्पनापत्तिस्तदपेक्षया इष्टसाधनताज्ञानत्वेन एकं कारणत्वम्, अप्रामाण्यज्ञानाभावत्वेन चापरं कारणत्वमिति लघुरूपेण कारणताद्वयकल्पनमेवोचितमिति विभावनीयम्।

कारणतावच्छेदककोटौ अप्रामाण्यग्रहाभाववैशिष्ट्यनिवेशापेक्षया प्रामाण्यग्रहवैशिष्ट्य-निवेशे लाघवमिति लाघवानुगृहीतान्वयव्यतिरेकबलात् प्रामाण्यग्रहविशिष्टेष्टसाधनता-ज्ञानत्वेनैव हेतुता स्यादित्याशङ्कते "**प्रामाण्यग्रहे**"ति। "**गौरव**"मिति। अप्रामाण्य-ग्रहाभाववैशिष्ट्यस्य अभावद्वयघटितत्वेन गौरवं बोध्यम्।

इष्टसाधनताज्ञानधर्मिकप्रामाण्यसंशयात् प्रवृत्तिर्नोत्पद्यत इति प्रामाण्यग्रहस्य प्रवृत्ति-जनकतावच्छेदकत्ववादिनां मते प्रामाण्यनिश्चयस्यैव प्रवृत्तिजनकतावच्छेदकत्वं वाच्यम्, निश्चयत्वञ्च संशयान्यज्ञानत्वम्, संशयत्वञ्चैकधर्मिकविरुद्धोभयप्रकारकज्ञानत्वम्। तथाचैतादृश-संशयान्यज्ञानस्य प्रवृत्तिहेतुतावच्छेदकत्वापेक्षया अप्रामाण्यज्ञानाभावस्य कारणतावच्छेदकत्वे निश्चयत्वानिवेशेन लाघवात्। अप्रामाण्यज्ञानाभावस्य प्रवृत्तिजनकतावच्छेदकत्वे तु

**न, अगृहीताप्रामाण्यकनिश्चयत्वेन हेतुतामते प्रमात्वाभावग्रहकाले भ्रमत्वग्रहकाले च तत्तत्कार्यवारणाय प्रमात्वाभावभ्रमत्वरूपद्विविधाप्रामाण्यग्रहाभावौ कारणतावच्छेदककोटौ निवेशनीयौ तदपेक्षया च एकविधप्रामाण्यग्रहस्यैवावच्छेदकत्वमुचितम् ॥२७॥**

---

प्रामाण्यसंशयस्यापि अप्रामाण्यज्ञानरूपतया इष्टसाधनताज्ञानधर्मिकप्रामाण्यसंशयदशायामप्रामाण्यज्ञानाभावविशिष्टेष्टसाधनताज्ञानाभावान्न प्रवृत्तिरुत्पद्यत इति न तत्र निश्चयत्वनिवेशापेक्षा इत्याशयेन परिहरति "**यत**"इति। "**सन्दिह्यमानप्रामाण्यकनिश्चया**"दिति। प्रामाण्यसन्देहविशिष्टेष्टसाधनतानिश्चयात्। "**तत्तत्कार्यविशेषापत्तिवारणाये**"ति। निष्कम्पप्रवृत्त्यापत्तिवारणायेत्यर्थः। प्रवृत्तिश्च द्विविधा सकम्पप्रवृत्तिः निष्कम्पप्रवृत्तिश्च। तत्र सकम्पप्रवृत्तिः संशयात्मकेष्टसाधनताज्ञानादपि। निष्कम्पप्रवृत्तिश्च इष्टसाधनतानिश्चयादेव। इष्टसाधनतानिश्चयधर्मिकप्रामाण्यसंशये तु इष्टसाधनतायाः सन्देहो भवेत्। निश्चयधर्मिकप्रामाण्यसंशयस्य विषयसन्देहजनकत्वनियमात्। तथा चेष्टसाधनतानिश्चयधर्मिकप्रामाण्यसंशये सति इष्टसाधनतासन्देहेन सकम्पप्रवृत्तेर्बाधकाभावादिष्टापत्तिवारणाय 'कार्यविशेष' इत्युक्तम्। तथाच कार्यविशेषपदस्य निष्कम्पप्रवृत्तिपरतया नेष्टापत्तिः। "**भवते**"ति। प्रामाण्यग्रहस्य प्रवृत्तिजनकतावच्छेदकत्ववादिना। "**मम त्वि**"ति। अप्रामाण्यग्रहाभावस्य कारणतावच्छेदकत्ववादिनो ममेत्यर्थः। लाघवमित्यनेनान्वयः ॥२६॥

अप्रामाण्यं द्विविधं भ्रमत्वं प्रमात्वाभावश्च। अप्रामाण्यज्ञानाभावस्य कारणतावच्छेदकत्वे द्विविधाप्रामाण्यग्रहाभावस्य कारणतावच्छेदककोटौ निवेशेन गौरवमित्याशयेन अप्रामाण्यग्रहाभावस्य कारणतावच्छेदकत्वमतं दूषयितुमाह "**न, अगृहीताप्रामाण्यके**"-ति। अप्रामाण्यस्य द्वैविध्येऽपि यत्किञ्चिदेकविधाप्रामाण्यग्रहाभाव एव प्रवृत्तिकारणतावच्छेदककोटौ निवेश्य इति न पूर्वोक्तगौरवमित्यतो द्विविधाप्रामाण्यग्रहाभावनिवेशप्रयोजनं दर्शयति "**प्रमात्वाभावग्रहकाल**" इत्यादि। "**तत्तत्कार्यवारणाये**"ति। प्रवृत्त्यादिरूपकार्यवारणायेत्यर्थः। इष्टसाधनताज्ञानधर्मिकप्रमात्वाभावग्रहकाले प्रवृत्तिवारणाय प्रमात्वाभावग्रहाभावस्य कारणतावच्छेदकत्वम्। इष्टसाधनताज्ञानधर्मिकभ्रमत्वग्रहकाले प्रवृत्तिवारणाय भ्रमत्वग्रहाभावस्य कारणतावच्छेदकत्वमवश्यं वाच्यम्। तथा च द्विविधाप्रामाण्यग्रहाभावस्य कारणतावच्छेदकत्वापेक्षया एकविधप्रामाण्यग्रहस्य कारणतावच्छेदकत्वं युक्तमिति भावः ॥२७॥

ननु अप्रामाण्यं यथा द्विविधं तथा प्रामाण्यमपि, तद्वति तत्प्रकारकत्वरूपं भ्रमत्वाभाव-

**न चैतन्मतेऽपि तद्वति तत्प्रकारकत्वरूपस्य भ्रमत्वाभावरूपस्य वा प्रामाण्यस्य ग्रहोऽवच्छेदक इत्यत्र विनिगमकाभावाद् द्विविधप्रामाण्यग्रहस्यैव तथात्वमित्याशङ्का ।**

**तदभाववति तत्प्रकारकत्वरूपस्य विशेष्यावृत्तिप्रकारकत्वादिरूपस्य च भ्रमत्वस्याभावापेक्षया तद्वति तत्प्रकारकत्वस्य लघुशरीरताया एव विनिगमकत्वात् ॥२८॥**

---

रूपञ्च द्विविधम् । तथा च विनिगमनाविरहेण द्विविधप्रामाण्यज्ञानमेव प्रामाण्यग्रहस्य कारणतावच्छेदकत्ववादिना निवेश्यमिति नैतन्मतेऽपि लाघवमित्याशङ्कते "**नचे**"ति । "**एतन्मतेऽपी**"ति । प्रामाण्यग्रहस्य कारणतावच्छेदकत्ववादिनां गुरूणां मतेऽपीत्यर्थः । "**विनिगमकाभावा**"दिति । तथाच तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपप्रामाण्य-ग्रहस्य तदभाववद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपभ्रमत्वाभावात्मकप्रामाण्यग्रहस्य वा प्रवृत्तिजनकतावच्छेदकत्वमित्यत्र विनिगमनाभावेन उभयविधस्यैव प्रामाण्यग्रहस्य कारणता-वच्छेदकत्वेन लाघवानवकाशादिति भावः ।

विनिगमनां प्रदर्श्य पूर्वोक्तामाशङ्कां निरस्यति "**तदभाववती**"ति । "**विनिगम-कत्वा**"दिति । यद्यपि तदभाववति तत्प्रकारकत्वरूपभ्रमत्वाभावोऽपि प्रामाण्यम्, तथापि तादृशप्रामाण्यं न प्रवृत्तिजनकतावच्छेदककोटौ प्रवेशनीयम्, अभावद्वयघटिततया तद्वति तत्-प्रकारकत्वापेक्षया गुरुशरीरत्वात् । एवं विशेष्यावृत्तिप्रकारकत्वरूपभ्रमत्वाभावात्मकं प्रामाण्यमपि तद्वति तत्प्रकारकत्वापेक्षया गुरुत्वान्न प्रवृत्तिजनकतावच्छेदककोटौ प्रवेशनीयम् । एवं भ्रमत्वमपि बहुविधम्, तदभाववति तत्प्रकारकत्वं तद्वद्भेदवति तत्प्रकारकत्वं विशेष्या-वृत्तिप्रकारकत्वादिकञ्च । विनिगमनाविरहात् तत्तद्भ्रमत्वाभावकूटानामेव कारणतावच्छेदक-कोटौ निवेश्यतया तदपेक्षया तद्वति तत्प्रकारकत्वरूपैकविधप्रामाण्यस्य कारणतावच्छेदककुक्षौ निवेशेनापि लाघवमिति भावः ।

न च तद्वति तत्प्रकारकत्वस्य लघुशरीरतयैव अप्रामाण्यग्रहाभावस्य जनकतावच्छेदकत्व-मतेऽपि तादृशप्रामाण्याभावात्मकाप्रामाण्यज्ञानाभावो जनकतावच्छेदको वाच्यः । न तु तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यग्रहाभावो गौरवादिति न पूर्वोक्तद्विविधाप्रामाण्य-ग्रहाभावनिवेशकृतगौरवमिति वाच्यम् । तद्वति तत्प्रकारकत्वाभावरूपाप्रामाण्यापेक्षया तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यस्य समानपदार्थघटिततया गुरुत्वाभावेन विनिगमना-भावादुभयविधाप्रामाण्यग्रहाभावस्य कारणतावच्छेदकत्वौचित्यात् । प्रामाण्यज्ञानस्य कारण-

**एतेन तद्वति तत्प्रकारकत्वरूपस्य भ्रमत्वाभावरूपस्य वा प्रामाण्यस्य स्वतस्त्वं स्वीक्रियत इत्यत्र विनिगमकाभाव इत्यपि निरस्तम्। तद्वति तत्प्रकारकत्वस्य प्रवृत्त्याद्युपयोगितायां एव विनिगमकत्वात् ॥२९॥**

**न च भ्रमत्वप्रमात्वोभयकोटिकसंशयकाले प्रमात्वतदभावकोटिकसंशयकाले च प्रवृत्त्यादिवारणाय भ्रमत्वाप्रकारकत्वे सति प्रमात्वाभावाप्रकारकं यत्प्रमात्वज्ञानं तद्विशिष्टत्वमेव गृहीतप्रामाण्यकज्ञानहेतुतावादिना निवेश-**

---

तावच्छेदकत्वे च तद्वति तत्प्रकारकत्वरूपप्रामाण्यापेक्षया भ्रमत्वाभावात्मकस्य तदभाववति तत्प्रकारकत्वाभावरूपस्य प्रामाण्यस्य तद्वति तत्प्रकारकत्वरूपप्रामाण्याघटकाभावद्वयघटितत्वेन तस्य गुरुशरीरतया तद्वति तत्प्रकारकत्वरूपप्रामाण्यमेव कारणतावच्छेदककुक्षौ निवेशे लाघवमिति हृदयम् ॥२८॥

ननु तद्वति तत्प्रकारकत्वात्मकस्य प्रामाण्यस्य स्वतस्त्वं भ्रमत्वाभावात्मकस्य वा प्रामाण्यस्येत्यत्र विनिगमकाभावेनोभयस्यैव स्वतस्त्वं गुरुभिः साध्यते इत्यवगम्यते; एवञ्च गुरुमते 'भ्रमत्वस्यातीन्द्रियतया तदभावस्याप्यतीन्द्रियत्व'मिति सिद्धान्तविरोधः स्यादित्यत आह "**एतेने**"ति। वक्ष्यमाणविनिगमकत्वेनेत्यर्थः, निरस्तमित्यनेनान्वयः। विनिगमनां दर्शयति "**तद्वती**"ति। "**विनिगमकत्वा**"दिति। तथाच लाघवात् तद्वति तत्प्रकारकत्वरूपप्रामाण्यस्य प्रवृत्त्याद्युपयोगितया प्रवृत्त्याद्युपयोगिप्रामाण्यस्य स्वतस्त्वविप्रतिपत्तिविषयतया तादृशप्रामाण्यस्यैव स्वतस्त्वं गुरुभिर्विचार्यत इति भावः ॥२६॥

शङ्कते "**नचे**"ति। वाच्यमित्यनेनान्वयः। "**भ्रमत्वप्रमात्वोभयकोटिकसंशयकाल**"इति। इष्टसाधनताज्ञानधर्मिकेत्यादिः। तथा चेष्टसाधनताज्ञाने इदं ज्ञानं भ्रमो वा प्रमा वेत्याकारकभावमात्रकोटिकसंशयकाले प्रवृत्तिवारणाय भ्रमत्वाप्रकारकं यत्प्रमात्वज्ञानं तदेव प्रवृत्तिजनकतावच्छेदकं वाच्यम्। "**प्रमात्वतदभावकोटिकसंशयकाले**" इति। इष्टसाधनताज्ञानधर्मिकेत्यादिः। तथाचेष्टसाधनताज्ञानधर्मिकेदं ज्ञानं प्रमा न वेति संशयकाले प्रवृत्तिवारणाय प्रमात्वाभावाप्रकारकत्वमपि प्रवृत्तिजनकतावच्छेदकीभूतप्रमात्वज्ञाने निवेश्यम्, एवञ्च भ्रमत्वाप्रकारकत्वे सति प्रमात्वाभावाप्रकारकं यत्प्रमात्वज्ञानं तद्विशिष्टेष्टसाधनताज्ञानमेव प्रवृत्तिहेतुरिति निष्कृष्टार्थमाह "**भ्रमत्वाप्रकारकत्वे सती**"ति। "**तद्विशिष्टत्वमेवे**"ति। प्रवृत्तिकारणतावच्छेदकीभूतप्रामाण्यज्ञाने इति शेषः, तस्य च निवेशनीयमित्यनेनान्वयः। "**गृहीतप्रामाण्यकज्ञानहेतुतावादिने**"ति। गुरुणेत्यर्थः। "**निवेशनीय**"मिति। तथा च गुरुमते भ्रमत्वप्रकारकत्वाभावः प्रमात्वाभावप्रकारकत्वाभावः

**नीयम्। तदपेक्षया च भ्रमत्वग्रहाभावप्रमात्वाभावग्रहाभावयोर्वैशिष्ट्यनिवेशे न गौरवमिति वाच्यम्॥३०॥**

**भावद्वयकोटिकसंशयानभ्युपगमेन भ्रमत्वप्रमात्वोभयकोटिकसंशयस्यैवा-प्रसिद्ध्या भ्रमत्वप्रकारकान्यत्वस्यानिवेशात्। स्थाणुर्वा पुरुषो वेत्याद्याकारक-संशयस्तु स्थाणुत्वतदभावपुरुषत्वतदभावेति चतुष्कोटिक एव न तु स्थाणुत्व-पुरुषत्वाद्युभयमात्रकोटिकः॥३१॥**

---

प्रमात्वप्रकारकत्वं ज्ञानत्वं च प्रवृत्तिजनकतावच्छेदककुक्षौ निवेशनीयानीति भावः। "**तदपेक्षये**"ति। निरुक्तधर्मचतुष्टयस्य प्रवृत्तिकारणतावच्छेदककुक्षौ निवेशापेक्षयेत्यर्थः। "**भ्रमत्वग्रहाभावे**"ति। तथा चेष्टसाधनताज्ञानधर्मिकभ्रमत्वग्रहाभावविशिष्टेष्टसाधनता-ज्ञानस्याभावादेव न प्रवृत्त्यापत्तिः। "**प्रमात्वाभावे**"ति। तथा चेष्टसाधनताज्ञानधर्मिक-प्रमात्वतदभावकोटिकसंशयदशायां प्रमात्वाभावग्रहाभावविशिष्टेष्टसाधनताज्ञानस्याभावादेव न प्रवृत्त्यापत्तिः। "**न गौरव**"मिति। एतन्मते अभावद्वयस्य कारणतावच्छेदककुक्षौ निवेश्यतया पूर्वमते च प्रदर्शितधर्मचतुष्टयस्य कारणतावच्छेदककुक्षौ निवेशनीयत्वात् पूर्वमतापेक्षया एतन्मते न गौरवमिति ध्येयम्॥३०॥

समाधत्ते "**भावद्वयकोटिके**"ति। यदि भावद्वयकोटिकः संशयः स्वीक्रियते तदेष्ट-साधनताज्ञानधर्मिकभ्रमत्वप्रमात्वोभयकोटिकसंशयदशायां प्रवृत्तिवारणाय भ्रमत्वप्रकारकत्वा-भावः प्रवृत्तिजनकतावच्छेदककोटौ निवेश्यः। न तु भावद्वयकोटिकसंशयानभ्युपगमे। तन्मते प्रमा वा भ्रमो वेत्याकारकाभावानवगाहिसंशयस्यैवाभावात्। ननु भावकोटिक-संशयानभ्युपगमे स्थाणुर्वा पुरुषो वेति प्रसिद्धसंशयस्य का गतिरित्यत आह "**स्थाणुर्वा पुरुषो वेत्याद्याकारके**"ति। तथाच स्थाणुर्वा पुरुषो वेति संशयस्य स्थाणुत्वस्थाणुत्वाभावपुरुषत्व-पुरुषत्वाभावेति चतुष्कोटिकत्वं स्वीक्रियत इति न भावमात्रकोटिकत्वमिति भावः।

इदमत्रावधेयम्—एकधर्मिकभावाभावप्रकारकं ज्ञानं संशयः। तथा च स्थाणुर्वा पुरुषो वेति ज्ञानं यदि स्थाणुत्वपुरुषत्वमात्रमवगाहते, तदा तत् संशयरूपमेव न स्यात्, वह्निमान् घटवांश्चेतिवत् समूहालम्बनमेव भवेत्। स्थाणुत्वतदभावप्रकारकत्वे च भावाभावप्रकारकत्वात् संशयत्वं सुघटमिति। नन्वेकधर्मिकभावाभावप्रकारकज्ञानस्य संशयत्वे वृक्षः कपिसंयोगा-भाववान् कपिसंयोगवांश्चेति समूहालम्बनस्यापि संशयत्वापत्तिरिति चेन्न। कोटिद्वये परस्पर-विरोधित्वावगाहित्वविशिष्टमेकधर्मिकभावाभावप्रकारकज्ञानमेव संशयः। तथा च यत्र ज्ञाने स्थाणुत्वतदभावयोः परस्परं विरोधमवगाहतेऽथ च एकस्मिन्नेव धर्मिणि उभयोः प्रकारकत्व-

**न च प्रामाण्यनिश्चयस्य प्रवृत्त्यादिजनकतावच्छेदकत्वे तत्रापि प्रामाण्यनिश्चयो निवेशनीयः। एवं तत्राप्यपर इति क्रमेण कारणतावच्छेदककोटिप्रविष्टविशेषणानवस्थितिरित्यप्रामाण्यज्ञानाभावनिवेशकल्प एव साधीयान् इति वाच्यम् ॥३२॥**

**अप्रामाण्यज्ञानाभावनिवेशमतेऽपि तथाविधानवस्थितितादवस्थ्यात्। तथाहि प्रवृत्त्यादिजनकज्ञानीयाप्रामाण्यग्रहे यत्राप्रामाण्यनिश्चयस्तत्र तादृशाप्रामाण्यग्रहस्याकिञ्चित्करत्वात् जायत एव प्रवृत्त्यादिकमित्यप्रामाण्यनिश्चयाभाव-**

---

गपि विद्यते तत्रैव संशयत्वं स्वीक्रियत इति अयं स्थाणुर्न वेति ज्ञानस्य तथात्वेन संशयत्वमस्त्येवेति। यदि च अयं स्थाणुर्नवा, पर्वतो वह्निमान् नवेत्यादिसंशयस्य कोट्योः परस्परं विरोधित्वं नानुभूयत अपि तु इदमादिधर्मिणि स्थाणुत्वतदभावादिकोट्योरेव ज्ञानमनुभवसिद्धमित्युच्यते तदा कोट्योः परस्पराविरोधित्वानवगाहित्वे सति एकधर्मिकभावाभावप्रकारकज्ञानत्वमेव संशयत्वम्। तथा च कपिसंयोगतदभावयोः परस्पराविरोधित्वावगाहनात् न तादृशसमूहालम्बनस्य संशयत्वम्। यत्र कपिसंयोगतदभावयोरविरोधित्वं नावगाहते, विरोधित्वं वावगाहते तत्रैकधर्मिककपिसंयोगतदभावप्रकारकज्ञाने संशयत्वमेवानुमन्यत इति दिक् ॥३१॥

ननु यत्रेष्टसाधनताज्ञानधर्मिकप्रामाण्यनिश्चयेऽप्रामाण्यज्ञानं न तत्र प्रवृत्तिरिति निश्चितप्रामाण्यकप्रामाण्यज्ञानं प्रवृत्त्यादिजनकतावच्छेदकं वाच्यम्। एवञ्च द्वितीयप्रामाण्यनिश्चयेऽप्रामाण्यज्ञाने न प्रवृत्तिरिति तत्रापि निश्चितप्रामाण्यकत्वमावश्यकमित्यादिरीत्या प्रामाण्यज्ञानानवस्थानात् प्रामाण्यज्ञानस्य प्रवृत्तिजनकतावच्छेदकत्वं न युक्तमित्याशङ्क्यते "**न चे**"ति। वाच्यमित्यनेनान्वयः। "**तत्रापी**"ति। प्रामाण्यनिश्चयेऽपीत्यर्थः। "**तत्राप्यपर**"-इति। "**तत्रापि**" प्रामाण्यनिश्चयधर्मिकप्रामाण्यनिश्चयेऽपि। "**अपरः**" प्रामाण्यनिश्चयान्तरमित्यर्थः। प्रामाण्यज्ञानानवस्थितौ प्रकृते का हानिरित्याह "**कारणतावच्छेदके**"ति। कारणतावच्छेदकस्यानवस्थितौ तद्विशिष्टस्य कारणस्यापि अनवस्थितिः स्यात्। तथा चानवस्थितिरूपाऽनिष्टप्रसङ्गादप्रामाण्यज्ञानाभावनिवेशकल्प एव साधीयान् इत्यर्थः ॥३२॥

अप्रामाण्यज्ञानाभावविशिष्टेष्टसाधनताज्ञानस्य प्रवृत्तिहेतुतावादिमतेऽपि उक्तानवस्थितिस्तुल्यैवेत्याह "**अप्रामाण्ये**"ति। "**तथाविधानवस्थितितादवस्थ्या**"दिति। तथाचोक्तानवस्थितेरुभयमतसिद्धत्वाद् गत्यन्तराभावेन प्रामाणिकत्वमास्थेयमिति भावः। अनवस्थितिं सङ्गमयति "**तथाही**"ति। "**तत्र तादृशाप्रामाण्यग्रहस्य**" निश्चिताप्रामाण्य-

**विशेषितस्यैवाप्रामाण्यग्रहस्याभावः प्रवृत्त्यादिजनकज्ञाने निवेशनीयः। एवमप्रामाण्यज्ञानास्कन्दिततादृशाप्रामाण्यनिर्णयस्याप्यकिञ्चित्करतया तत्राप्यप्रामाण्यग्रहाभावो निवेशनीयः। तादृशाप्रामाण्यग्रहेऽप्यपरस्तन्निश्चयाभाव इत्येवंरीत्या दुर्वारैव तथाविधानवस्थितिस्तुल्योऽनुयोगः ॥२३॥**

**एवं निश्चितप्रामाण्यकनिश्चयत्वेन हेतुतामते वह्निव्याप्यवत्ताज्ञानमप्रमेत्याद्याकारकप्रत्यक्षशाब्दबोधादिकं प्रति वह्न्याद्यनुमित्यादिसामग्र्याः**

---

काप्रामाण्यग्रहस्य। "**अकिञ्चित्करत्वात्**" प्रवृत्तिजनकतावच्छेदकीभूताभावप्रतियोगित्वरूपप्रवृत्तिविरोधित्वविरहात्। नन्वप्रामाण्यग्रहाभावविशिष्टेष्टसाधनताज्ञानस्य प्रवृत्तिजनकत्वादुक्तस्थले इष्टसाधनताज्ञानेऽप्रामाण्यग्रहसत्त्वेन कारणाभावात् कथं प्रवृत्तिरुत्पद्यत इत्यापत्तिवारणाय प्रवृत्तिजनकतावच्छेदकीभूताप्रामाण्यग्रहाभावप्रतियोगिन्यप्रामाण्यज्ञाने अप्रामाण्यनिश्चयाभावं निवेशयति "**अप्रामाण्यनिश्चयाभावे**"ति। तथा चाप्रमाण्यनिश्चयाभावविशिष्टाप्रामाण्यग्रहाभावविशिष्टेष्टसाधनताज्ञानं प्रवृत्तौ कारणमिति कार्यकारणभावः। अप्रामाण्यग्रहस्य प्रवृत्तिप्रतिबन्धकत्वाद् अप्रामाण्यग्रहधर्मिकाप्रामाण्यनिश्चयस्योत्तेजकत्वाद् उत्तेजकाभावविशिष्टप्रतिबन्धकाभावविशिष्टकारणस्य कार्य्योत्पत्तिप्रयोजकत्वनियमादिति भावः।

यथा प्रवर्तकज्ञानधर्मिकाप्रामाण्यज्ञानेऽप्रामाण्यनिश्चयसत्त्वे प्रवृत्तिरुत्पद्यत इत्यप्रामाण्यग्रहेऽप्रामाण्य निश्चयाभावो निवेश्यस्तथा तादृशाप्रामाण्यनिश्चयेऽप्रामाण्यग्रहसत्त्वेऽपि प्रवृत्तिर्नोत्पद्यत इति तादृशाप्रामाण्यनिश्चयेऽपि अप्रामाण्यग्रहाभावो निवेश्यः, एवमेव तादृशाप्रामाण्यग्रहेऽपि पुनरप्रामाण्यनिश्चयाभावस्तत्राप्यप्रामाण्यग्रहाभाव इत्यनवस्थां परिष्कर्तुमाह "**एव**" मित्यादि। "**दुर्वारैवे**"ति। गुरुमते न्यायमतानुसारिभिर्यादृशानवस्थितिः प्रदर्शिता न्यायमतेऽपि तथाविधानवस्थितिर्दुर्वारेति न्यायमतगुरुमतयोरनुयोगस्तुल्य एवेति भावः ॥२३॥

अगृहीताप्रामाण्यकनिश्चयत्वेन हेतुतावादिनां नैयायिकानां मते निश्चितप्रामाण्यकनिश्चयत्वेन हेतुतावादिनां गुरूणां मते चानवस्थितेस्तुल्यत्वाद् विनिगमनाविरहेणोभययोरेव प्रामाणिकत्वमप्रामाणिकत्वं वा स्यादित्याशङ्कायां विनिगमनां प्रदर्श्य गुरुमतं द्रढयति "**एव**"मित्यादिना। अयं भावः—ज्ञानद्वयस्य यौगपद्याभावाद् यत्रैकविषयकप्रत्यक्षसामग्री तदन्यविषयकानुमितिसामग्री च विद्येते तत्रानुमितिरेवानुभूयते न प्रत्यक्षमिति तत्र प्रत्यक्षोत्पत्तिवारणाय तद्विषयकप्रत्यक्षं प्रति तदन्यविषयकानुमितिसामग्रीत्वेन प्रतिबन्धकत्वं वाच्यम्,

**प्रतिबन्धकत्वाकल्पनेन लाघवम्। तादृशानुमितिसामग्रीदशायां वह्नि-व्याप्यवत्ताज्ञानादिधर्मिकप्रामाण्यनिश्चयस्यावश्यकतया तस्य च बाधनिर्णय-मुद्रया तादृशप्रत्यक्षादिप्रतिबन्धकतयैवोपपत्तेः ॥३४॥**

---

एवं यत्रैकविषयकशाब्दसामग्री तदन्यविषयकानुमितिसामग्री च तत्राप्यनुमितिरुत्पद्यते, न शाब्दबोध इति तत्र शाब्दबोधापत्तिवारणाय तद्विषयकशाब्दं प्रति तदन्यविषयकानु-मितिसामग्रीत्वेन प्रतिबन्धकत्वं वक्तव्यम्। तथा च यत्र वह्निव्याप्यधूमवान् पर्वत इत्याकारकपरामर्शघटितानुमितिसामग्री, इन्द्रियसन्निकर्षादिघटितवह्निव्याप्यधूमवान् पर्वत इति ज्ञानमप्रमेत्याकारकाप्रमात्वप्रत्यक्षसामग्री च विद्येते तत्र भिन्नविषयकत्वेनानुमितिसामग्र्या बलवत्त्वादनुमितिरेवोत्पद्यत इति वह्निव्याप्यधूमवत्पर्वतज्ञानधर्मिकाप्रामाण्यज्ञानं प्रति पर्वत-धर्मिकवह्न्यनुमितिसामग्रीत्वेन प्रतिबन्धकत्वमगृहीताप्रामाण्यकनिश्चयत्वेन हेतुतामते कल्प्यम्। अन्यथा निरुक्तस्थले अगृहीताप्रामाण्यकपरामर्शसत्त्वेन सन्निकर्षादिघटितप्रत्यक्षसामग्री-सत्त्वेन च प्रत्यक्षानुमित्योर्यौगपद्यापत्तेः। निश्चितप्रामाण्यकनिश्चयत्वेन हेतुतामते च प्रयोजनाभावात् तादृशप्रतिबन्धकत्वाकल्पनेन लाघवम्। तथाहि वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं प्रमा इत्याकारकपरामर्शस्यैव निश्चितप्रामाण्यकनिश्चयत्वेन हेतुतामतेऽनुमिति-कारणतया तादृशपरामर्शस्य वह्निव्याप्यधूमवान् पर्वतइतिज्ञानमप्रमा इत्याकारकप्रत्यक्षं प्रति तदभावनिश्चयत्वेन बाधनिश्चयविधयैव प्रतिबन्धकत्वमिति सर्वमतसिद्धबाधमुद्रया प्रतिबन्धकत्वेनैवोपपत्तेरनुमितिसामग्रीत्वेन प्रतिबन्धकत्वान्तरं न कल्प्यते। एवं तादृश-शाब्दं प्रत्यपि उक्तरीत्यैव बाधनिश्चयमुद्रया तादृशपरामर्शस्य प्रतिबन्धकत्वं बोध्यम्। तथा च यथा अनुमित्यादिस्थले निश्चितप्रामाण्यकनिश्चयत्वेन हेतुता तथा तद्दृष्टान्तबलेनैव प्रवृत्त्यादिकं प्रत्यपि निश्चितप्रामाण्यकेष्टसाधनताज्ञानत्वेन हेतुता कल्प्यत इति।

"**एव**"मिति। उभयमतयोरनवस्थितेस्तुल्यत्वे। "**निश्चितप्रामाण्यकनिश्चयत्वेन हेतुतामते**" इत्यस्य लाघवमित्येनेनान्वयः। अप्रमात्वस्याप्रत्यक्षत्वमत आह "**शाब्द-बोधादिक**"मिति। शाब्दबोधस्य शब्दाधीनतया शब्दस्य च वक्त्रधीनतया शाब्दबोधः पराधीनमिति तादृशोभयविधसामग्रीदशायां शाब्दबोधास्वीकारे तादृशशाब्दबोधः निरवकाशः स्यादनुमितिस्तु स्वयं व्याप्त्यादिज्ञानेन कर्तुं शक्यतया कालान्तरेऽपि सावकाशेति निरव-काशत्वेन शाब्दसामग्री बलवतीत्यत आह आदीति। आदिना स्मृतेः परिग्रहः। तथा च भिन्नविषयकस्मृत्यनुमितिसामग्रीदशायामनुमितिरेवानुभूयत इति तादृशस्मृतिं प्रति तादृशानुमितिसामग्र्या बलवत्त्वमिति भावः। अत्रानुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पने

अगृहीताप्रामाण्यकनिश्चयत्वेन हेतुतामते च तादृशसामग्रीप्रतिबन्धकता-कल्पनमावश्यकमेव। अन्यथा यत्र न प्रामाण्याप्रामाण्यग्रहोऽथ च परामर्शादिस्तत्रानुमितिप्रत्यक्षादियौगपद्यापत्तेः ॥३५॥

अथ गृहीतप्रामाण्यकनिश्चयत्वेन प्रवृत्त्यादिहेतुत्वोपगमे यत्र पूर्वोत्पन्ना-प्रामाण्यग्रहविरोधेन प्रामाण्याविषयक एव विषयनिश्चयस्तदनन्तरमप्रामाण्यग्रह-नाशस्तदुत्तरं प्रवृत्त्याद्यनुदयप्रसङ्ग इति चेत्।

न जायत एव तादृशनिर्णयात् प्रवृत्त्यादिकमपि तु स्वप्रामाण्यावगाहिनो निश्चयान्तरादेव। एवञ्च सिद्धे गृहीतप्रामाण्यकनिश्चयत्वादिना प्रवृत्त्यादि-हेतुत्वे प्रामाण्यस्य स्वतस्त्वमावश्यकमेव। परतस्त्वे उपदर्शितबलवद्बाधकस्य जागरूकत्वादिति ॥३६॥

---

युक्तिमाह "**तादृशानुमिती**"त्यादिना। "**वह्निव्याप्यवत्ताज्ञानादिधर्मिकप्रामाण्य-निश्चयस्य**" वह्निव्याप्यवान् पर्वत इति निश्चयः प्रमेत्याकारकनिश्चयस्य ॥३४॥

"**अन्यथे**"ति अगृहीताप्रामाण्यकनिश्चयत्वेन हेतुतामते तादृशप्रतिबन्धकत्वाकल्पन इत्यर्थः। यत्र परामर्शधर्मिकप्रामाण्यग्रहस्तत्र गुरुमतवद् बाधनिश्चयविषया तादृश-प्रत्यक्षादिप्रतिबन्धकत्वात् नोक्तप्रत्यक्षानुमित्योर्यौगपद्यापत्तिः, यत्र चाप्रामाण्यग्रहस्तत्र अगृहीताप्रामाण्यकनिश्चयत्वेनानुमितिहेतुतावादिनां नैयायिकानां मतेऽनुमितिकारणा-भावान्नानुमितिरिति न यौगपद्यापत्तिरित्यत आह "**यत्र न प्रामाण्याप्रामाण्यग्रह**" इति। ३५॥

ननु यत्र भाविज्ञानमप्रमेत्याकारकनिश्चयानन्तरमिष्टसाधनताज्ञानं ततः पूर्वोत्पन्नाप्रामाण्य-ज्ञाननाशस्ततः प्रवृत्तिरुत्पद्यते। गृहीतप्रामाण्यकनिश्चयत्वेन हेतुतामते तन्नोपपद्यत इत्या-शङ्कते "**अथे**"त्यादिना। "**प्रामाण्याविषयक एवे**"ति। ननु गुरुमते व्यवसायमात्रस्यैव प्रामाण्यग्रहात्मकत्वेन कथं प्रामाण्याविषयके इति चेन्न; प्रामाण्यग्रहप्रतिबन्धकाभावकालीनस्य व्यवसायमात्रस्यैव गुरुमते प्रामाण्यग्राहकत्वात्। तथा चोक्तस्थले प्रामाण्यग्रहप्रतिबन्धकी-भूताप्रामाण्यग्रहसत्त्वेन न प्रामाण्यग्रहः। "**प्रवृत्त्याद्यनुदयप्रसङ्ग**" इति। भाविज्ञान-मप्रमेत्याकारकपूर्वोत्पन्नबाधनिश्चयेन इष्टसाधनताज्ञानोत्पत्तिक्षणे प्रामाण्यज्ञानं नोत्पद्यते, ज्ञानस्य द्विक्षणस्थायित्वेनेष्टसाधनताज्ञानोत्पत्तिक्षणेऽप्यप्रामाण्यज्ञानसत्त्वेन तदनन्तरमपि प्रामाण्यज्ञानं नोत्पद्यते, तदनन्तरञ्चेष्टसाधनताज्ञानस्यैव नाशात् निश्चितप्रामाण्यकेष्टसाधनता-ज्ञानाभावात् तत्र प्रवृत्त्यनुत्पादप्रसङ्ग इति भावः।

**अत्र नैयायिकाः प्रामाण्यस्य स्वतो ग्राह्यत्वे व्यवसायानन्तरं इदं ज्ञानं प्रमा न वेति तद्धर्मिकप्रामाण्यसंशयानुपपत्तिः। निर्णीते संशयायोगात् ॥३७॥**

---

समाधानमाह "**न जायत**" इति। नोत्पद्यत इत्यर्थः। "**स्वप्रामाण्ये**"ति। इष्टसाधनताज्ञानधर्मिकप्रामाण्येत्यर्थः। "**स्वतस्त्व**"मिति। प्रामाण्यग्रहप्रतिबन्धकाभावकालीनयावत्स्वाश्रयीभूतज्ञानग्राह्यत्वमित्यर्थः। प्रामाण्यस्य परतस्त्वे दोषमाह "**परतस्त्व**" इति। ज्ञानग्राहकातिरिक्तसामग्रीग्राह्यत्वे इत्यर्थः। "**उपदर्शितबलवद्बाधकस्ये**"ति। अनवस्थागौरवादिरूपबाधकस्य। "**जागरूकत्वा**"दिति। विद्यमानत्वादित्यर्थः ॥३६॥

॥ इतिगुरुमतवर्णनम् ॥

गुरुमतानुसारेण प्रामाण्यस्य स्वतस्त्वं व्यवस्थाप्य न्यायमतानुसारेण तत्खण्डयति "**अत्र नैयायिका**" इति। "**अत्र**"प्रामाण्यस्य स्वतस्त्वे। "**नैयायिका**" इति। आहुरिति शेषः। "**व्यवसायानन्तरं**" व्यवसायद्वितीयक्षणे। "**तद्धर्मिके**"ति। व्यवसायधर्मिकेत्यर्थः। "**संशयानुपपत्ति**"रिति। व्यवसायस्य प्रामाण्यावगाहित्वेनाप्रामाण्यसंशयप्रतिबन्धकत्वादिति भावः। ननु कोटिद्वयसहचरितधर्मवद्धर्मिज्ञानत्वेन संशयजनकतया न्यायमते व्यवसायस्यानुव्यवसायग्राह्यत्वेन व्यवसायोत्पत्तिक्षणे तादृशधर्मवद्व्यवसायरूपधर्मिज्ञानमेवासम्भवीति व्यवसायानन्तरं संशयानुपपत्तिरूपदोषस्य न्यायमतेऽपि सत्त्वात्, गुरुमते तद्दोषदानं कथं सङ्गच्छत इति चेन्न। कोटिद्वयसहचरितधर्मज्ञानजन्यकोट्युपस्थितित्वेन संशयजनकता, न तु तादृशधर्मवद्धर्मिज्ञानत्वेनापि। तथा च यत्र व्यवसायोत्पत्तिपूर्वक्षणे प्रमात्वतदभावसहचरितं ज्ञानत्वमिति साधारणधर्मज्ञानात् प्रमात्वतदभावोपस्थितिः, तदनन्तरं व्यवसायः, व्यवसायेन सह मनःसंयुक्तसमवायरूपसन्निकर्षश्च, तदनन्तरं बाधनिश्चयाभावादिबलाद् व्यवसाये प्रमात्वतदभावौ भासेयातामित्यनुव्यवसायरूप एव व्यवसायधर्मिकप्रमात्वतदभावकोटिकसंशयो नानुपपन्नः। न च संशयं प्रति धर्मिज्ञानस्य हेतुत्वात् न्यायमते व्यवसायस्यानुव्यवसायग्राह्यत्वेन व्यवसायोत्पत्तिक्षणे व्यवसायरूपधर्मिज्ञानासम्भवात् कथं व्यवसायानन्तरं व्यवसायधर्मिकप्रामाण्यसंशय इति वाच्यम्। यथा विशिष्टज्ञानं प्रति विशेष्येन्द्रियसन्निकर्षमात्रस्यैव हेतुता न तु विशेष्यज्ञानस्यापि, तथा संशयेऽपि विशेष्येन्द्रियसन्निकर्षमात्रमपेक्षते नतु विशेष्यज्ञानमपि। तथा च धर्मिज्ञानस्य संशयकारणताविरहान्नानुपपत्तिः। धर्मिज्ञानस्य संशयहेतुत्वे च 'व्यवसायानन्तर'मित्यस्य व्यवसायोत्पत्तिचतुर्थक्षण इत्यर्थः। तथा च यत्र व्यवसायानन्तरमनुव्यवसायेन व्यवसायधर्मिक-

**अथ यादृशव्यवसायान्तरं प्रामाण्यसंशयोऽनुभवसिद्धस्तादृशव्यवसाये तादृशविषयितैव न स्वीक्रियते फलबलात्। न चेतरत्र यादृशसामग्रीबलात्**

---

प्रमात्वतदभावसहचरितज्ञानत्ववत्त्वमवगाहते, तदनन्तरं कोट्युपस्थितिस्ततः व्यवसायधर्मिक-प्रमात्वतदभावप्रकारकसंशय इति नानुपपत्तिः। न च कोट्युपस्थितिक्षणे व्यवसायनाशात् कथं तद्धर्मिकसंशय इति वाच्यम्। अनुव्यवसायोपनीतव्यवसाये मानससंशयोत्पत्तौ बाधकाभावात्। न च गुरुमते व्यवसायेनैव प्रामाण्यावगाहनात् तृतीयक्षणे तन्नाशेन चतुर्थक्षणे प्रामाण्यसंशये गुरुमतेऽपि बाधकाभावादिति वाच्यम्। व्यवसायस्य संशय-धर्मितासम्पादनार्थं व्यवसायस्योपस्थितेः स्वीकार्यत्वेन तादृशोपस्थितेर्व्यवसायविषयकत्वेन गुरुमते तत्र तत्प्रामाण्यविषयकत्वस्याप्यावश्यकत्वेन तद्विरोधेन संशयानुपपत्तिरिति दिक् ॥३७॥

गुरुमतावलम्बी शङ्कते "**अथे**"ति। "**प्रामाण्यसंशय**"इति। स्वधर्मिकप्रामाण्य-संशय इत्यर्थः। "**तादृशविषयिते**"ति। प्रामाण्यविषयितेत्यर्थः। "**फलबला**"दिति। संशयरूपफलं दृष्ट्वा अनुमीयत इत्यर्थः। तथा च तद्व्यवसायः स्वधर्मिकप्रामाण्यविषयित्वा-भाववान् स्वधर्मिकप्रामाण्यसंशयसमानाधिकरणत्वे सति स्वधर्मिकप्रामाण्यसंशयाव्यवहित-पूर्ववर्तित्वे सति अनाहार्यनिश्चयत्वादित्यनुमानेन तादृशव्यवसाये प्रामाण्यविषयित्वाभावः साध्यत इति भावः। यत्रापरव्यवसायधर्मिकप्रामाण्यावगाही तद्व्यवसायधर्मिकप्रामाण्या-नवगाही तद्व्यवसायस्तदुत्तरं तद्व्यवसायधर्मिकप्रामाण्यसंशयस्तादृशतद्व्यवसाये सामान्यतः प्रामाण्यविषयित्वाभावासत्त्वेन व्यभिचारात् साध्यांशे स्वधर्मिकेति। यत्र च प्रामाण्याव-गाही तद्व्यवसायस्तदनन्तरमपरपुरुषीयतद्व्यवसायधर्मिकप्रामाण्यसंशयस्तादृशव्यवसाये व्यभिचार-वारणाय प्रथमसत्यन्तदलम्। यत्र तद्व्यवसायेन प्रामाण्यग्रहस्ततस्तादृशप्रामाण्यज्ञाननाशेन प्रामाण्यसंशयस्तत्र तादृशव्यवसाये व्यभिचारवारणाय द्वितीयसत्यन्तदलम्। यत्र तद्व्यव-सायेनाहार्यरूपप्रामाण्यज्ञानम्, आहार्यज्ञानस्याप्रतिबन्धकतया तदनन्तरं प्रामाण्यसंशयः तत्र तद्व्यवसाये व्यभिचारवारणाय अनाहार्यत्वम्। यत्र प्रामाण्यसंशयानन्तरं प्रामाण्यसंशय-स्तत्र प्रथमप्रामाण्यसंशये व्यभिचारवारणाय निश्चयत्वमिति।

यादृशव्यवसायानन्तरं संशयो न भवति तादृशव्यवसाये यथा व्यवसायभासक-सामग्रीत एव प्रामाण्यं भासते, तथैव यादृशव्यवसायानन्तरं प्रामाण्यसंशयो भवति तादृशव्यवसायेऽपि व्यवसायभासकसामग्रीत एव प्रामाण्यं भासतां सामग्रीसत्त्वात्। सामग्री कार्यं नार्जयेदिति तु न, इत्याशङ्कते "**नचे**"ति। "**इतरत्र**" यादृशव्यवसायोत्तरं

**प्रामाण्यं भासते तत्रापि तद्बलात्तद्भाने बाधकाभाव इति वाच्यम्। अप्रामाण्यसंशयजनकदोषस्यैव तत्र प्रामाण्यभानविरोधित्वोपगमात् ॥३८॥**

**न च तादृशव्यवसायेन प्रामाण्याग्रहे यावत्स्वाश्रयग्राह्यत्वरूपविप्रतिपत्त्युपदर्शितसाध्यस्य प्रामाण्यरूपपक्षे बाध इत्याशङ्का।**

**स्वाश्रये प्रामाण्यग्रहप्रतिबन्धकाभावकालीनत्वस्य तत्र निवेशितत्वात्। प्रतिबन्धकसमवधानकालीनस्वाश्रयीभूततादृशव्यवसाये प्रामाण्याभानस्य बाधासम्पादकत्वादिति चेत् ॥३९॥**

---

प्रामाण्यसंशयो नानुभूयते तादृशव्यवसाय इत्यर्थः। "**यादृशसामग्रीबलात्**" व्यवसायभासकसामग्रीबलात्। "**तत्रापि**" यादृशव्यवसायोत्तरं प्रामाण्यसंशयोऽनुभवसिद्धस्तादृशव्यवसायेऽपि। "**तद्बलात्**" व्यवसायसामग्रीबलात्। "**तद्भाने**" प्रामाण्यभान इत्यर्थः।

संशयस्तु भ्रमज्ञानं, भ्रमज्ञाने तु दोषः कारणमिति व्यवसायधर्मिकप्रामाण्यसंशयजनकदोषाणामेव व्यवसायधर्मिकप्रामाण्यनिश्चयं प्रति प्रतिबन्धकत्वं प्रकल्प्य यादृशव्यवसायोत्तरं प्रामाण्यसंशयोऽनुभवसिद्धस्तादृशव्यवसाये प्रामाण्यनिश्चयापत्तिं वारयति "**अप्रामाण्ये**"ति। अथ संशयजनकदोषाणां प्रतिबन्धकत्वेऽपि व्यवसायपूर्वं तदसत्त्वात् कथं न व्यवसाये प्रामाण्यभानम्। न च व्यवसायपूर्वक्षणेऽपि तत्स्वीकारे बाधकाभावादिति वाच्यम्। तत्र व्यवसायस्यैव प्रामाण्यसंशयात्मकत्वेन व्यवसायानन्तरं प्रामाण्यसंशयानुपपत्तेरवारणादिति चेन्न। संशयजनकदोषाणां कार्यकालवृत्तितयैव प्रामाण्यभानप्रतिबन्धकत्वस्वीकारात्। व्यवसायोत्तरक्षणे प्रामाण्यसंशयानुरोधेन व्यवसायक्षणे प्रामाण्यसंशयजनकदोषाणामावश्यकत्वादिति ध्येयम् ॥३८॥

यादृशव्यवसायोत्तरं प्रामाण्यसंशयोऽनुभवसिद्धस्तादृशव्यवसायेन यदि प्रामाण्यं न गृह्यते तदा प्रामाण्ये यावत्स्वाश्रयग्राह्यत्वाभावाद् गुरुमते बाध इत्याशङ्कते "**नचे**"ति। आशङ्केत्यनेनान्वयः।

समाधत्ते "**स्वाश्रये**"ति। "**तत्र**"विप्रतिपत्तौ, सप्तम्यर्थो घटकत्वं तस्य च स्वाश्रयेऽन्वयः। तथा च विप्रतिपत्तिघटकस्वाश्रये प्रामाण्यग्रहप्रतिबन्धकाभावकालीनत्वस्य निवेशनीयत्वादित्यर्थः। ननु प्रामाण्यग्रहप्रतिबन्धकाभावकालीनत्वनिवेशे कथमुक्तबाधवारणमित्याह"**प्रतिबन्धकसमवधानकालीने**"ति। प्रतिबन्धककालीनतादृशव्यवसाये प्रामाण्यस्याभाने प्रामाण्ये प्रतिबन्धककालीनतादृशव्यवसायग्राह्यत्वाभाव एव सिध्यति स तु

**न, प्रामाण्यसंशयजनकीभूतानां तत्तत्क्षणसम्बन्धादिरूपदोषाणामनुगमकरूपाभावेन विशिष्य तत्तद्व्यक्तित्वेनैव प्रतिबन्धकत्वं कल्पनीयम्। तथा चानन्तप्रतिबध्यप्रतिबन्धकभावापत्तिरित्येतदपेक्षया व्यवसायस्य स्ववृत्ति-**

---

न साध्याभाव इति न बाधप्रसक्तिरित्याह "**बाधासम्पादकत्वा**"दिति। प्रामाण्यरूपपक्षे विप्रतिपत्त्युपदर्शितसाध्यस्याभावासम्पादकत्वादित्यर्थः। तथा च प्रतिबन्धकाभावकालीनयावत्स्वाश्रयज्ञानग्राह्यत्वस्यैव साध्यत्वात् निरुक्तस्वाश्रयीभूतव्यवसायात्मकज्ञानन्तु संशयजनकदोषरूपप्रतिबन्धककालीनतया प्रतिबन्धकाभावकालीनत्वाभावात् तद्ग्राह्यत्वाभावेऽपि क्षतिविरहादिति भावः। एवञ्च प्रामाण्यस्य स्वतोग्राह्यत्वेऽपि व्यवसायानन्तरं प्रामाण्यसंशये बाधाभावान्न स्वतोग्राह्यत्वमते प्रामाण्यसंशयानुपपत्तिरूपदोषदानं सङ्गच्छत इति शङ्काकर्तृणां गुरुमतानुयायिनामाशङ्का ॥३६॥

प्रामाण्यनिश्चयं प्रति प्रामाण्यसंशयजनकदोषाणां प्रतिबन्धकत्वकल्पनेनैव व्यवसायात्मकनिश्चयानन्तरं प्रामाण्यसंशयस्य नानुपपत्तिरिति मिश्रानुयायिनामाशङ्कां नैयायिकाः समादधते "**न, प्रामाण्यसंशयजनकीभूताना**"मिति। प्रामाण्यसंशयं प्रति साधारणादिधर्मवद्धर्मिज्ञानादि तत्तत्क्षणसम्बन्धादि च कारणमिति ते सर्व एव प्रामाण्यनिश्चयप्रतिबन्धका दोषाः, तेषामनुगमकरूपाभावात् तत्तद्व्यक्तित्वेनैव प्रत्येकं प्रतिबन्धकत्वं कल्प्यमित्यनन्तप्रतिबध्यप्रतिबन्धकभावापत्तिः।

न च प्रामाण्यसंशयजनकत्वेन तेषामनुगम इति वाच्यम्। जनकत्वस्य स्वरूपसम्बन्धात्मकतया प्रतिव्यक्तिभेदेन भिन्नत्वात्। तन्निश्चयं प्रति तत्संशयजनकत्वेन प्रतिबन्धकत्वे इन्द्रियसन्निकर्षादीनां संशयजनकतया प्रात्यक्षिकनिश्चयापलापप्रसङ्गाच्च। न च प्रामाण्यसंशयजनकसामग्रीत्वेनैव प्रतिबन्धकत्वं, सामग्रीत्वञ्च कारणकूटत्वं तच्चैकस्मिन् कारणे विरहात् न प्रात्यक्षिकनिश्चयापलाप इति वाच्यम्। प्रामाण्यसंशयजनकसाधारणादिधर्मवद्धर्मिज्ञानादिनिष्ठस्य कूटत्वस्य गुणात्मकत्वासम्भवेन अपेक्षाबुद्धिविषयत्वरूपस्य तस्य प्रतिव्यक्तिभेदेन भिन्नत्वादननुगमतादवस्थ्यात्; कूटत्वग्रहस्यापेक्षाबुद्धिप्रयोज्यतया प्रामाण्यसंशयजनकीभूततत्तद्व्यक्तीनामनुपस्थितौ तादृशकूटत्वग्रहासम्भवेन निरुक्तप्रतिबध्यप्रतिबन्धकभावकल्पनासम्भवात्; प्रामाण्यसंशयजनकीभूततत्तद्व्यक्तीनामुपस्थितौ च प्रथमोपस्थिततत्तद्व्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वं परित्यज्य तादृशसामग्रीत्वेन प्रतिबन्धकत्वे मानाभावात् उपस्थितिकृतगौरवाच्च।

न च तत्तत्क्षणसम्बन्धादीनां संशयजनकत्वमेवासिद्धमिति किं तस्य प्रामाण्यनिश्चय-

**प्रामाण्याग्राहकत्वस्य प्रवृत्त्यादिकं प्रति अगृहीतप्रामाण्यकनिश्चयत्वादिना हेतुत्वस्य च कल्पनमेवोचितमिति ।।४०।।**

**यत्तु व्यवसाये निर्धर्मितावच्छेदकप्रामाण्यावगाहनमेवोपगम्यतेऽतो न प्रामाण्यसंशयानुपपत्तिः। निर्धर्मितावच्छेदककज्ञानस्य संशयाविरोधित्वात् ।**

---

प्रतिबन्धकत्वकल्पनयेति वाच्यम् । इदानीं संशयो भवति, तदानीं संशयो भविष्यति, तदानीं संशयो जात इत्यादि प्रतीत्या तत्तत्क्षणादिरूपकालानां संशयोत्पत्त्यधिकरणत्वमवगम्यते, भूधातोरुत्पत्तिपरत्वात् । यो यदुत्पत्त्यधिकरणं स तत्कारणं ; यथा इह कपाले घटो भवतीति प्रतीत्या घटोत्पत्त्यधिकरणस्य कपालस्य घटकारणत्वमिति नियमेन संशयोत्पत्त्यधिकरणत्वात् तत्तत्क्षणादीनां संशयजनकत्वसिद्धेः ।

ननु तत्तत्क्षणादीनामेव संशयजनकत्वं स्यात् न तु तत्तत्क्षणसम्बन्धानामिति चेत्, सत्यम्—इदानीं संशयो भवति तदानीं संशयो भविष्यतीत्यादिप्रतीतिः सूर्यपरिस्पन्दरूपखण्डकालमेव विषयीकरोति, न तु महाकालम् । अन्यथा इदानीं घटो न तदानीमित्यादिप्रतीत्यनुपपत्तिर्महाकालस्य सर्वाधारत्वात् । तथा च सूर्यपरिस्पन्दादिरूपकालस्यैव संशयकारणत्वमवगम्यते । एवञ्च तादृशक्षणस्य कारणत्वानुपपत्त्या तादृशक्षणसम्बन्धानां कारणत्वं कल्प्यते । तथाहि सामग्र्या एव कार्योत्पादकत्वं सामग्री च कारणसमूहः । स च कारणसमूह एकस्मिन्नेवाधिकरणे विद्यते चेत् कार्यमुत्पद्यते । अन्यथा एकत्र दण्डः अन्यत्र चक्रम् अपरत्र कुलाल इति रीत्या कारणसमूहादपि घटोत्पत्तिप्रसङ्गः । तथा च कार्याधिकरणे कार्याव्यवहितपूर्वक्षणावच्छेदेन सामग्रीसत्त्वमावश्यकम् । अत्र च संशयरूपकार्यस्यात्मन्येवानुभवात् तत्र च सामग्रीसत्त्वमपेक्षितं तत्तत्क्षणादिरूपसंशयकारणस्य केनापि सम्बन्धेन आत्मन्यवृत्तेः सामग्रीविरहप्रसङ्गः । न च स्वाश्रयमहाकालवृत्तिगुणादिसमवायित्वसम्बन्धेन तत्तत्क्षणानामात्मनि सत्त्वमिति वाच्यम् । उक्तपरम्परासम्बन्धस्य वृत्त्यनियामकत्वेन तादृशसम्बन्धेनाधाराधेयभावविरहात् । अतः तत्तत्क्षणादिसम्बन्धानां कारणत्वमुक्तम् । तथा च स्वाश्रयमहाकालवृत्तिगुणादिरूपाणां तत्तत्क्षणसम्बन्धानां समवायरूपवृत्तिनियामकसम्बन्धेनात्मनि सत्त्वान्नानुपपत्तिरिति हृदयम् ।

"**कल्पनमेवोचित**"मिति । तथाच निश्चितप्रामाण्यकनिश्चयत्वेन हेतुत्वे सिद्धे प्रामाण्यस्य परतः पक्षेऽनवस्थानात् प्रामाण्यस्य स्वतस्त्वमिति यत् स्वतस्त्ववादिनोक्तं तदयुक्तम्, निश्चितप्रामाण्यकनिश्चयत्वेनाहेतुत्वात् । तथा च प्रामाण्यस्य न स्वतस्त्वमिति नैयायिकानामभिप्रायः ।।४०।।

**युज्यते चैतदेव; प्रथमं विशेष्यतावच्छेदकीभूतेदन्त्वादिप्रकारकज्ञानविरहात् तद्विशिष्टे प्रामाण्यवैशिष्ट्यबोधासम्भवात् ॥४१॥**

**न चैवं बाधाभावादीनां तादृशप्रामाण्यभानानियामकतया तादृशप्रामाण्यविषयित्वं कस्य जन्यतावच्छेदकमिति चेत्; न कस्यापि, अपि तु स्वभावसिद्धमेव ज्ञानस्य तथात्वम्।**

**न चैवं तदवच्छिन्नस्य कादाचित्कत्वानुपपत्तिरिति वाच्यम्। तत्प्रकारक-**

---

केषाञ्चिन्मतमाह "**यत्त्वि**"ति। "**युज्यते चैतदेवे**"ति। प्राथमिकव्यवसाये सधर्मितावच्छेदककप्रामाण्यावगाहनासम्भवान्निर्धर्मितावच्छेदककमेव प्रामाण्यं तत्रावगाहत इति मतमेव युक्तमिति भावः। ननु प्राथमिकव्यवसाये इदन्त्वादिकं धर्मितावच्छेदकीकृत्य इदं ज्ञानं प्रमेत्याकारकं प्रामाण्यावगाहनं कथं न भवतीत्यत आह "**प्रथम**"मित्यादि। "**तद्विशिष्टे**" इदन्त्वादिविशिष्टे। "**प्रामाण्यवैशिष्ट्ये**"ति। प्रामाण्यसम्बन्धेत्यर्थः। इदन्तु तद्धर्मावच्छिन्नविशेष्यताशालिग्रहं प्रति तद्धर्मप्रकारकज्ञानत्वेन कारणत्वमित्यभिप्रायेण। इदमत्रावधेयम्, गुरुमते धर्मितावच्छेदकप्रकारकज्ञानस्य कारणताविरहात् तदभ्युपगम्य गुरुमतसमर्थनं न युक्तमिति ॥४१॥

शङ्कते "**न चैवं बाधाभावादीना**"मिति। "**तादृशप्रामाण्यभाने**"ति। निर्धर्मितावच्छेदककप्रामाण्यभानेत्यर्थः। "**अनियामकतये**"ति। बाधाभावादीनां प्रतिबन्धकाभावमुद्रयैव प्रामाण्यभाननियामकत्वम्। निर्धर्मितावच्छेदककज्ञानस्याप्रतिबध्यत्वात्, निर्धर्मितावच्छेदककप्रामाण्यभानं प्रति बाधस्याप्रतिबन्धकत्वेन तादृशप्रामाण्यभानं प्रति बाधस्याप्रतिबन्धकत्वेन तादृशप्रामाण्यभानं प्रति बाधाभावस्यानियामकत्वमिति भावः।

परिहरति "**न कस्यापी**"ति। "**तथात्व**" प्रामाण्यविषयित्वम्।

पुनः शङ्कते "**नचैवं तदवच्छिन्नस्ये**"ति। "**तदवच्छिन्नस्य**" प्रामाण्यविषयकत्वावच्छिन्नस्य। "**कादाचित्कत्वानुपपत्ति**"रिति। तद्धर्मावच्छिन्नोत्पादकसामग्र्येव तद्धर्मावच्छिन्नस्य कादाचित्कत्वनियामिका। प्रामाण्यविषयित्वस्य कस्यापि जन्यतानवच्छेदकत्वेन प्रामाण्यविषयित्वावच्छिन्नोत्पादकसामग्र्यभावात् तदवच्छिन्नस्य कादाचित्कत्वानुपपत्तिरित्यर्थः।

परिहरति "**तत्प्रकारके**"ति। ननु यो धर्मो यज्जन्यतावच्छेदकस्तद्घटितसामग्री तद्धर्मावच्छिन्नस्य कादाचित्कत्वनियामिकेति नियमात् प्रामाण्यविषयित्वस्य कस्यापि जन्यतानवच्छेदकत्वेन न तदवच्छिन्नस्य कादाचित्कत्वमित्याशङ्कां निरस्यति

ज्ञानत्वावच्छिन्नोत्पादकसामग्र्या एव तद्घटितप्रामाण्यविषयकत्वावच्छिन्न-कादाचित्कतानिर्वाहकत्वात्। न हि यो धर्मो यज्जन्यतावच्छेदकस्तद्घटित-सामग्र्यास्तदवच्छिन्नकादाचित्कत्वनिर्वाहकतेति नियमः प्रामाणिकः। तथा सति तद्घटत्वस्य कस्यचिज्जन्यतानवच्छेदकतया तदवच्छिन्नस्य कादाचित्-कत्वानुपपत्तिरिति ॥४२॥

तदसत्, व्यवसाये निर्धर्मितावच्छेदकप्रामाण्यभानेऽपि प्रवृत्त्याद्युपयोगि सधर्मितावच्छेदकप्रामाण्यग्रहस्य परत एवोपगन्तव्यतया स्वस्य स्वप्रामाण्या-वगाहित्वे मानाभावात्। नहि निर्धर्मितावच्छेदकप्रामाण्यग्रहः प्रवृत्त्याद्युप-योगी। तस्याप्रामाण्यशङ्काविरोधित्वविरहात् ॥४३॥

यत्तु धर्मितावच्छेदकसामानाधिकरण्येनैव व्यवसाये स्ववृत्तिप्रामाण्याव-

---

"न ही"ति। तादृशनियमस्य प्रामाणिकत्वे दोषमाह "तथा सती"ति। उक्तनियमस्य प्रामाणिकत्वे सतीत्यर्थः। "तद्घटत्वस्ये"ति। घटत्वं दण्डादिजन्यतावच्छेदकं, तत्त्वं प्रागभावादिजन्यतावच्छेदकम्, उत्पन्नस्य पुनरुत्पत्तिवारणाय तत्त्वावच्छिन्नं प्रति तत्प्रागभावत्वेन हेतुत्वात्। तथा च यथा तद्घटत्वस्य जन्यत्वानवच्छेदकत्वेऽपि तत्त्वा-वच्छिन्नजनकतत्प्रागभावादि-घटत्वावच्छिन्नजनकदण्डादिघटितसामग्रीतः तद्घटत्वावच्छिन्नस्य कादाचित्कत्वं तथा तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वशालिज्ञानत्वरूपप्रामाण्यविषय-कत्वस्य कस्यचिज्जन्यतानवच्छेदकत्वेऽपि तद्वद्विशेष्यकत्वावच्छिन्नजनकविशेष्येन्द्रियसन्निकर्षतत्-प्रकारकत्वावच्छिन्नजनकप्रकारेन्द्रियसन्निकर्षज्ञानत्वावच्छिन्नजनकात्ममनःसंयोगादिघटितसामग्रीत एव तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकताशालिज्ञानत्वरूपप्रामाण्यविषयकत्वावच्छिन्नस्य कादाचित्-कत्वमिति भावः ॥४२॥

प्रवृत्त्याद्युपयोगिप्रामाण्यज्ञानमेवात्र विचार्यम्। तत्तु न निर्धर्मितावच्छेदकप्रामाण्य-ज्ञानमपि तु सधर्मितावच्छेदकप्रामाण्यज्ञानमेवेति तस्य न स्वतस्त्वसम्भावनेति समाधत्ते "तदस"दिति। निर्धर्मितावच्छेदकप्रामाण्यज्ञानस्य प्रवृत्त्याद्यनुपयोगित्वे हेतुमाह "तस्ये"ति। अप्रामाण्यसंशयस्य प्रवृत्तिप्रतिबन्धकत्वेन तद्विरोधिप्रामाण्यनिश्चयस्यैव प्रवृत्तिप्रयोजकत्वं स्वीकार्यं निर्धर्मितावच्छेदकप्रामाण्यनिश्चयस्याप्रतिबन्धकत्वेन प्रवृत्त्युप-योगित्वं न घटत इत्यर्थः ॥४३॥

केचित्तु व्यवसाये धर्मितावच्छेदकसामानाधिकरण्येन प्रामाण्यभानं स्वीकृत्य धर्मितावच्छेदक-सामानाधिकरण्येन प्रामाण्याभावावगाहिसंशयमुपपादयन्ति तन्मतमाह "यत्त्वि"ति।

**गाहित्वमुपेयते। न तु धर्मितावच्छेदकावच्छेदेनापि। एवञ्च तत्सामानाधिकरण्येन प्रामाण्याभावावगाही 'इदं ज्ञानं प्रमा नवे'ति संशयो नानुपपन्न इति ॥४४॥**

**तदपि न, तावतापि अवच्छेदकावच्छेदेन प्रामाण्याभावावगाहिनः संशयस्यानुपपत्तेः। वस्तुतस्तु ज्ञानस्य स्वप्रकाशतायामेव प्रामाण्यस्योपदर्शितस्वतोग्राह्यत्वमुपपद्यते, तामेव दूषयिष्याम इति न प्रामाण्यस्य स्वतो ग्राह्यतेति ॥४५॥**

**मुरारिमिश्रमते तु यावत् स्वाश्रयानुव्यवसायग्राह्यत्वमेव प्रामाण्यस्य स्वतो**

---

"**उपेयत**"इति। धर्मितावच्छेदकसामानाधिकरण्येन प्रामाण्याभावावगाहिसंशयं प्रति धर्मितावच्छेदकावच्छेदेन प्रामाण्यावगाहिनिश्चय एव प्रतिबन्धकः, न तु तत्सामानाधिकरण्यावगाहिनिश्चय इति धर्मितावच्छेदकसामानाधिकरण्येन प्रामाण्यावगाहिव्यवसायानन्तरं तत्सामानाधिकरण्येन प्रामाण्याभावावगाहिसंशयस्य नानुपपत्तिरिति भावः। व्यवसाये धर्मितावच्छेदकावच्छेदेन प्रामाण्यभाने व्यवसायानन्तरं सामानाधिकरण्येनापि प्रामाण्याभावावगाहिसंशयो न भवितुमर्हतीति व्यवसायानन्तरं प्रामाण्यसंशयानुपपत्तेस्तादवस्थ्यम्। अतस्तन्निषेधयति "**नत्वि**"ति ॥४४॥

व्यवसाये धर्मितावच्छेदकसामानाधिकरण्येन प्रामाण्यभानवादिनां मतं दूषयति "**तदपि ने**"ति। "**संशयस्यानुपपत्ते**"रिति। धर्मितावच्छेदकावच्छेदेन प्रामाण्याभावावगाहिसंशयोऽप्यनुभवसिद्धस्तस्यापलापप्रसङ्गादित्यर्थः। ननु अन्यत्र धर्मितावच्छेदकावच्छेदेन तदभावावगाहिसंशयो भवतु, प्रामाण्यसंशयस्तु केवलं धर्मितावच्छेदकसामानाधिकरण्येनैव प्रामाण्याभावावगाहीत्यनुभवसिद्धः, न त्वन्यदिति यदि ब्रूयात्तदाह "**वस्तुतस्त्वि**"ति। ज्ञानं स्वयमेव स्वमपि गृह्णातीति स्वस्मिन् गृह्यमाणे ज्ञानत्वादिरूपस्ववृत्तिधर्मवत् स्ववृत्तिप्रामाण्यमप्यसति प्रतिबन्धके स्वयमेवावगाहते स्वोत्पादकसामग्र्याः स्व-स्ववृत्तिज्ञानत्वादिविषयितानियामकत्ववत् स्ववृत्तिप्रामाण्यविषयितानियामकत्वं स्वीकृत्य प्रामाण्यस्य स्वाश्रयीभूतज्ञानग्राह्यत्वरूपस्वतोग्राह्यतोपपादिता। तत्र ज्ञानस्य यदि स्वतोग्राह्यत्वं नोपेयते तदा प्रामाण्यस्यापि स्वतोग्राह्यत्वं न सम्भवतीति ज्ञानस्य स्वतोग्राह्यतानिरासेन प्रामाण्यस्यापि स्वतोग्राह्यता निरस्ता भवेदिति भावः ॥४५॥

मुरारिमिश्राणां मतमुत्थापयति "**मुरारिमिश्रमते त्वि**"ति। एतन्मते ज्ञानमनुव्यवसायग्राह्यमिति तत्प्रामाण्यमप्यनुव्यवसायेनैव गृह्यत इति तदनुसारेण प्रामाण्यस्य

**ग्राह्यत्वम्। तथा च प्रामाण्यं स्वविषयकग्रहविरोध्यभावकालीनस्वाश्रय-लौकिकत्वव्यापकविषयिताप्रतियोगि न वा, प्रामाण्यविषयता स्वाश्रय-लौकिकत्वव्यापिका न वेत्याकारिका विप्रतिपत्तिः ॥४६॥**

---

स्वतस्त्वं निरूपयति "**यावत्स्वाश्रये**"त्यादि। "**स्वं**" प्रामाण्यं, तदा"**श्रयः**" व्यवसायस्तद्विषयको यो"**ऽनुव्यवसाय**"स्तद्"**ग्राह्यत्व**"मेव प्रामाण्यस्य स्वतोग्राह्यत्वमित्यर्थः। यत्र प्रथमं व्यवसायः प्रामाण्योपस्थितिश्च तत्र तदनन्तरमनुव्यवसाये न्यायमतेऽपि प्रामाण्यस्योपनीतभानं स्यात्, अतो न्यायादिमतेऽपि प्रामाण्यस्य स्वाश्रयानुव्यवसायग्राह्यत्व-रूपस्वतस्त्वसत्त्वात् सिद्धसाधनं तद्वारणाय "**यावदि**"ति।

एतन्मते विप्रतिपत्तेराकारं दर्शयति "**तथाचे**"ति। अत्र प्रामाण्यं पक्षः, स्वविषयकग्रहप्रतिबन्धकाभावकालीनस्वाश्रयलौकिकत्वव्यापकविषयिताप्रतियोगित्वरूपभाव-कोटिर्मिश्राणां, तदभावकोटिर्नैयायिकादीनाम्। यत्र 'इदं ज्ञानं भ्रम' 'इदं ज्ञानमप्रमे'ति वा ज्ञानधर्मिकभ्रमत्वस्याप्रमात्वस्य वा मानसो भ्रमस्तत्र तादृशज्ञाने प्रामाण्याग्रहान् मिश्रमते बाधवारणाय कालीनान्तं स्वाश्रयलौकिके विशेषणम्। "**स्वाश्रयलौकिके**"ति। स्वाश्रय-विषयकलौकिकेत्यर्थः। स्वाश्रयग्रहत्वव्यापकत्वनिवेशे यत्र 'ज्ञातो घट' इति ज्ञानस्योपनीत-भानं तत्र प्रकारीभूतस्य ज्ञानस्य प्रामाण्याग्रहात् प्रामाण्यविषयितायाः स्वाश्रयग्रहत्व-व्यापकत्वविरहेण मिश्रमते बाधस्तद्वारणाय "**लौकिकत्वे**"ति। व्यवसायनिष्ठप्रामाण्यो-पस्थित्यनन्तरं न्यायमतेऽप्यनुव्यवसाये प्रामाण्यग्रहात् स्वाश्रयलौकिकत्वसामानाधिकरण्यं प्रामाण्यविषयिताया न्यायमतेऽपि सत्त्वात् सिद्धसाधनवारणाय सामानाधिकरण्यमनिवेश्य व्यापकत्वं निवेशितम्।

ननु घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्याश्रयीभूतो यो व्यवसायस्तद्विषयकं यल्लौकिक-प्रत्यक्षमनुव्यवसायरूपं तत्र घटत्वप्रकारकत्वविषयिताया नियमेन सत्त्वात्, घटत्वप्रकारकत्व-विषयिताऽपि तादृशलौकिकत्वव्यापिका तत्प्रतियोगित्वस्य घटत्वप्रकारकत्वे सत्त्वेन घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्येऽपि सत्त्वम्, विशेष्यवृत्तिपदार्थस्य विशिष्टेऽपि सत्त्वनियमात्। तथा च तादृशघटत्वप्रकारकत्वविषयिताप्रतियोगित्वस्य न्यायमतेऽपि प्रामाण्ये सिद्धत्वात् सिद्धसाधनम्। यदि तादृशविशिष्टप्रामाण्यविषयितायां स्वाश्रयलौकिकत्वव्यापकत्वनिवेशनं मिश्राणामभिमतं तदा तादृशविशिष्टप्रामाण्यविषयिताप्रतियोगित्वं केवलं प्रामाण्यरूपपक्ष एव सत्त्वेन पक्षातिरिक्ते तादृशविशिष्टप्रामाण्यविषयिताप्रतियोगित्वरूपसाध्यस्याप्रसिद्धि-रित्यतः कल्पान्तरमाह "**प्रामाण्यविषयिते**"ति। मिश्रमते प्रामाण्याश्रयीभूतव्यवसाय-

अत्र मुरारिमतानुयायिनः—संयुक्तसमवायबलाज्ज्ञानमानसे जायमाने तद्वृत्तिप्रामाण्यभानेऽपि बाधकाभावः। तथाहि घटत्वादिमद्विशेष्यकत्वविशिष्ट-घटत्वप्रकारकत्वमेव घटत्वादिकारकज्ञानप्रामाण्यं, तत्र प्रकारिताविशेष्यिता ज्ञानभानदशायां मनःसंयुक्तसमवायबलादेव भासते। ज्ञाने मनःसंयुक्तसमवाय-दशायां तद्वृत्तिप्रकारकत्वादौ मनःसंयुक्तसमवेतविशेषणतासम्बन्धस्यावश्यक-त्वात्। तत्र च विशेष्यितायां भासमानायां बाधाभावादिबलान्-निरूप्यनिरूपकभावसम्बन्धेन प्रकारित्वांशे विशेषणतयैव तज्ज्ञानमुत्पद्यते। एवं प्रकारित्वांशे प्रकारो विशेष्यित्वांशे च धर्मी निरूपितत्वसम्बन्धेन प्रकारतया भासते, तदुपनायकीभूतव्यवसायरूपप्रत्यासत्तिबलात्। एवं धर्म्यंशे घटत्वादिरूपप्रकारस्यापि समवायादिना विशेषणत्वे बाधकाभाव इति किमवशिष्यते प्रामाण्यज्ञाने ॥४७॥

न च प्रकारिताया ज्ञानांशे, तदंशे च विशेष्यिताया विशेषणतया भानं न

---

लौकिकज्ञानमात्रस्यैव प्रामाण्यविषयकत्वेन प्रामाण्यविषयितायां स्वाश्रयलौकिकत्वव्यापकत्व-मत्त्वम्। अत्र प्रामाण्यनिरूपितविशिष्टविषयितायाः पक्षत्वम्। स्वाश्रयलौकिकत्वव्यापकत्व-रूपभावकोटिर्मिश्राणाम्। तदभावकोटिर्नैयायिकादीनाम्। लौकिकत्वव्यापकत्वादि-निवेशप्रयोजनन्तु पूर्ववदवगन्तव्यम् ॥४६॥

मिश्रमते प्रामाण्यस्य स्वतोग्राह्यत्वमुपपादयति "अत्र **मुरारिमतानुयायिन**"इति। घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वमेव प्रामाण्यम्। अनुव्यवसाये विशेष्यकत्वप्रकार-कत्वयोर्भानेऽपि विशेष्यकत्वस्य प्रकारकत्वांशेऽविशेषणत्वात् कथं तादृशानुव्यवसायस्य तादृश-विशिष्टप्रामाण्यविषयकत्वमित्यत आह "**तत्र चे**"ति। ननु तथापि तादृशप्रामाण्यघटकीभूत-प्रकारकत्वांशे घटो विशेषणम्, तद्घटकीभूतविशेष्यित्वांशे च धर्मी विशेषणम्, अनुव्यवसाये च तत्तदंशे तदनवगाहनात् कथं प्रामाण्यभानमित्याशङ्कां प्रकारित्वांशे प्रकारस्य, विशेष्यित्वांशे धर्मिणो विशेषणत्वं व्यवस्थाप्य निराकरोति "**एवं प्रकारित्वांश**"इति। ननु विशेष्यित्वांशे प्रकारतया धर्मिणोऽवगाहनेऽपि धर्मिविशेष्यकत्वमेवावगाहते, न तु घटत्ववद्विशेष्यकत्वमनु-व्यवसाये धर्मिणि घटत्वस्याभानादित्यत आह "**एवं धर्म्यंश**"इति। "**किमवशिष्यते प्रामाण्यज्ञान**" इति। तथा चानुव्यवसायस्य 'घटत्ववदिदंविशेष्यितानिरूपितघटत्वप्रकारिता-वज्ज्ञानवानहमित्याकारकतया घटत्ववदिदंविशेष्यितानिरूपितघटत्वप्रकारित्वरूपविशिष्टप्रामाण्य-विषयिता निराबाधैवेति भावः ॥४७॥

**सम्भवति, विशेषणज्ञानविरहादिति वाच्यम्। मीमांसकैर्विशिष्टबुद्धौ विशेषणधीहेतुताया एवानभ्युपगमेन विशेषणज्ञानविरहस्याकिञ्चित्करत्वात्।**

**न चैवमपि विशेष्यतारूपविशेषणतावच्छेदकप्रकारकज्ञानविरहात्तद्विशिष्टप्रकारताप्रकारको बोधः कथं भविष्यतीति वाच्यम्। विशेष्ये विशेषणमिति न्यायेनैव ज्ञानांशे प्रथमं प्रामाण्यप्रकारकज्ञानोपगमात्, तत्र विशेषणतावच्छेदकप्रकारकज्ञानविरहस्याकिञ्चित्करत्वात्।**

**वस्तुतो युगपद्विशेषणतावच्छेदकादीन्द्रियसन्निकर्षादेव विशिष्टवैशिष्ट्यबोधोपपत्तौ तत्र विशेषणतावच्छेदकप्रकारकज्ञानहेतुत्वमप्रामाणिकमेव ॥४८॥**

**अथ प्रकारित्वाद्युपनीतभाने तद्विषयकज्ञानरूपप्रत्यासत्तिहेतुतायां**

---

ननु अनुव्यवसायस्य घटत्ववद्विशेष्यकत्वविशिष्टघटत्वप्रकारकत्वरूपप्रामाण्यप्रकारकत्वं न सम्भवति। अनुव्यवसायात् पूर्वं घटत्वप्रकारकत्वरूपविशेषणज्ञानविरहेण तस्य ज्ञानांशे विशेषणतया भानासम्भवात्। एवं पूर्वमनुपस्थितस्य विशेष्यित्वस्यापि प्रकारकत्वांशे भानासम्भवात्। तथा चानुव्यवसायस्य न विशिष्टप्रामाण्यावगाहित्वमित्याशङ्कते "**नचे**"ति। "**तदंशे चे**"ति। प्रकारित्वांश इत्यर्थः। परिहरति "**मीमांसकै**"रिति।

न च विशेषणज्ञानस्याहेतुत्वेऽपि विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वात् तद्विरहेण कथं तादृशप्रामाण्यग्रह इत्याशङ्कते "**न चैव**"मिति। परिहरति '**विशेष्ये विशेषण**"मिति। विशेष्ये विशेषणं तत्रापि विशेषणमित्यादिन्यायेन प्रामाण्यभानसम्भवेऽपि प्रवृत्त्याद्युपयोगिविशिष्टप्रामाण्यज्ञानासम्भवादाह "**प्रथम**"मिति। तथा चानुव्यवसाये प्रथमं विशेष्ये विशेषणमित्यादिन्यायेन प्रामाण्यग्रहः, तदनन्तरञ्च विशेषणतावच्छेदकप्रकारकज्ञानरूपानुव्यवसायबलाद् विशिष्टप्रामाण्यग्रह इति भावः।

एतत्कल्पे प्रवृत्त्याद्युपयोगिप्रामाण्यग्रहार्थमनुव्यवसायाद्भिन्नमेव ज्ञानान्तरं कल्प्यमिति गौरवादिति मिश्रमते प्रकृतसमाधानमाह-"**वस्तुत**"इति ॥४८॥

तद्विषयकज्ञानासत्त्वे तद्विषयकोपनीतभानं न जायते तद्विषयकज्ञानसत्त्वे तु जायते इत्यन्वयव्यतिरेकात् तद्विषयकोपनीतभानं प्रति तज्ज्ञानं हेतुरिति सर्वेषामेव सम्मतम्। तत्र विशेषणज्ञानादिहेतुत्वानभ्युपगन्तृमीमांसकमते तद्विषयकोपनीतभानं प्रति तज्ज्ञानत्वेन हेतुत्वं विशेषणज्ञानादिहेतुत्वाभ्युपगन्तृन्यायादिमते तु तत्प्रकारकज्ञानं प्रति तज्ज्ञानत्वेन हेतुत्वम्। आद्ये तद्विषयकोपनीतभानत्वस्य लौकिकान्यतद्विषयकप्रत्यक्षत्वरूपतया कार्यतावच्छेदके लौकिकान्यत्वप्रवेशेन गौरवात्, द्वितीये च लौकिकान्यत्वा-

लाघवात् तत्प्रकारकज्ञानत्वस्यैव जन्यतावच्छेदकत्वमुपेयते । न तु लौकिकान्यतद्विषयकप्रत्यक्षत्वस्य । एवञ्च प्रकारित्वादिज्ञानं विना तज्ज्ञानासम्भवात् कथमनुव्यवसाये प्रामाण्यभानम् ।

न चैवं भवतामेव कथ'मयं घट' इत्यादिव्यवसायान्तरमिदं घटत्वेन जानामी'त्याद्याकारको घटत्वादिप्रकारकत्वप्रकारकोऽनुव्यवसाय इति वाच्यम् । यतः प्राथमिकानुव्यवसाये प्रकारित्वप्रकारकत्वं न वयं मन्यामहे । अपि तु तादृशसम्बन्धेन प्रकारादेरेव ज्ञानांशे तथात्वमिति नानुपपत्तिरिति चेत् ॥४९॥

न, प्रकारित्वादिज्ञानस्य जन्यतावच्छेदकं यदि तत्प्रकारकज्ञानत्वं

---

प्रवेशेन लाघवात् द्वितीयकल्प एवादरणीयः । तथा च प्रकारित्वज्ञानं विना प्रकारित्वप्रकारकज्ञानासम्भवात् कथमनुव्यवसाये प्रकारित्वघटितप्रामाण्यभानमित्याशङ्कते "**अथे**"ति । "**तत्प्रकारकज्ञानत्वस्यैवे**"ति । तथा च तत्प्रकारकज्ञानं प्रति तद्विषयकज्ञानत्वेन हेतुत्वमिति भावः । अत्र तद्विषयकज्ञानत्वस्य जन्यतावच्छेदकत्वे प्राथमिकघटादिप्रत्यक्षे तद्विषयकज्ञानजन्यत्वाभावाद् व्यभिचारवारणाय "**तत्प्रकारके**"ति । तत्प्रकारकत्वमात्रस्य जन्यतावच्छेदकत्वे जीवनयोनिप्रयत्ने ज्ञानजन्यत्वाभावाद् व्यभिचारस्तद्वारणाय ज्ञानत्वं निवेशितम् ।

"**न तु लौकिकान्यतद्विषयकप्रत्यक्षत्वस्ये**"ति । एतत्कल्पे तद्विषयकप्रत्यक्षत्वस्य तज्ज्ञानजन्यतावच्छेदकत्वं न सम्भवति लौकिकसन्निकर्षजन्यप्राथमिकतद्विषयकप्रत्यक्षे व्यभिचारादतो "**लौकिकान्ये**"ति । लौकिकान्यप्रत्यक्षत्वमात्रस्य तज्ज्ञानजन्यतावच्छेदकत्वे लौकिकान्यापरविषयकप्रत्यक्षे व्यभिचार इति **तद्विषयके**"ति । लौकिकान्यतद्विषयकत्वमात्रस्य लौकिकान्यतद्विषयकज्ञानत्वस्य वा तज्ज्ञानजन्यतावच्छेदकत्वे अप्रसिद्धसाध्यकानुमितौ साध्यज्ञानजन्यत्वाभावाद् व्यभिचार इति प्रत्यक्षत्वं निवेशितम् ।

शङ्कते "**नचैव**"मिति । "**भवतां**" विशेषणज्ञानहेतुतावादिनां नैयायिकानाम् । "**अनुव्यवसाय इतो**"ति । अनुव्यवसायात् पूर्वं घटत्वप्रकारकत्वविषयकज्ञानासत्त्वाद् अनुव्यवसाये कथं घटत्वप्रकारकत्वं प्रकारतया भासत इत्याशयः । परिहरति "**यत**" इति । "**वयं**" विशेषणज्ञानहेतुतावादिनो नैयायिकाः । "**तथात्वं**" प्रकारत्वम् । तथा चानुव्यवसायात् पूर्वं व्यवसायेन घटत्वादेरुपस्थित्या अनुव्यवसाये ज्ञानांशे घटत्वादेः प्रकारतासम्बन्धेन प्रकारे बाधकाभाव इति भावः ॥४९॥

**तदा तन्मुख्यविशेष्यकमानसोपनीतभानासंग्रहः। अतस्तद्विषयकप्रत्यक्षत्वमेव तथा वाच्यम्, तत्र च लौकिकान्यत्वमवश्यं निवेशनीयम्। अन्यथोपदर्शित-तत्तत्संसर्गकलौकिकमानस एव व्यभिचारप्रसङ्गात्। तथा च तत्प्रकारता-शालिबोधेऽपि बाधकाभाव एवेति ॥५०॥**

---

अथ प्रकारित्वाद्युपनीतभान इत्यादिना नैयायिकोक्तपूर्वपक्षे मिश्राणां समाधानमाह "**न प्रकारित्वादिज्ञानस्ये**"ति। "**प्रकारित्वादिज्ञानस्य**" प्रकारित्वविषयकज्ञानस्य। "**तत्प्रकारकज्ञानत्वं**" प्रकारित्वप्रकारकज्ञानत्वम्। "**तन्मुख्यविशेष्यके**"ति। प्रकारित्व-मुख्यविशेष्यकेत्यर्थः। "**मानसोपनीतभानासंग्रह**" इति। घटत्वप्रकारकज्ञाननाशानन्तरं घटत्वप्रकारकत्वादिसकलपदार्थोपस्थित्या 'घटत्वप्रकारकत्वं मया ज्ञात'मित्याकारकमानसज्ञाने प्रकारकत्वज्ञानजन्यत्वस्य सर्वसम्मततया तत्र च प्रकारकत्वप्रकारकज्ञानत्वस्यासत्त्वेन प्रकारकत्व-ज्ञानजन्यताया न्यूनवृत्तित्वान्न तस्य प्रकारकत्वज्ञानजन्यतावच्छेदकत्वमिति भावः।

"**अतस्तद्विषयकप्रत्यक्षत्वमेवे**"ति। साध्यज्ञानाजन्याया अप्रसिद्धसाध्यकानुमितेः साध्यविशेष्यकत्वनियमाज्जन्यतावच्छेदककोटौ तत्प्रकारकत्वनिवेशेनैव तत्र व्यभिचारवारण-सम्भवात् प्रत्यक्षत्वपर्यन्तनिवेशो व्यर्थ इति न्यायमते तत्प्रकारकज्ञानत्वमेव जन्यतावच्छेदक-मुक्तम्। मीमांसकमते तु जन्यतावच्छेदककोटौ तद्विषयकत्वनिवेशादप्रसिद्धसाध्यकानुमितौ साध्यविशेष्यकत्वरूपसाध्यविषयकत्वसत्त्वेन ज्ञानत्वनिवेशे तत्र व्यभिचाराज्ज्ञानत्वमुपेक्ष्य प्रत्यक्षत्वं निवेशितमिति ध्येयम्।

लौकिकान्यत्वनिवेशे प्रयोजनमाह "**अन्यथे**"ति। लौकिकान्यत्वानिवेशे चेत्यर्थः। "**उपदर्शिते**"ति। इदं घटत्वेन जानामीत्याकारक इत्यर्थः। "**तत्तत्संसर्गकालौकिक-मानस**"इति। प्रकारित्वादिसंसर्गकालौकिकमानस इत्यर्थः। तादृशमानसस्य घटत्वाद्यंशे अलौकिकत्वेऽपि ज्ञानांशे लौकिकत्वाल्लौकिकान्यत्वमनिवेश्य तद्विषयकप्रत्यक्षं प्रति तज्ज्ञानत्वेन हेतुताकल्पने तादृशज्ञानविषयकमानसज्ञाने व्यभिचारः। तत्पूर्वं ज्ञानविषयकज्ञानविरहात्। अतो लौकिकान्यत्वं जन्यतावच्छेदककुक्षौ निवेश्यम्। एतदपि तत्तदंशे लौकिकभिन्नत्वं ग्राह्यम्। अन्यथा तादृशमानसस्य ज्ञानांशे लौकिकत्वेन लौकिकान्यत्वविरहाद् घटत्वादिज्ञान-स्याकिञ्चित्करत्वाद् घटत्वादिज्ञानशून्यकाले तादृशप्रकारित्वादिसंसर्गकघटत्वादिप्रकारकमान-सापत्तेः। तत्तदंशे लौकिकान्यत्वनिवेशे च घटत्वांशे लौकिकान्यत्वसत्त्वाद् घटत्वज्ञानस्या-वश्यकत्वेन न दोषः। इत्येतदभिप्रेत्य उक्तमासमे तत्तत्संसर्गकत्वांशेऽलौकिकत्वप्रदर्शनाय लौकिकान्यत्वान्तं मानसे विशेषितम्।

**अथ ज्ञानानुव्यवसायेनैव प्रामाण्यं गृह्यते न त्विच्छानुव्यवसायेनापीति मिश्राणां सिद्धान्तः। अतएव प्रथमविप्रतिपत्तिव्याख्यावसरे तद्वति तत्प्रकारकत्वस्य यावदाश्रयान्तःपातिनामिच्छादीनां ग्राहकेण तदग्रहणात् प्रसक्तस्य यावत्स्वाश्रयग्राहकग्राह्यत्वरूपसाध्यस्य बाधवारणरूपपक्षीयज्ञानपदप्रयोजनमुक्तं पक्षधरमिश्रैः ॥५१॥**

---

"**तथाचे**"ति। लौकिकान्यत्वनिवेशे चेत्यर्थः। "**तत्प्रकारताशालिबोधेऽपि**" प्रकारिताप्रकारताशालिबोधेऽपि। एवञ्च इदं घटत्वेन जानामीत्यादिप्राथमिकानुव्यवसायेऽपि प्रकारित्वप्रकारकत्वे बाधकाभावः। तादृशज्ञानस्य प्रकारित्वांशे लौकिकान्यत्वविरहेण तादृशज्ञानं प्रति प्रकारिताज्ञानस्याहेतुत्वात्। तथा च प्राथमिकानुव्यवसायस्यापि प्रकारित्वादिघटितप्रामाण्यभानं निराबाधमेवेति भावः ॥५०॥

तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वमेव प्रामाण्यं तत्तु यथा यथार्थज्ञाने विद्यते तथा संवादीच्छायामपि, परन्तु ज्ञानानुव्यवसायेन ज्ञाननिष्ठं प्रामाण्यं ज्ञायते न त्विच्छानुव्यवसायेन इच्छानिष्ठं प्रामाण्यमिति मुरारिमिश्राणां मतम्। तन्नोपपद्यते, ज्ञानानुव्यवसाय इव इच्छानुव्यवसायेऽपि प्रामाण्यभानापत्तेर्मनःसंयुक्तसमवेतविशेषणतारूपसन्निकर्षस्य तत्राप्यक्षतेरित्यनायत्या प्रामाण्यविषयकप्रत्यक्षं प्रति प्रामाण्यज्ञानत्वेन हेतुत्वमवश्यमङ्गीकार्यम्। तथा च प्राथमिकानुव्यवसाये कथं प्रामाण्यभानमित्याशयेन शङ्कते "**अथे**"त्यादि। "**मिश्राणां सिद्धान्त**"इति। मुरारिमिश्राणां सिद्धान्त इत्यर्थः। मुरारिमिश्राणामीदृशसिद्धान्ते पक्षधरमिश्राणां सम्मतिमाह "**अतएवे**"ति। "**व्याख्यावसर**"इति। तज्ज्ञानप्रामाण्यं स्वाश्रयग्राहकयावत्सामग्रीग्राह्यं न वेति तत्त्वचिन्तामणिकारोक्तप्रथमविप्रतिपत्तिव्याख्यावसर इत्यर्थः। "**तद्वति तत्प्रकारकत्वस्य**" तद्वति तत्प्रकारकत्वमात्रस्य। "**इच्छादीनां ग्राहकेण**" इच्छानुव्यवसायेन। "**तदग्रहणात्**" तद्वति तत्प्रकारकत्वरूपप्रामाण्याग्रहणात्। "**प्रसक्तस्य**" मुरारिमिश्रैः साधनीयस्य। "**बाधे**"ति। तादृशप्रामाण्ये स्वाश्रयरूपेच्छाग्राहकेण ग्राह्यत्वाभावाद् बाधः। "**प्रयोजनमुक्तं पक्षधरमिश्रै**"रिति। तथा च तज्ज्ञानप्रामाण्यं स्वाश्रयग्राहकयावत्सामग्रीग्राह्यं न वेति तत्त्वचिन्तामण्युक्तप्रथमविप्रतिपत्तौ तज्ज्ञानप्रामाण्यं पक्षः, अस्यार्थः ज्ञाननिष्ठप्रामाण्यम्। तत्र यदि ज्ञानपदं न स्यात् तदा प्रामाण्यमात्रस्यैव पक्षत्वेन इच्छानिष्ठप्रामाण्यस्यापि पक्षान्तर्गतत्वात् तत्र च स्वाश्रयग्राहकयावत्सामग्रीग्राह्यत्वरूपसाध्यविरहेण बाधः, तद्वारणाय ज्ञानपदमुक्तम्। तदुक्तौ च ज्ञाननिष्ठप्रामाण्यस्यैव पक्षत्वात् तत्र च स्वाश्रयग्राहकयावत्सामग्रीग्राह्यत्वरूपसाध्य-

**यत्तु इच्छानुव्यवसायेन प्रामाण्यग्रहेऽपि तादृशबाधवारणप्रयोजनकत्वं ज्ञानपदस्योपपद्यते, तदृदाने विनश्यदवस्थज्ञानजन्येच्छाप्रत्यक्षे विषयोपनायकाभावेन प्रामाण्यभानासम्भवाद् यावत्स्वाश्रयग्राहकग्राह्यत्वस्य प्रामाण्येऽसत्त्वाद् बाधप्रसक्तेरावश्यकत्वादिति ॥५२॥**

---

सत्त्वान्न बाध इति ज्ञानपदप्रयोजनमुक्तमालोकटीकायां पक्षधरमिश्रैः। एतेनेच्छानिष्ठं प्रामाण्यमनुव्यवसायेन न गृह्यत इति मुरारिमिश्राणां सिद्धान्त इत्यवगम्यत इति भावः।

ननु तद्वति तत्प्रकारकत्वमात्रं न प्रामाण्यमपि तु तद्वति तत्प्रकारकज्ञानत्वं तत्तु नेच्छायामिति न इच्छानुव्यवसायेन प्रामाण्यग्रहापत्तिरिति चेन्न। चिन्तामण्युक्ततादृशविप्रतिपत्तौ ज्ञानप्रामाण्यमिति 'प्रामाण्ये ज्ञाननिष्ठत्वविशेषणवैयर्थ्यप्रसङ्गात्। यद्यपि तद्वति तत्प्रकारकज्ञानत्वमेव प्रामाण्यम्, मणिकारीयतादृशविप्रतिपत्तौ ज्ञानपदं प्रामाण्यपदस्य ज्ञानकरणत्वार्थकत्वभ्रमनिरासायेति दीधित्युक्तज्ञानपदप्रयोजनं साधु सङ्गच्छते। एवञ्च इच्छानुव्यवसायेन ज्ञानत्वघटितप्रामाण्यग्रहो न सम्भवति। तथापि तद्वति तत्प्रकारकत्वमात्रमेव प्रामाण्यमित्युभ्युपेत्य अथेत्याद्याशङ्केति ध्येयम्॥५१॥

इच्छानुव्यवसायेन प्रामाण्यग्रहेऽपि तादृशबाधवारणप्रयोजनकत्वं ज्ञानपदस्योपपद्यत इति न मुरारिमिश्राणां तादृशसिद्धान्ते पक्षधरमिश्राणां सम्मतिरित्याशयेनाशङ्कते "**यत्त्वि**"ति। "**तद्दान**"इति। पक्षीयज्ञानपदादान इत्यर्थः। "**विनश्यदवस्थे**"ति। इष्टसाधनतादिज्ञानतृतीयक्षण इत्यर्थः। "**विषयोपनायकाभावेने**"ति। घटत्वादिविषयोपनायकाभावेनेत्यर्थः। अयम्भावः। घटत्ववद्विशेष्यकत्वविशिष्टघटत्वप्रकारकत्वमेव प्रामाण्यं तादृशप्रामाण्यज्ञाने यथा विशेष्यकत्वप्रकारकत्वादीनां भानं तथा घटत्वादिविषयाणामपि भानं भवेत्, अनुव्यवसायरूपमानसप्रत्यक्षे मनसो घटत्वादिरूपबाह्यविषयेन सह लौकिकसन्निकर्षाभावाद् व्यवसायरूपोपनायकवशादेव तेषां भानं भवेत्। इच्छानुव्यवसायेऽपि इच्छाजनकीभूतेष्टसाधनताज्ञानमुपनायकमिति इच्छानुव्यवसाये घटत्वादिविषयाणां भानसम्भवेन विशिष्टप्रामाण्यग्रहत्वमुपपद्यते। परन्तु यत्रेष्टसाधनताज्ञानद्वितीयक्षणे अपरकारणाभावात् प्रतिबन्धकाद्वा नेच्छोत्पन्ना अपि तु तत्तृतीयक्षणे, तत्र घटत्वादिरूपविषयोपनायकस्येष्टसाधनताज्ञानस्य पूर्वमभावात् तादृशेच्छानुव्यवसाये घटत्वादिविषयभानासम्भवेन न तादृशविशिष्टप्रामाण्यभानम्। पक्षकुक्षौ ज्ञानपदादाने तादृशविनश्यदवस्थज्ञानजन्येच्छानिष्ठं प्रामाण्यमपि पक्षान्तर्गतं स्यात्, तत्र च स्वाश्रयग्राहको यस्तादृशेच्छानुव्यवसायस्तद्ग्राह्यत्वा-

**तन्न, विषयविनिर्मोकेण सविषयकपदार्थभानस्य सिद्धान्तविरुद्धतया विषयोपनायकविरहे इच्छाद्यनुव्यवसायस्यैवानुदयात्। विषयविनिर्मोकेण तद्भानेऽपि न बाधसम्भावना। विषयमविषयीकुर्वती या स्वाश्रयं न गृह्णाति तादृशसामग्र्या एव मिश्रैः साध्ये निवेशितत्वात्। तन्मते इच्छाद्यनुव्यवसायेन प्रामाण्यं न गृह्यत एवेति सर्वथोपगन्तव्यम्॥५३॥**

**तत् कथमुपपद्यताम्, उपदर्शितरीत्या ज्ञानानुव्यवसायेनेव इच्छानु-**

---

भावाद् बाध इति तद्वारणरूपपक्षीयज्ञानपदप्रयोजनवर्णनं मिश्राणां सङ्गच्छते। तथा च इच्छानुव्यवसायस्य प्रामाण्यग्राहकत्वेऽपि ज्ञानपदव्यावृत्तिरुपपद्यत इत्याशयः॥५२॥

एतन्मतं दूषयति "**तन्ने**"ति। "**इच्छाद्यनुव्यवसायस्यैवानुदया**"दिति। इच्छांशे विषयभासकाभावात्, निर्विषयकेच्छाप्रत्यक्षासम्भवाच्च विनश्यदवस्थज्ञानजन्येच्छाया अनुव्यवसाय एव न भवतीत्यर्थः।

ननु 'ममेच्छा जाता' इत्यादि वाक्यादिच्छापदाद् विषयविनिर्मोकेण इच्छाविषयकः शाब्दबोधो भवतीति कथं विषयविनिर्मोकेण सविषयपदार्थभानं सिद्धान्तविरुद्धमित्यत आह "**विषयविनिर्मोकेण तद्भानेऽपी**"ति।

"**विषयमविषयीकुर्वती**"ति। प्रामाण्याश्रयीभूतज्ञानादिविषयमविषयीकृत्य या सामग्री प्रामाण्याश्रयं गृह्णाति तादृशसामग्रीभिन्नसामग्रीग्राह्यत्वं साध्यमिति पर्यवसितमित्यर्थः। तथा च विषयितासम्बन्धेन किञ्चिदनवच्छिन्नस्वाश्रयविषयिताशालिग्रहाजनकसामग्रीग्राह्यत्वमेव पक्षधरमिश्राणां मते साध्यमिति भावः। एवञ्च विनश्यदवस्थज्ञानजन्येच्छास्थले तादृशेच्छाया विषयविनिर्मोकेण भानात् तादृशेच्छानुव्यवसायसामग्री विषयितासम्बन्धेन किञ्चिदनवच्छिन्न-स्वाश्रयविषयताशालिग्रहजनिकैवेति तादृशग्रहाजनकत्वासत्त्वात् तद्ग्राह्यत्वाभावेऽपि न बाधः। अत इच्छानुव्यवसाये प्रामाण्यभानस्वीकारे विनश्यदवस्थज्ञानजन्येच्छाप्रत्यक्षमादाय न बाध-सम्भावना। अतो विनश्यदवस्थज्ञानजन्येच्छानिष्ठप्रामाण्ये बाधवारणप्रयोजनकत्वोपवर्णनं पक्षधरमिश्राणां न सङ्गच्छत इति भावः। तथाच ज्ञानद्वितीयक्षणोत्पन्नेच्छानिष्ठप्रामाण्ये बाधवारणायैव ज्ञानपदमिति मिश्राणामाशयः। तच्च इच्छानुव्यवसायेन प्रामाण्याग्रहणे एव सम्भवतीति भावः। "**सर्वथोपगन्तव्य**"मिति। पक्षीयज्ञानपदप्रयोजनासङ्गतेरिति शेषः॥५३॥

"**उपदर्शितरीत्ये**"ति। ज्ञानानुव्यवसाये यथा प्रामाण्यघटकीभूतप्रकारकत्व-विशेष्यकत्वादिसकलपदार्थभानात् प्रामाण्यमपि भासते तादृशरीत्यैव इच्छानुव्यवसायेऽपि

व्यवसायेनापि प्रामाण्यग्रहे बाधकाभावात् अतः प्रामाण्यग्रहं प्रति प्रामाण्यज्ञानत्वेन हेतुत्वमवश्यमभ्युपेयम्। तत् कथं ज्ञानानुव्यवसाय एवानुपस्थितं प्रामाण्यं गृह्णातीति चेत् ॥५४॥

न, इच्छानुव्यवसायेन प्रामाण्यं मुरारिमतेन गृह्यत इत्यत्र पक्षधरमिश्राणां निर्भरः। यावता तत्रैव "इच्छायामपि तद्ग्राहकेण तद्धर्मग्रह" इत्यादिना इच्छानुव्यवसायस्य प्रामाण्यग्राहकतामुपगम्य तैरेव ज्ञानपदवृत्त्यन्तरमुपदर्शितम्। तथाच तन्मते इच्छानुव्यवसाये प्रामाण्यग्राहकतायाः सन्दिग्धत्वादभ्युपगम एवोचितः। अन्यथोक्तकारणताकल्पनाधिक्यात् ॥५५॥

---

प्रामाण्यघटकीभूतसकलपदार्थभानात् प्रामाण्यभाने बाधकाभाव इत्यर्थः। "**प्रामाण्यग्रहं प्रती**"ति। प्रामाण्यप्रत्यक्षं प्रतीत्यर्थः। तेन नान्योऽन्याश्रयः, "**तत् कथं ज्ञानानुव्यवसाय**" इति। इच्छानुव्यवसाये प्रामाण्यग्रहापत्तिवारणाय प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यविषयकज्ञानत्वेन हेतुताकल्पनस्यावश्यकतया कथं ज्ञानानुव्यवसायेन प्रामाण्यं गृह्यते तत्पूर्वं प्रामाण्यविषयकज्ञानविरहादिति भावः। ॥५४॥

उक्तपूर्वपक्षे समाधानमाह "**न इच्छानुव्यवसायेने**"ति। "**निर्भर**" इति। तथा चेच्छानुव्यवसायेन प्रामाण्यग्रहस्येष्टत्वात् तद्वारणाय प्रामाण्यग्रहं प्रति प्रामाण्यज्ञानत्वेन हेतुत्वं न कल्पत इति ज्ञानानुव्यवसाये प्रामाण्यभाने बाधकाभाव इति भावः। इच्छानुव्यवसायस्य प्रामाण्यग्राहकतायां पक्षधरमिश्राणां निर्भरत्वे युक्तिमाह "**यावते**"ति। "**तत्र**" चिन्तामण्युक्तप्रथमविप्रतिपत्तिव्याख्यायाम्। "**तद्ग्राहकेण**" इच्छाग्राहकेण, इच्छानुव्यवसायेनेति यावत्। "**तद्धर्मग्रहः**" इच्छानिष्ठतद्वतितत्प्रकारकत्वरूपप्रामाण्यग्रहः। "**ज्ञानपदवृत्त्यन्तर**"मिति। यादृशस्थले तद्धर्मप्रकारकं ज्ञानमुत्पद्यते परन्तु तद्धर्मप्रकारकज्ञानस्यानुव्यवसायो नोत्पद्यते तत्र तद्धर्मप्रकारकज्ञाननिष्ठप्रामाण्यस्यापि पक्षान्तर्गततया तत्र स्वाश्रयग्राहकसामग्रीग्राह्यत्वरूपविधिकोटेरसत्त्वाद् बाधस्तद्वारणाय ज्ञानेति। तथा च ज्ञानस्य प्रामाण्यमिति विषयत्वार्थकषष्ठीसमासाश्रयणाज् ज्ञानविषयीभूतप्रामाण्यरूपार्थकत्वेन पूर्वोपदर्शितप्रामाण्यस्य ज्ञानविषयत्वाभावात् तस्य पक्षानन्तर्गततया न बाध इति ज्ञानपदप्रयोजनान्तरं दर्शितमिति भावः। इच्छानुव्यवसायस्य प्रामाण्याग्राहकत्वे दोषमाह "**अन्यथे**"ति। "**उक्तकारणताकल्पनाधिक्या**"दिति। यदि इच्छानुव्यवसायेन प्रामाण्यं न गृह्यते तदा, तदापत्तिवारणाय प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यज्ञानत्वेन हेतुताकल्पनाधिक्यादिति भावः ॥५५॥

**यदि च इच्छानुव्यवसायेन न प्रामाण्यं गृह्यत इत्येवं तेषां मतं तदापि प्रामाण्यप्रत्यक्षत्वावच्छिन्नं प्रति प्रामाण्यज्ञानत्वेन हेतुता न कल्प्यते। परन्तु लाधवाद् विशेष्यतया प्रामाण्यप्रकारकप्रत्यक्षं प्रति तादात्म्यसम्बन्धेन ज्ञानत्वेनैवेति न ज्ञानानुव्यवसायेन प्रामाण्यग्रहानुपपत्तिः। न वा इच्छायां तद्ग्रहापत्तिः। प्रामाण्यप्रकारता लौकिकी ग्राह्या। अतो नेच्छादौ उपनीतप्रामाण्यग्रहानुपपत्तिः ॥५६॥**

**न चैवमपि इच्छानुव्यवसाये विशेष्यतया तत्प्रामाण्यभानापत्तिरिति वाच्यम्। प्रामाण्यविशेष्यकलौकिकप्रत्यक्षस्य कुत्राप्यनभ्युपगमेनाप्रसिद्धया, तद्विशेष्यकोपनीतभानस्य चोपनायकज्ञानविरहेणाप्यसम्भवात् ॥५७॥**

---

मुरारिमिश्रमते इच्छानुव्यवसायेन प्रामाण्यं गृह्यते न वेत्यत्र सन्देहाद्, यदीच्छानुव्यवसायेन प्रामाण्यं न गृह्यते तदा इच्छानुव्यवसायेन प्रामाण्यग्रहापत्तिवारणाय अगत्या प्रामाण्यग्रहं प्रति प्रामाण्यज्ञानत्वेन हेतुत्वमवश्यं कल्प्यं। तथाच कथं ज्ञानानुव्यवसायो अनुपस्थितं प्रामाण्यं गृह्णातीत्याशङ्कादुरुद्धारेति पूर्वपक्षं निरसितुमाह "**यदि चे**"ति। "**ज्ञानत्वेनैवे**"ति। पूर्वोक्तस्य 'हेतुता न कल्प्यत' इत्यस्य नञ् परित्यज्य हेतुता कल्प्यत इत्यनेनान्वयः। तथा च एतादृशकार्यकारणभावाद् यत्र तादात्म्यसन्बन्धेन ज्ञानं विद्यते तत्रैव विशेष्यतासम्बन्धेन प्रामाण्यप्रकारकप्रत्यक्षमुत्पद्यत इति नियमाद् इच्छायां तादात्म्यसम्बन्धेन ज्ञानविरहान् न तत्र विशेष्यतासम्बन्धेन प्रामाण्यप्रकारकप्रत्यक्षमुत्पद्यत इति इच्छानुव्यवसायेन इच्छाविशेष्यकप्रामाण्यप्रकारकप्रत्यक्षापत्तिर्न सम्भवति। व्यवसायात्मकज्ञाने च तादात्म्यसम्बन्धेन ज्ञानसत्त्वाज्ज्ञानानुव्यवसायेन व्यवसायविशेष्यकप्रामाण्यप्रकारकप्रत्यक्षं सम्भवत्येव। "**लौकिकी ग्राह्ये**"ति। तथा च विशेष्यतासम्बन्धेन प्रामाण्यत्वावच्छिन्नलौकिकप्रकारताशालिप्रत्यक्षं प्रति तादात्म्यसम्बन्धेन ज्ञानत्वेन हेतुतेति भावः ॥५६॥

ननु पूर्वोक्तकार्यकारणभावबलादिच्छानुव्यवसायेन प्रामाण्यप्रकारकप्रत्यक्षासम्भवेऽपि प्रामाण्यविशेष्यकप्रत्यक्षं स्यादित्याशङ्कते "**न चे**"ति।

ननु इच्छानुव्यवसायेन प्रामाण्यविशेष्यकलौकिकप्रत्यक्षापत्तिः प्रामाण्यविशेष्यकालौकिकप्रत्यक्षापत्तिर्वा? आद्ये दोषमाह "**प्रामाण्ये**"ति। "**अप्रसिद्धे**"ति। आपत्त्यसम्भवादित्यनेनान्वयः। द्वितीये दोषमाह "**तद्विशेष्यके**"ति। "**उपनायकज्ञानविरहेणे**"ति। इच्छानुव्यवसायपूर्वं प्रामाण्यविषयकोपस्थित्यसत्त्वेनेत्यर्थः। तत्र प्रामाण्यविषयकोपस्थितिसत्त्वे त्विष्टापत्तिरेवेति भावः ॥५७॥

**अथैवं ज्ञानान्यविशेष्यकप्रामाण्यलौकिकप्रत्यक्षस्याप्रसिद्धतया ज्ञानविशेष्यकतल्लौकिकप्रत्यक्षस्य च तथाविधज्ञानरूपविषयविरहेण नेच्छानुव्यवसायदशायामापत्तिरित्युपदर्शितहेतुहेतुमद्भावकल्पनं विनाप्युपपत्तिरिति चेत्, समाहितमेवैतदस्माकमिति ॥५८॥**

**नैयायिकानुयायिनः—प्रथमानुव्यवसायस्य प्रामाण्यग्राहकत्वे व्यवसायतृतीयक्षणे तद्धर्मिकप्रामाण्यसंशयानुपपत्तिरित्यनायत्या प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यज्ञानत्वेन हेतुता कल्प्यतेऽतो न प्रामाण्यस्य स्वतस्त्वम्।**

---

इच्छात्वावच्छिन्नविशेष्यतानिरूपितप्रामाण्यत्वावच्छिन्नलौकिकप्रकारताशालिप्रत्यक्षस्याप्रसिद्धया तादृशप्रत्यक्षापत्तिर्न सम्भवति। ज्ञानत्वावच्छिन्नविशेष्यतानिरूपितप्रामाण्यत्वावच्छिन्नलौकिकप्रकारताशालिप्रत्यक्षस्य प्रसिद्धत्वेऽपि प्रत्यक्षे विषयस्य हेतुतया तादृशप्रत्यक्षे ज्ञानरूपविषयस्यापि हेतुत्वाद् इच्छानुव्यवसायस्थले ज्ञानरूपविषयविरहेण नापत्तिरिति इच्छानुव्यवसायेन प्रामाण्यलौकिकप्रत्यक्षस्य सम्भावनैव नास्तीति तद्वारणाय तादात्म्यसम्बन्धेन ज्ञानत्वेन हेतुत्वकल्पनं व्यर्थमित्याशङ्कते "**अथैव**"मिति।

"**समाहितमेवे**"ति। धर्मितावच्छेदकं निवेश्यात्मनिष्ठप्रत्यासत्त्या कार्यकारणभावापेक्षया धर्मितावच्छेदकमनिवेश्य विशेष्यनिष्ठतया विशेष्यतासम्बन्धेन लघुतरकार्यकारणभावकल्पनमेव युक्तं। एवञ्च प्रामाण्यप्रकारकलौकिकप्रत्यक्षत्वमात्रं कार्यतावच्छेदकं तथा च विशेष्यतासम्बन्धेन प्रामाण्यप्रकारकलौकिकप्रत्यक्षत्वावच्छिन्नस्य व्यवसाये प्रसिद्धस्य इच्छायामापत्तिरिति तद्वारणाय तादृशप्रत्यक्षं प्रति तादात्म्येन ज्ञानत्वेन हेतुत्वं युक्तमिति भावः ॥५८॥

इति मुरारिमिश्राणां मतवर्णनम् ॥

न्यायमतेन मुरारिमिश्रमतखण्डनप्रकारं दर्शयति "**नैयायिकानुयायिन**" इति। "**व्यवसायतृतीयक्षण**"इति। संशयं प्रति धर्मिज्ञानस्य कारणत्वात्, द्वितीयक्षणे अनुव्यवसायेन व्यवसायात्मकधर्मिग्रहात् तत्तृतीयक्षणे संशय उत्पद्यत इति भावः। ननु संशयं प्रति साधारणादिधर्मज्ञानजन्यकोट्युपस्थितेर्हेतुत्वाद्, व्यवसायपूर्वं कोट्युपस्थितौ अनुव्यवसायक्षणे तन्नाशेन कथं संशयः? अनुव्यवसायानन्तरं कोट्युपस्थितौ च कोट्युपस्थितिक्षणे व्यवसायरूपधर्मिनाशात् कथं संशयः? न च संशये धर्मिणोऽहेतुत्वेन धर्मिनाशस्याकिञ्चित्करत्वमिति वाच्यम्। संशयस्य प्रत्यक्षात्मकतया प्रत्यक्षे चेन्द्रियसन्निकर्षस्यावश्यकत्वेन कोट्युपस्थितिक्षणे धर्मिनाशे धर्मीन्द्रियसन्निकर्षासम्भवान्न संशयः। न चानुव्यवसाय एव व्यवसायेन सह ज्ञानलक्षणरूपालौकिकसन्निकर्षः स च कोट्युपस्थिति-

**न च प्रकारित्वविशेष्यित्वादिप्रामाण्यघटकपदार्थानां विसकलितोपस्थिति-दशायामपि विशेष्ये विशेषणमिति न्यायेन प्रामाण्योपनीतभानोदयात् कथं प्रत्यक्षं प्रति प्रामाण्यविषयकज्ञानत्वेन हेतुतेति वाच्यम्। विशिष्टप्रामाण्य-ग्रहं विना विशेष्ये विशेषणमिति न्यायेनापि प्रामाण्यप्रत्यक्षानभ्युप-गमात्॥५९॥**

**अतएव चिन्तामणिकृता प्रामाण्यरूपविशिष्टसाध्योपस्थितिं विना व्याप्ति-ग्रहासम्भवेन कथं प्रामाण्यानुमितिरिति पूर्वपक्षमाशङ्क्य प्राग्भवीयसंस्कारा-धीनप्रामाण्यस्मरणमूलकव्याप्तिग्रहात् प्रामाण्यानुमितिरिति साम्प्रदायिक-सिद्धान्तो दर्शितः॥६०॥**

---

क्षणेऽपि सत्त्वात् संशये धर्मिभाननियामकोऽस्त्विति वाच्यम्। तथापि न व्यवसाय-तृतीयक्षणे संशयसम्भव इति 'व्यवसायतृतीयक्षण' इति ग्रन्थस्यासङ्गतिरिति चेत्। सत्यम्, व्यवसायतृतीयक्षण इत्यस्य व्यवसायस्थितिक्षणादारभ्य तृतीयक्षण इत्यर्थकत्वात्। व्यवसायोत्पत्तिचतुर्थक्षण इति यावत्। तथा च तदानीं संशयसम्भवान्न ग्रन्थासङ्गतिरिति ध्येयम्। "**हेतुते**"ति। तथा चानुमानादिना प्रथमं प्रामाण्ये ज्ञात एव प्रामाण्यस्य प्रत्यक्षं भवेत्, प्रामाण्यज्ञानात्मककारणसत्त्वात्।

उक्तकार्यकारणभावे व्यतिरेकव्यभिचारमाशङ्कते "**नचे**"ति। वाच्यमिति परेणान्वयः। "**प्रत्यक्षं प्रती**"ति। प्रामाण्यप्रत्यक्षं प्रतीत्यर्थः। उक्तपूर्वपक्षं निरस्यति "**विशिष्ट-प्रामाण्ये**"ति। "**अनभ्युपगमा**"दिति। वस्तुतस्तु विशेष्ये विशेषणमिति रीत्या प्रामाण्यस्य ग्रहेऽपि प्रवृत्त्याद्यनुदयात् प्रवृत्त्याद्युपयोगिविशिष्टप्रामाण्यग्रहस्यात्र विचार्यत्वेन तादृशविशिष्टप्रामाण्यप्रत्यक्षं प्रति प्रामाण्यज्ञानस्यावश्यकत्वेन स्वतस्त्वं दुर्घटमिति विशिष्ट-प्रामाण्यग्रहं विना विशेष्ये विशेषणमित्यादिन्यायेन प्रामाण्यप्रत्यक्षाभ्युपगमेऽपि क्षतिविरहा-दिति ध्येयम्॥५६॥

विशेष्ये विशेषणमिति न्यायेन प्रामाण्यप्रत्यक्षानभ्युपगमे चिन्तामणिकारसम्मतिमाह "**अतएवे**"ति। "**प्राग्भवीयसंस्काराधीने**"ति। ननु प्राग्भवीयप्रामाण्यसंस्कारार्थं प्रामाण्यानुभव आवश्यकः, तस्य प्रत्यक्षत्वे तत्र प्रामाण्यज्ञानान्तरं कल्प्यं प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यज्ञानत्वेन हेतुत्वात्। तादृशप्रामाण्यज्ञानं यदि अनुमित्यात्मकं तदा तत्रापि व्याप्ति-ग्रहार्थं तत्प्राग्भवीयसंस्कारः कल्प्य इत्यनवस्थेति चेन्न। प्रामाण्यग्रहसंस्कारधाराया अनादितया बीजाङ्कुरवत् प्रामाणिकत्वान्न दोषः॥६०॥

**स्वयञ्च अप्रसिद्धसाध्यकपरामर्शाद् अप्रामाण्याभावरूपप्रामाण्यविशेष्यकानुमानं प्रथमम्। तदनन्तरञ्च वह्नित्वाभाववद्विशेष्यकत्वे सति सविशेष्यकत्वेन**

---

ननु उक्तरीत्या प्राग्भवीयसंस्कारजन्यस्मृतिस्वीकारे प्राथमिकानुव्यवसायपूर्वमपि तादृशस्मरणे बाधकाभावात् प्रामाण्यज्ञानत्वेन कारणताकल्पनेऽपि प्राथमिकानुव्यवसायस्य प्रामाण्यग्राहकत्वं निराबाधमेवेति नैतन्मते चिन्तामणिकाराणां निर्भर इति चिन्तामणिकारमतं दर्शयति "**स्वयञ्चे**"ति। "**स्वय**" चिन्तामणिकारेण, सिद्धान्तितमिति परेणान्वयः। "**प्रथम**"मिति,। प्रथमानुमितौ इदंविशेष्यकवह्नित्वप्रकारकानुभवः पक्षः, वह्नित्वाभाववद्विशेष्यकत्वविशिष्टवह्नित्वप्रकारकत्वात्मकाप्रामाण्याभावरूपप्रामाण्यं साध्यं दाहसमर्थविशेष्यकवह्नित्वप्रकारकनिश्चयत्वं हेतुः। तथाचायं प्रयोगः—इदंविशेष्यकवह्नित्वप्रकारकानुभवे वह्नित्वाभाववद्विशेष्यकत्वविशिष्टवह्नित्वप्रकारकत्वाभावो दाहसमर्थविशेष्यकवह्नित्वप्रकारकनिश्चयत्वाद् यन्नैवं तन्नैवं यथा वह्न्यप्रमेति। ननु अप्रामाण्याभावरूपप्रामाण्यस्यापि पूर्वमनुपस्थितत्वात् कथं परामर्शः इत्यत आह "**अप्रसिद्धसाध्यकपरामर्शा**"दिति। साध्याविषयकव्यतिरेकव्याप्तिविशिष्टहेतुमत्तानिश्चयादित्यर्थः। व्यतिरेकव्याप्तिश्च साध्याभावव्यापकीभूताभावप्रतियोगित्वं हेतौ। यत्र अभावस्य साध्यता तत्र यदि साध्याभावस्य साध्यीयप्रतियोगितावच्छेदकरूपेण व्यतिरेकव्याप्त्यंशे निवेशः क्रियते तदैवाप्रसिद्धसाध्यकपरामर्शो भवेत्। तथाचात्र वह्नित्वाभाववद्विशेष्यकत्वविशिष्टवह्नित्वप्रकारकत्वव्यापकाभावप्रतियोगिदाहसमर्थविशेष्यकवह्नित्वप्रकारकनिश्चयत्ववान् इदंविशेष्यकवह्नित्वप्रकारकानुभव इति परामर्शे साध्यस्य वह्नित्वाभाववद्विशेष्यकत्वविशिष्टवह्नित्वप्रकारकत्वाभावरूपस्याविषयत्वाद् उक्तपरामर्शस्याप्रसिद्धसाध्यकपरामर्शत्वम्। ननु एतादृशाप्रसिद्धसाध्यकपरामर्शेऽपि वह्नित्वाभाववद्विशेष्यकत्वविशिष्टवह्नित्वप्रकारकत्वरूपाप्रामाण्योपस्थितिरावश्यकी तदुपस्थितिः कथं भवेदिति चेत्। 'बाधानन्तरं स्मृत्युपनीते अग्रे वह्नित्वाभाववति वह्नित्वेन मम ज्ञानं वृत्तमित्यप्रामाण्यं मनसैव परिच्छिद्यते मानान्तरेण वेति सर्वजनसिद्ध'मिति मणिकारेणैव समाहितम्। "**मानान्तरेण**" अनुमानेन, तथाच विफलप्रवृत्तिजनकत्वहेतुना वह्नित्वाभाववति वह्नित्वप्रकारकत्वरूपाप्रामाण्यानुमानमपि सम्भवतीत्यर्थः। "**प्रामाण्यविशेष्यकानुमान**"मिति। न्यायमते विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वाद् अप्रसिद्धसाध्यकपरामर्शस्थले साध्यरूपविशेषणज्ञानासम्भवान् न साध्यविशेषणकानुमितिः सम्भवति। अतः साध्यविशेष्यकानुमानमित्युक्तम्।

ननु उक्तरीत्या अप्रामाण्याभावरूपप्रामाण्यग्रहेऽपि प्रवृत्त्याद्युपयोगि तद्वति तत्प्रकारकत्व-

**हेतुना वह्नित्वप्रकारकत्वादिरूपपक्षतावच्छेदकविशिष्टे वह्न्यादिविशेष्यकत्वानुमानमिति सिद्धान्तितम् ॥६१॥**

**तत्र च वह्नित्वादिप्रकारकत्वविशिष्टे वह्न्यादिविशेष्यकत्वसिद्धावपि न प्रामाण्यसिद्धिः। वह्निगुञ्जयोर्गुञ्जात्ववह्नित्वभ्रमसाधारण्येन तावन्मात्रस्य**

---

रूपप्रामाण्यग्रहो दुर्घट एवेत्यत आह "**तदनन्तरञ्चे**"ति। "**सिद्धान्तित**"मिति। तथा चायं प्रयोगः—इदंविशेष्यकवह्नित्वप्रकारकानुभवे वह्निविशेष्यकत्वं वह्नित्वाभाववद्विशेष्यकत्वे सति सविशेष्यकत्वाद् यन्नैवं तन्नैवं यथा वह्न्यप्रमेति।

ननु द्वितीयानुमानेनैव प्रामाण्यसिद्धेः प्रथमानुमानमनर्थकमिति चेन्न। द्वितीयानुमानहेतुघटकसत्यन्तदलसिद्ध्यर्थं प्रथमानुमानमावश्यकम्। तथा हि इदंविशेष्यकवह्नित्वप्रकारकानुभवरूपे पक्षे वह्नित्वाभाववद्विशेष्यकत्वविशिष्टवह्नित्वप्रकारकत्वाभावरूपविशिष्टाभावसाधने विशेष्यवन्निष्ठविशिष्टाभावस्य विशेषणाभावरूपतया, अत्र च विशेष्यस्य वह्नित्वप्रकारकत्वस्य पक्षतावच्छेदकतया तद्विशिष्टे विशेष्यवति पक्षे तादृशविशिष्टाभावस्य विशेषणाभावरूपस्य वह्नित्वाभाववद्विशेष्यकत्वाभावपर्यवसितस्य सिद्धेः।

यद्यपि उक्तानुमानेन विशेष्यवन्निष्ठविशिष्टाभावस्य विशेषणाभावरूपस्य सिद्धावपि वह्नित्वाभाववद्विशेष्यकत्वाभावत्वेन न तत्सिद्धिः; अपि तु विशिष्टाभावत्वेन। तथा च, हेतुविशेषणतावच्छेदकीभूतवह्नित्वाभाववद्विशेष्यकत्वाभावत्वप्रकारेण हेतुविशेषणासिद्धेः, किञ्च विशिष्टाभावस्य चिन्तामणिकारमते अतिरिक्तत्वात् प्रथमानुमानेन विशिष्टाभावस्यातिरिक्तस्यैव सिद्धिरिति द्वितीयानुमानहेतुविशेषणस्यासिद्धेरित्युच्यते। तथापि इदंविशेष्यकवह्नित्वप्रकारकानुभवो वह्नित्वाभाववद्विशेष्यकत्वाभावान् वह्नित्वप्रकारकत्ववन्निष्ठवह्नित्वाभाववद्विशेष्यकत्वविशिष्टवह्नित्वप्रकारकत्वाभाववत्त्वादिति विशेष्यवति विशिष्टाभाववत्त्वेन हेतुना विशेषणाभावस्यानुमानान्तरमन्तरा स्वीकरणीयम्। तथा च एतदनुमानेनैवहेतुघटकसत्यन्तदलसिद्धिरितिभावः ॥६१॥

ननु चिन्तामणिकारोक्तद्वितीयानुमानेन वह्नित्वप्रकारकत्वविशिष्टे वह्निविशेष्यकत्वस्य सिद्धिर्न तु तादृशवह्निविशेष्यकत्वमात्रं प्रामाण्यम्। प्रामाण्यं तावद् वह्नित्वप्रकारकत्वावच्छिन्नवह्निविशेष्यकत्वम्। प्रदर्शितानुमानेन न तत् सिद्ध्यतीत्याशङ्कते "**तत्र चे**"ति। "**न प्रामाण्यसिद्धि**"रिति। उक्तानुमितौ वह्निविशेष्यकत्वे वह्नित्वप्रकारकत्वावच्छिन्नत्वस्याभानान्न वह्नित्वप्रकारकत्वावच्छिन्नवह्निविशेष्यकत्वरूपप्रामाण्यसिद्धिरित्यर्थः। वह्नित्वप्रकारकत्वविशिष्टे वह्निविशेष्यकत्वमेव कथं न प्रामाण्यमित्याह "**वह्निगुञ्जयो**"रिति।

**प्रामाण्यपदार्थत्वाभावादित्यनुपपत्तिर्दीधितिकृता वह्नित्वप्रकारकत्वरूपपक्षतावच्छेदकविशिष्टे वह्निविशेष्यकत्वरूपसाध्यसिद्धौ बाधाभावादिबलात् पक्षतावच्छेदकावच्छेदेनैव सिद्ध्यतीति वह्नित्वप्रकारकत्वावच्छिन्नवह्निविशेष्यकत्वरूपप्रामाण्यसिद्धिरिति समाहितम् ॥६२॥**

**वह्नित्वादिप्रकारकत्वादिकं पक्षीकृत्य दाहसमर्थविशेष्यकत्वावच्छिन्नत्वादिहेतुना वह्निविशेष्यकत्वाद्यवच्छिन्नत्वानुमितौ तथाविधसाध्यविशिष्टतथाविधपक्षसिद्धिरित्यपि प्रकारान्तरं दर्शितम् ॥६३॥**

---

वह्नौ गुञ्जात्वस्य गुञ्जायां वह्नित्वस्य यः समूहालम्बनभ्रमः सोऽपि वह्नित्वप्रकारकत्वविशिष्टः। तत्र च वह्निविशेष्यकत्वमपि विद्यत इति तादृशभ्रमस्य प्रामाण्यापत्तिः। वह्नित्वप्रकारकत्वावच्छिन्नवह्निविशेष्यकत्वस्य प्रामाण्यत्वे तु तादृशभ्रमे वह्निविशेष्यकत्वांशे वह्नित्वप्रकारकत्वावच्छिन्नत्वस्यासत्त्वेन न तस्य प्रामाण्यमिति भावः। अत्र दीधित्युक्तसमाधानमाह-"**दीधितिकृते**"ति। "**सिद्ध्यती**"ति। दर्शितानुमानादित्यादि। तथा चोक्तानुमानात् पक्षतावच्छेदकीभूतवह्नित्वप्रकारकत्वावच्छिन्नत्वस्य साध्यांशे वह्निविशेष्यकत्वे भानाद् वह्नित्वप्रकारकत्वावच्छिन्नवह्निविशेष्यकत्वं सिद्ध्यति। तादृशञ्च वह्निविशेष्यकत्वं वह्नित्वप्रमात्वमेव। पूर्वोक्तसमूहालम्बने भ्रमे वह्निविशेष्यकत्ववह्नित्वप्रकारकतयोः सामानाधिकरण्यसत्त्वेऽपि अवच्छेद्यावच्छेदकभावविरहेण न तस्य प्रामाण्यम्। वह्न्यंशे वह्नित्वप्रकारकज्ञाने च तयोरवच्छेद्यावच्छेदकभावस्वीकार आवश्यकः। अन्यथा दर्शितभ्रमात् तादृशज्ञाने विषयतावैलक्षण्यानुपपत्तेरिति भावः। अत्रावच्छेद्यत्वं न व्यापकत्वं वह्नित्वेन गुञ्जाभ्रमे वह्नित्वप्रकारत्वस्य सत्त्वेन वह्निविशेष्यकत्वस्यासत्त्वेन वह्निविशेष्यकत्वे वह्नित्वप्रकारकत्वव्यापकत्वविरहात्। अपि तु स्वरूपसम्बन्धरूपमेव। शिखरावच्छेदेन पर्वतो वह्निमानित्याद्यनुमितौ तादृशावच्छिन्नत्वस्य साध्यांशे दृष्टत्वादिति ध्येयम् ॥६२॥

ननु पुरोवर्तिनि वह्नित्वप्रकारकं ज्ञानमिति व्यवहारात् पुरोवर्तिन एव वह्नित्वप्रकारकत्वावच्छेदकत्वं सिद्ध्यति पुरोवर्तिनीति सप्तम्या अवच्छेदकत्वार्थकत्वात्। न च वह्नित्वप्रकारकत्वस्याधिकरणे ज्ञाने पुरोवर्तिनोऽसत्त्वात् कथं तस्यावच्छेदत्वमिति वाच्यम्। विशेष्यकत्वसम्बन्धेन तस्य ज्ञाने सत्त्वात्। तथा च धर्मविधया पुरोवर्तिनः सम्बन्धविधया तद्विशेष्यकत्वस्य वा वह्नित्वप्रकारकत्वावच्छेदकत्वं सिद्ध्यतु। न तु वह्नित्वप्रकारकत्वे धर्मिविशेष्यकत्वावच्छेदकत्वम्। वह्नित्वे पुरोवर्तिविशेष्यकं ज्ञानमिति व्यवहाराभावात्। तथाचोक्तानुमानसिद्धस्य वह्नित्वप्रकारकत्वावच्छिन्नवह्निविशेष्यकत्वस्य न प्रमात्वरूपतासम्भवः।

**यदि च विशिष्टप्रामाण्योपस्थितिं विनापि तत् प्रत्यक्षं मणिकारादिसम्मतं स्यात् तदा तेषामेतावान् प्रयासो निष्फल एव ॥६४॥**

**अथ प्रामाण्यघटकीभूतविशेष्यत्वादिपदार्थानां विशृङ्खलज्ञानादपि प्रामाण्यप्रत्यक्षं जायत एव। पक्षधरमिश्रैः विप्रतिपत्तौ साध्यघटकप्रामाण्याश्रयग्राहकसामग्र्या यावत्त्वविशेषणस्य यत्र पृथिवीति ज्ञानान्तरं तदनुव्यवसायस्तदनन्तरं पुनः पृथिवीति ज्ञानं तदनुव्यवसायेन च विशेष्यिताप्रकारिताविषयकपूर्वानुव्यवसायरूपज्ञानप्रत्यासत्तिबलात् प्रामाण्यं गृह्यत इति क्रमेण सिद्धसाधनवारणरूपं प्रयोजनमुपवर्णितम् ॥६५॥**

---

अपि तु वह्निविशेष्यकत्वावच्छिन्नवह्नित्वप्रकारकत्वस्यैव प्रमात्वम्। उक्तानुमानान् न तत्सिद्धिरित्यस्वरसात् प्रकारान्तरेण तत् समाधातुमाह "**वह्नित्वादी**"ति। "**वह्निविशेष्यकत्वाद्यवच्छिन्नानुमितावि**"ति। तथा चायं प्रयोगः—वह्नित्वप्रकारकत्वं वह्निविशेष्यकत्वावच्छिन्नं दाहसमर्थविशेष्यकत्वावच्छिन्नत्वाद्, यन्नैवं तन्नैवं यथा वह्नित्वभ्रमस्य वह्नित्वप्रकारत्वमिति। तथा चोक्तानुमानाद् वह्निविशेष्यकत्वावच्छिन्नवह्नित्वप्रकारकत्वरूपप्रामाण्यसिद्धिरिति भावः ॥६३॥

एतावता किमायातमित्याह "**यदि चे**"ति। यदि प्रामाण्यघटकसकलपदार्थोपस्थित्या विशेष्ये विशेषणमित्यादिन्यायेन प्रामाण्यप्रत्यक्षमभिमतं स्यात्, तदा प्रामाण्यभानार्थम् एतादृशानुमानादिप्रदर्शनं मणिकारादीनां विफलमेव स्यादिति भावः ॥६४॥

आशङ्कते '**अथे**"ति। प्रामाण्यघटकीभूतविशेष्यित्वादिसकलपदार्थानां विश्टङ्खलरीत्या ज्ञानादपि प्रामाण्यप्रत्यक्षं जायत इत्यत्र पक्षधरमिश्राणां सम्मतिमाह "**पक्षधरमिश्रै**"रिति। "**विप्रतिपत्तावि**"ति। ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं नवेति चिन्तामणिकारप्रदर्शितायां प्रथमविप्रतिपत्तावित्यर्थः। "**साध्यघटके**"ति। तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं मीमांसकमते साध्यं तद्घटकेत्यर्थः। "**यावत्त्वविशेषणस्ये**"ति। प्रयोजनमुपवर्णितमिति परेणान्वयः। अत्र विप्रतिपत्तिघटकग्राह्यत्वपदस्य ज्ञानविषयत्वार्थकस्य घटकीभूते ज्ञाने एव यावत्त्वविशेषणं न तु सामग्र्यां, यावत्सामग्रीजन्यग्रहाप्रसिद्धेः। तथा च तदप्रामाण्याग्राहकज्ञानग्राहकसामग्रीजन्ययावज्ज्ञानविषयत्वमिति पर्यवसितं साध्यमिति ध्येयम्। यावत्त्वविशेषणस्य किं प्रयोजनमुपवर्णितमित्याह "**यत्रे**"ति। "**तदनुव्यवसाय**" इति। परवर्त्यनुव्यवसाये प्रामाण्यभानजनकः प्रामाण्यघटकीभूतसकलपदार्थोपस्थितिरूप इत्यर्थः। "**पुनः पृथिवीति ज्ञान**"मिति। इदन्तु प्रामाण्यज्ञानस्य धर्मिता-

**न च विशिष्टप्रामाण्यस्मृतिस्थलाभिप्रायेणैव तदिति वाच्यम्। तथा सति प्रथमानुव्यवसाय एव तदुपनीतप्रामाण्यभानसम्भवाद् अनुव्यवसायान्तरानुधावनस्यात्यन्तासङ्गतत्वप्रसङ्गात् ॥६६॥**

**अप्रसिद्धसाध्यकानुमानव्याख्यानावसरेऽपि दाहसमर्थविशेष्यकत्वावच्छिन्न-**

---

सम्पत्त्यर्थम्। "**तदनुव्यवसायेन**" द्वितीयपृथिवीति ज्ञानानुव्यवसायेन। "**सिद्धसाधनवारणरूपमि**"ति। तथाच न्यायमतेऽपि पूर्वोक्तद्वितीयानुव्यवसायेन प्रामाण्यग्रहात् प्रामाण्ये तादृशज्ञानग्राहकसामग्रीग्राह्यत्वं सिद्धमेवेति मीमांसकानां तत्साधनं सिद्धसाधनं स्यात्। यावत्त्वनिवेशे तु न्यायमते पूर्वोपदर्शितप्रथमानुव्यवसायग्राह्यत्वाभावेन ज्ञानग्राहकसामग्रीजन्ययावज्ज्ञानविषयत्वाभावान्न सिद्धसाधनमिति भावः। तथा चोपदर्शितप्रथमानुव्यवसायेन प्रामाण्यघटकीभूतसकलपदार्थोपस्थित्या द्वितीयानुव्यवसायेन विशिष्टप्रामाण्यप्रत्यक्षस्य मिश्रसम्मतत्वात्, मिश्रैर्विशिष्टप्रामाण्योपस्थितिं विनापि प्रामाण्यघटकसकलपदार्थोपस्थित्या प्रामाण्यप्रत्यक्षं स्वीक्रियत इत्येवावगम्यत इति भावः ॥६५॥

आशङ्कते "**न चे**"ति। "**तदि**"ति। मिश्रैर्यावत्त्वविशेषणस्य प्रयोजनमुपवर्णितमित्यर्थः। तथा च यत्र पृथिवीति ज्ञानानन्तरं तदनुव्यवसायस्तदनन्तरं विशिष्टप्रामाण्यस्मृतिस्ततः पुनः पृथिवीति ज्ञानं तदनुव्यवसायेन स्मृत्युपनीतप्रामाण्यभानात्, तत्र सिद्धसाधनवारणरूपं यावत्त्वविशेषणस्य प्रयोजनमुपवर्णितं पक्षधरमिश्रैरिति विशिष्टप्रामाण्योपस्थितिः मिश्रमतेऽप्यावश्यकीति भावः।

मिश्राणामेतादृशाभिप्रायवर्णनं न समीचीनमित्याह "**तथासती**"ति। "**प्रथमानुव्यवसाय**" इति। प्राथमिके पृथिवीतिज्ञानानुव्यवसाय इत्यर्थः। "**तदुपनीते**"ति। स्मृत्युपनीतेत्यर्थः। "**भानसम्भवादि**"ति। प्राथमिकानुव्यवसायपूर्वं प्रामाण्योपस्थितिसत्त्वे प्राथमिकानुव्यवसाये प्रामाण्यभानस्य मीमांसकन्यायोभयमतसिद्धत्वादिति भावः। "**असङ्गतत्वप्रसङ्गादि**"ति। तथा च तत्र विशिष्टप्रामाण्योपस्थितिकल्पनाया विचारासहत्वात् प्रथमानुव्यवसायेन च विशिष्टप्रामाण्योपस्थित्यसम्भवेन च प्रामाण्यघटकीभूतसकलपदार्थोपस्थित्या द्वितीयानुव्यवसायेन प्रामाण्यभानमित्यभिप्रायेण मिश्राणां तादृशयावत्त्वप्रयोजनवर्णनमभ्युपगन्तव्यमिति भावः ॥६६॥

विशिष्टप्रामाण्योपस्थितिं विनापि प्रामाण्यघटकसकलपदार्थोपस्थित्या प्रामाण्यग्रहे मिश्राणां सम्मत्यन्तरमाह "**अप्रसिद्धे**"ति। "**अप्रसिद्धसाध्यकानुमाने**"ति। अप्रामाण्यव्यापकीभूताभावप्रतियोगिदाहसमर्थविशेष्यकत्वावच्छिन्नवह्नित्वप्रकारकत्ववदिदं ज्ञानमित्यप्रामाण्याभाव-

वह्नित्वप्रकारकत्वरूपहेतुग्रहसमये प्रामाण्यग्रहोऽपि न हस्तपिहित इति तेषामाक्षेपोऽपि विशिष्टप्रामाण्योपस्थित्यपेक्षायां न सम्भवतीति। प्रामाण्यघटकपदार्थानां विशृङ्खलज्ञानात् प्रामाण्यभानोपगमे चिन्तामणिविरोधस्तु स्थलविशेषाभिप्रायकतया मिश्रैरेव परिष्कृतः। एवञ्च प्रामाण्यप्रत्यक्षं प्रति विशिष्टप्रामाण्योपस्थितित्वेन हेतुता न सम्भवतीति चेत् ६७॥

विशेष्यतादिज्ञानत्वेनैव प्रामाण्यप्रत्यक्षं प्रति हेतुत्वं कल्पनीयम्। यत्र च व्यवसायदशायां विशेष्यताप्रकारतयोरुपस्थितिर्विद्यते तदा प्रथमानुव्यवसायेनापि गृह्यत एव प्रामाण्यमित्याहुः ॥६८॥

अत्र वदन्ति वहवः अनुव्यवसायस्य प्रामाण्यावगाहित्वोपगमेऽपि

---

रूपप्रामाण्यसाध्यकव्यतिरेकिपरामर्शाद् अप्रामाण्याभावरूपप्रामाण्यानुमानेत्यर्थः। "**प्रामाण्यग्रहोऽपी**"ति। तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपप्रामाण्यग्रहोऽपीत्यर्थः।

"**न हस्तपिहित**" इति। दाहसमर्थविशेष्यकत्वावच्छिन्नवह्नित्वप्रकारकत्वरूपहेतुग्रहार्थं तत्पूर्वं विशेष्यकत्वप्रकारकत्वरूपप्रामाण्यघटकसकलपदार्थोपस्थितेरावश्यकत्वात् तादृशहेतुग्रहकाले प्रामाण्यग्रहोऽपि स्यादित्यर्थः। "**तेषामि**"ति। मिश्राणामित्यर्थः। "**आक्षेप**" इति। तादृशहेतुग्रहकाले तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपप्रामाण्यग्रहाद् अनुमानं विफलमिति मिश्राणामाक्षेपेण मिश्रमते विशिष्टप्रामाण्योपस्थितेर्हेतुता नास्तीत्यवगम्यते। अन्यथा विशिष्टप्रामाण्यग्रहाभावाद् हेतुग्रहसमये प्रामाण्यग्रहासम्भवाद् उक्ताक्षेपो न स्यादिति भावः। ननु विशिष्टप्रामाण्योपस्थितेरनपेक्षणे उक्तानुमानप्रदर्शकचिन्तामणिग्रन्थविरोधे का गतिरित्यत आह "**प्रामाण्यघटकपदार्थानामि**"ति। "**हेतुता न सम्भवती**"ति। तथाचानुव्यवसायेनापि प्रामाण्यभानसम्भवात् प्रामाण्यस्य स्वतस्त्वमेवेति पूर्वपक्षिणामाशय इति भावः ॥६७॥

समाधानमाह "**विशेष्यते**"ति। तथा च प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यघटकीभूतविशेष्यतादिज्ञानत्वेन हेतुत्वाद् यत्रानुव्यवसायात् पूर्वं विशेष्यतादीनामुपस्थितिस्तत्र प्रामाण्यभानसम्भवेऽपि यत्रानुव्यवसायात् पूर्वं विशेष्यतादीनां नोपस्थितिस्तत्रानुव्यवसाये प्रामाण्याग्रहात्, तादृशानुव्यवसायानन्तरं प्रामाण्यसंशयस्य नानुपपत्तिः, प्रामाण्यस्यानुव्यवसायमात्रग्राह्यत्वाभावात् स्वतस्त्वाभावरूपपरतस्त्वमुपपद्यत इति न्यायमतमेव सम्यग् व्यवस्थितमिति भावः ॥६८॥

केचित् प्राचीनतमा नैयायिका अनुव्यवसायस्य प्रामाण्यावगाहित्वं स्वीकृत्य मुरारि-

**क्षतिविरहादुपदर्शितातिरिक्तकार्यकारणभावे मानाभावः। प्रामाण्यसंशयस्तु अनुव्यवसायानन्तरं न भवत्येव; किन्तु अनुव्यवसायक्षणे, विनष्टे वा अनुव्यवसाये ॥६९॥**

---

मिश्राणां मतं समर्थितवन्तस्तेषां मतमुत्थापयति "**अत्र वदन्ति बहव**"इति। "**अत्रे**"ति। अनुव्यवसायस्य प्रामाण्यग्राहकत्वे प्रामाण्यसंशयानुपपत्त्या प्रथमानुव्यवसायस्य प्रामाण्यग्राहकत्वापत्तिवारणाय प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यज्ञानत्वेन हेतुता कल्पनीया, अतो न प्रामाण्यस्य स्वतस्त्वमिति पूर्वपक्ष इत्यर्थः। "**बहव**"इति। मुरारिमिश्रानुयायिनो बहवः प्राचीननैयायिका इत्यर्थः। "**मानाभाव**" इति। प्रथमानुव्यवसायस्य प्रामाण्यग्रहरूपतया उपदर्शितकार्यकारणभावे व्यतिरेकव्यभिचारादित्यर्थः। ननु प्रथमानुव्यवसायस्य प्रामाण्यावगाहित्वोपगमे प्रामाण्यसंशयानुपपत्तिरूपक्षतिसत्त्वात् कथं क्षतिविरहादित्युक्तमित्यत आह "**प्रामाण्यसंशयस्त्वि**"ति। तर्हि कदा प्रामाण्यसंशय इत्याह "**अनुव्यवसायक्षण**"इति। तथाचानुव्यवसायस्यैव प्रामाण्यसंशयरूपतेति भावः। ननु अनुव्यवसायस्य प्रामाण्यसंशयरूपत्वे प्रामाण्यनिश्चयो दुर्घट इति चेन्न। यत्रानुव्यवसायपूर्वं कोट्युपस्थितिस्तत्रैवानुव्यवसाये प्रामाण्यसंशयत्वोपगमात्, यत्र च कोट्युपस्थितिर्नास्ति तत्र प्रामाण्यनिश्चयात्मकानुव्यवसायस्वीकारात्। न च प्रामाण्यस्यानुव्यवसायग्राह्यतया अनुव्यवसायात् पूर्वं कथं प्रामाण्योपस्थितिरिति वाच्यम्, न्यायमतेऽपि अनभ्यासदशोत्पन्नज्ञाने प्रामाण्यसंशयस्वीकारात्। यथा तन्मते पूर्वोत्पन्नसंस्काराधीना कोट्युपस्थितिस्तथैतन्मतेऽपीति भावः। ननु तद्वति तत्प्रकारकत्वं प्रामाण्यं तच्च ज्ञानग्राहकेण गृहीतमेव न जातु कस्यचित् पर्वतविशेष्यकवह्निप्रकारकज्ञाने जाते इदं ज्ञानं पर्वतविशेष्यकं न वा, वह्निप्रकारकं नवेत्याद्याकारकः सन्देहः, एवं मुरारिमिश्रमतोक्तयुक्त्या तादृशविशेष्यकत्वाद्यंशे पर्वतादेर्निरूपितत्वादिसम्बन्धेन भानात्। तद्वति तत्प्रकारकत्वरूपप्रामाण्यावधारणात्मक एवानुव्यवसायः। तत्प्रकारकनिश्चयेन तत्कोटिकसंशयस्य समूहालम्बनासम्भवात् प्रामाण्यसंशयोदुर्घट इत्याह "**विनष्टे वे**"ति। ननु अनुव्यवसायनाशे धर्मिरूपव्यवसायस्यापि नाशाद् धर्मीन्द्रियसन्निकर्षासम्भवात् कथं व्यवसायधर्मिकप्रामाण्यसंशय इति चेन्न। स्मृत्युपनीतव्यवसाये तत्संशयस्वीकारात्। तथा च ज्ञानलक्षणसन्निकर्षेण धर्मिभानमिति भावः। नच एतन्मते व्यवसायानुभवे व्यवसायधर्मिकप्रामाण्यस्यापि अवश्यं भानस्वीकारात् प्रामाण्यवत्त्वेनैव व्यवसायानुभव आस्थेयः, अपि च येन रूपेणानुभवस्तेनैव रूपेण स्मरणमिति नियमात्, प्रामाण्यवत्त्वेन व्यवसायस्मरणमेव संशये धर्मिभाननियामकतया अभ्युपगन्तव्यत्वेन

**न चानुव्यवसायोत्पत्तिक्षणे प्रामाण्यसंशयो न भवितुमर्हति, ज्ञानरूप-धर्मिज्ञानविरहादिति वाच्यम्। धर्मिज्ञानस्य संशयहेतुत्वे मानाभावात् कोट्युपस्थितिधर्मीन्द्रियसन्निकर्षादित एव तदुपपत्तिः॥७०॥**

---

तादृशधर्मिज्ञानस्य प्रामाण्यसंशयविरोधितया कथं प्रामाण्यसंशय इति वाच्यम्। न हि येन रूपेणानुभवस्तेनैव रूपेण स्मरणमिति नियमः, अपि तु यद्विषयकानुभवस्तद्विषयकं स्मरणमिति नियमात् प्रामाण्यप्रमोषेण व्यवसायस्य स्मरणसम्भवात्॥६६॥

"**धर्मिज्ञानस्य संशयहेतुत्वे मानाभावादि**"ति। इदन्तु अभ्युपगमवादेन। धर्मिज्ञानस्य संशयहेतुत्वास्वीकारे धर्मिभाननियमो न स्यात्। ननु धर्मीन्द्रियसन्निकर्षादेव संशये धर्मिभाननियमोपपत्तेः किं धर्मिज्ञानस्य हेतुतया। नच बहुषु धर्मिष्विन्द्रियसन्निकर्षादिसत्त्वे कुत्रचिदेव धर्मिणि संशयः कुत्रचिन्नेति नियमो न धर्मीन्द्रियसन्निकर्षादितो निर्वहतीति धर्मिज्ञानमेव तन्निर्वाहकमिति वाच्यम्। संशये धर्मिज्ञानहेतुत्वेऽपि अनेकधर्मिष्विन्द्रिय-सन्निकर्षदशायां कस्यचिदेव धर्मिणोज्ञानं कस्यचिन्नेत्यत्र नियामकाभावात् सर्वेषामेव धर्मिणां ज्ञानस्य स्वीकार्यत्वेन सर्वेषामेव धर्मिणां संशये धर्मिविषया भानापत्तेर्धर्मिज्ञानहेतुतयापि वारणासम्भवात्। न च तत्तत्सन्निकर्षजन्यधर्मिज्ञानमेव संशये धर्मिभाननियामकमस्त्विति वाच्यम्, तत्तत्सन्निकर्षस्यैव धर्मिभाननियामकत्वसम्भवे धर्मिज्ञानपर्यन्तस्य वैफल्यापत्तेः। यदि बहुषु धर्मिष्विन्द्रियसन्निकर्षादिसत्त्वे कस्यचिदेव धर्मिणः प्रत्यक्षं कस्यचिन्नेत्यनुभवात् तत्तद्विषयकप्रत्यक्षत्वावच्छिन्नं प्रति अननुगतानां तत्तत्सन्निकर्षादिव्यक्तीनां प्रयोजकत्व-ध्रौव्येऽपि तद्धर्मिकसंशयत्वावच्छिन्नं प्रति अनुगतस्य धर्मिज्ञानस्य कारणत्वसम्भवे तत्कल्पन-मेवोचितमिति मन्यते; तदा तद्धर्मिज्ञानसत्त्वे धर्मिभासकसन्निकर्षादिविगमेऽपि तद्धर्मिक-संशयापत्तिः। नच संशयस्य प्रत्यक्षव्याप्यतया व्याप्यकार्यं प्रति व्यापकसामग्र्याः प्रयोजकत्वात् संशयं प्रति तत्तत्सन्निकर्षादिघटितप्रत्यक्षसामग्री प्रयोजिकेति कथं सन्निकर्षविगमे संशयापत्तिरिति वाच्यम्। तत्तत्सन्निकर्षादिघटितप्रत्यक्षसामग्र्याः संशये धर्मिभाननियामकत्वकल्पनेनैव सामञ्जस्ये धर्मिज्ञानहेतुताया वैयर्थ्यादिति चेन्न। धर्मीन्द्रियसन्निकर्षस्य धर्मिज्ञानस्य वा संशयहेतुत्वेऽपि संशये धर्मिभाननियमो न स्यादिति साधारणादिधर्मविशिष्टधर्मिज्ञानस्य संशयहेतुत्वमवश्यं स्वीकार्यम्। तथा च यत्र धर्मिणि साधारणादिधर्मज्ञानं तत्रैव धर्मिणि संशय इति धर्मिभाननियम उपपद्यते। न च यत्र नानाधर्मिणि साधारणादिधर्मज्ञानं तत्र पूर्ववत् नानाधर्मिणा संशया-पत्तिरिति वाच्यम्, इष्टापत्तेः; तत्र नानाधर्मिष्वेव संशयस्वीकारात्। ननु साधारणादि-

**न च संशयत्वावच्छिन्नं प्रति धर्मिज्ञानस्याहेतुत्वेऽपि 'पुरोवर्तिनि घटत्वज्ञानं प्रमा न वे'त्यादिप्रामाण्यसन्देहस्य घटत्वज्ञानत्वादिविशिष्टविशेष्यकवैशिष्ट्यावगाहिबोधतया तादृशबोधे च विशेष्यतावच्छेदकप्रकारकज्ञानमुद्रया घटत्वज्ञानत्वादिप्रकारकानुव्यवसायस्यापेक्षणीयतेति वाच्यम् ॥७१॥**

**विशिष्टविशेषणकबोधे विशेषणतावच्छेदकप्रकारकज्ञानस्येव विशिष्टविशेष्यकबोधे विशेष्यतावच्छेदकप्रकारकज्ञानहेतुताया अपि मीमांसकैरनभ्युपगमात्। स्वीकुर्वन्तु वान्यत्र, उपदर्शितधर्मावच्छिन्नविशेष्यकबोधस्थले तु**

---

धर्मविशिष्टधर्मिज्ञानस्य संशयहेतुत्वे संशयात् पूर्वं साधारणादिधर्मविशिष्टधर्मिज्ञानार्थं साधारणादिधर्मविशिष्टधर्मिभासकसामग्री तत्र स्वीकार्या, सा एव संशये धर्मिभाननियामिकास्तु किं धर्मिज्ञानहेतुतयेति चेन्न। अननुगतानां तादृशधर्मिज्ञानसामग्रीणां कारणत्वापेक्षया अनुगतस्य साधारणादिधर्मविशिष्टधर्मिज्ञानस्य हेतुत्वौचित्यात्। "**सन्निकर्षादित**"इति। आदिना कोट्योर्विरोधित्वज्ञानं ग्राह्यम्; अन्यथा कोटिद्वयप्रकारकधर्मिविशेष्यकसमूहालम्बनापत्तेः। "**तदुपपत्तिः**" प्रामाण्यसंशयोपपत्तिः ॥७०॥

तद्धर्मावच्छिन्नविशेष्यताशालिबोधं प्रति तद्धर्मप्रकारकज्ञानस्यापेक्षितत्वात्, ज्ञानधर्मिकप्रामाण्यज्ञानस्य ज्ञानत्वावच्छिन्नविशेष्यकत्वेन तत्र ज्ञानत्वप्रकारकज्ञानस्य प्रयोजकत्वाद् अनुव्यवसायात् पूर्वं तदसत्त्वात् कथमनुव्यवसायस्य प्रामाण्यसंशयरूपत्वमित्याशङ्क्यते "**न चे**"त्यादि। "**घटत्वज्ञानत्वादिविशिष्टविशेष्यकवैशिष्ट्यावगाहिबोधतये**"ति। घटत्वज्ञानत्वविशिष्टरूपविशेष्ये वैशिष्ट्यावगाहिबोधतयेत्यर्थः। "**वैशिष्ट्यावगाही**"ति। एतत्तु स्वरूपकथनं विशेष्यकबोधमात्रस्य वैशिष्ट्यावगाहित्वेनाव्यावर्तकत्वात्। "**घटत्वज्ञानत्वादिप्रकारकानुव्यवसायस्ये**"ति। घटत्वज्ञानत्वरूपविशेष्यतावच्छेदकप्रकारकानुव्यवसायस्येत्यर्थः ॥७१॥

विशेष्यतावच्छेदकप्रकारकज्ञानस्य हेतुतामनभ्युपगम्य समाधत्ते "**विशिष्टे**"ति। "**मीमांसकैरनभ्युपगमादि**"ति। तथा च विशेष्यतावच्छेदकेन सह इन्द्रियसन्निकर्षादेव विशेष्यतावच्छेदकविषयकबोधोत्पत्तिरिति भावः। ननु कृष्णा गौरिति प्रत्यक्षस्थले यथा विशेष्यतावच्छेदकस्य गोत्वस्य संयुक्तसमवायरूपेन्द्रियसन्निकर्षो विद्यते तथा गो समवेतानां पृथिवीत्वद्रव्यत्वादीनामप्यस्तीति कस्यचिदेव विशेष्यतावच्छेदकत्वं कस्यचिन्नेति नियामकाभावात् तादृशयावद्धर्मावच्छिन्नविशेष्यकत्वापत्तिरिति तन्नियामकत्वेन विशेष्यतावच्छेदकप्रकारकज्ञानस्यापेक्षितत्वादित्यत आह "**स्वीकुर्वन्त्वि**"ति। "**उपदर्शितधर्मावच्छिन्नविशेष्यक-**

**सर्वथैव तेषां तदनभ्युपगमात्। तथासति अनुव्यवसाये तादृशधर्मविशिष्टे प्रामाण्यावगाहनस्यैवानुपपत्तेः। यदि च तेषामनुव्यवसाये निर्धर्मितावच्छेदक-प्रामाण्यावगाहनमिति मतम्, तदा तादृशनिर्णयस्य संशयाविरोधित्वात् कथं तदनन्तरमेव प्रामाण्यसंशयानुपपत्तिः ॥७२॥**

**यत्तु अनुव्यवसायस्य प्रामाण्यनिर्णयरूपतया कथं तदुत्पत्तिक्षणे प्रामाण्य-संशयः। बाधनिर्णयाद्यभावस्य कार्यसहभावेन विशिष्टबुद्धिहेतुत्वात्। निर्णयोत्पत्तिकाले च तदभावसत्त्वादिति।**

**तन्न, अनुव्यवसायस्यैव प्रामाण्यसंशयरूपतया तस्य संशयान्यत्वरूप-निर्णयत्वविरहेण बाधनिर्णयाभावस्याक्षतत्वात् ॥७३॥**

**यदपि एककोटिविशिष्टबुद्धौ बलवती अपरकोटिभानसामग्री विरोधिनी। अतएव दोषात् पीतादिविशिष्टबुद्धिसामग्रीदशायां शङ्खादौ न पीताभावादि-**

---

**बोधस्थल**" इति। घटत्वज्ञानत्वाद्यवच्छिन्नज्ञाननिष्ठविशेष्यताकबोधस्थले। "**तादृशधर्म-विशिष्टे**" घटत्वज्ञानत्वादिधर्मविशिष्टे। "**अनुपपत्तेरि**"ति। विशेष्यतावच्छेदक-घटत्वज्ञानत्वादिप्रकारकज्ञानविरहादिति शेषः। नन्वनुव्यवसाये निर्धर्मितावच्छेदकं प्रामाण्यमव-गाहते, तथा च धर्मितावच्छेदकज्ञानविरहस्याकिञ्चित्करत्वेन न प्रामाण्यभानानुपपत्तिरित्या-शङ्कयते "**यदि चे**"ति। उत्तरयति "**तदे**"ति। "**संशयाविरोधित्वादि**"ति। धर्मिता-वच्छेदकं निवेश्यैव प्रतिबध्यप्रतिबन्धकभावकल्पनादित्यर्थः। तथा च प्रामाण्यसंशयस्तु अनुव्यवसायानन्तरं न भवत्येवेत्युक्तिरसंगता स्यादिति भावः ॥७२॥

"**कार्यसहभावेने**"ति। एकदैकधर्मिणि तत्तदभावयोर्निर्णयापत्तिवारणाय बाध-निर्णयाद्यभावस्य कार्यसहभावेन हेतुत्वं कल्प्यते। न च तद्वत्तानिर्णयं प्रति तदभाववत्ता-निर्णयसामग्र्यभावस्य कार्याव्यवहितपूर्ववर्तितयैव हेतुत्वकल्पनेन सामञ्जस्ये बाधनिश्चयाद्यभावस्य कार्यसहभावेन हेतुत्वकल्पनमनर्थकमिति वाच्यम्। तदभाववत्तानिर्णयसामग्र्यभावापेक्षया तदभावनिर्णयाभावस्य लघुत्वेन तस्यैव कार्यसहभावेन हेतुत्वकल्पनस्यौचित्यात्। "**तदभाव-सत्त्वादि**"ति। बाधनिर्णयाभावस्याभावसत्त्वादित्यर्थः, बाधनिर्णयसत्त्वादिति यावत्।

परिहरति "**तन्ने**"ति। "**बाधनिर्णयाभावस्याक्षतत्वादि**"ति। तथा च तत्र प्रामाण्यसंशये बाधकाभावादिति भावः ॥७३॥

प्रामाण्यसंशयत्वेनाभिमतस्थले प्रामाण्याप्रामाण्योभयभानसामग्र्यौ विद्येते, तयोर्मध्ये प्रामाण्यभानसामग्री अप्रामाण्यभानं प्रति प्रतिबन्धिकेत्यप्रामाण्यभानासम्भवात् कथं

**विशिष्टधीः। बलवती च दोषाद्युपबृंहितेव ज्ञानवित्तिवेद्यपदार्थविशिष्टबुद्धि-सामग्री। अतएव अनुव्यवसायेन व्यवसाये घटत्वप्रकारकत्वादिग्रहदशायां तदभावस्योपस्थितस्यापि न भानमिति ॥७४॥**

**तदसत्, यतो बलवद्विरोधभानसामग्र्या विरोधिकोटिविशिष्टबुद्धिसामान्यं प्रति सर्वसाधारणैकप्रतिबन्धकता न सम्भवति। परन्तु घटत्वप्रकारकत्वादि-विशिष्टबुद्धिसामग्र्याः तदभावादिविशिष्टबुद्धौ विशिष्यैव प्रतिबन्धकता वाच्या। एवञ्च प्रामाण्याभावविशिष्टबुद्धौ प्रामाण्यलौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वस्य प्रयोजनविरहेणाकल्पनात् न संशयानुपपत्तिः ॥७५॥**

---

प्रामाण्यसंशय इत्याशङ्कते "**यद्पी**"ति। स्वपक्षे युक्तिमाह "**अतएव दोषादि**"ति। यत्र पित्तादिदोषदूषितलोचनेन शङ्खादौ सन्निकर्षो विद्यते तत्र चक्षुःसंयुक्तविशेषणता-घटितायाः शङ्खनिष्ठपीताभाववत्ताबुद्धिसामग्र्याः सत्त्वात्, अपि च पित्तादिदोषघटितायाः पीतवत्ताबुद्धिसामग्र्या अपि सत्त्वात् तत्र पीततदभावयोः बुद्ध्युत्पत्तिवारणाय पीताभाव-वत्ताबुद्धिं प्रति दोषोपबृंहिता पीतादिबुद्धिसामग्री प्रतिबन्धिका वाच्या। न च विनिगमकाभावेन पीताभाववत्ताबुद्धिसामग्र्या अपि प्रतिबन्धकत्वं स्यादिति वाच्यम्। यादृशसामग्र्या बलवत्त्वं तस्या एव प्रतिबन्धकत्वात्। बलवत्त्वञ्च फलबलकल्प्यम्, यादृश्याः सामग्र्याः फलमुत्पद्यते तस्या एव बलवत्त्वस्वीकाराद् दोषघटितसामग्र्याः फलं दृश्यत इति दोषघटितसामग्र्याः प्रतिबन्धकत्वमिति भावः। ननु तथापि कथं प्रामाण्यभानसामग्र्याः बलवत्त्वमित्याह "**बलवती चे**"ति। "**ज्ञानवित्तिवेद्यपदार्थविशिष्टबुद्धिसामग्री**"ति। बलवतीति पूर्वेणान्वयः। तथा च ज्ञानप्रामाण्यस्यापि ज्ञानवित्तिवेद्यतया तद्विशिष्टबुद्धि-सामग्र्याः प्रामाण्याभावभानविरोधित्वं सिद्धम्, एवञ्च अनुव्यवसायेन प्रामाण्यमात्रस्यैव भानं न त्वप्रामाण्यकोटिकतत्संशय इति प्रामाण्यसंशयानुपपत्तिरिति पूर्वपक्षाशयः। ज्ञानवित्तिवेद्यपदार्थविशिष्टबुद्धिसामग्र्याः बलवत्त्वे किं मानमित्याह "**अतएवे**"ति। ज्ञानवित्तिवेद्यस्य घटत्वप्रकारकत्वादेर्ग्रहसामग्र्याः यथा बलवत्त्वं तत्सामान्यात् ज्ञानवित्ति-वेद्यस्य प्रामाण्यस्यापि ग्रहसामग्र्याः अपि बलवत्त्वमिति भावः ॥७४॥

पूर्वोक्तामापत्तिं परिहरति "**तदसदि**"ति। "**सर्वसाधारणैकप्रतिबन्धकता न सम्भवती**"ति। विरोधित्वस्य तत्तदभावादिघटिततया तत्तदभावादि निवेश्यैव प्रतिबध्यप्रतिबन्धकभावः कल्प्य इत्यर्थः। "**प्रयोजनविरहेणाकल्पनादि**"ति। तथा चानुव्यवसायस्य प्रामाण्यभानानुरोधेन अनुव्यवसायपूर्वक्षणे प्रामाण्यभानसामग्रीसत्त्वेऽपि

**एवमनुव्यवसायस्य प्रामाण्यांशे भ्रमत्वसन्देहादनुव्यवसायोत्तरमपि क्वचित् प्रामाण्यसंशय उपपद्यते ॥७६॥**

**यच्चात्रानुव्यवसायधर्मिकभ्रमत्वसन्देहे तादृशधर्मिधियः प्रागपेक्षितत्वात् तत्र तत्प्रामाण्यावगाहनात् नानुव्यवसायधर्मिको भ्रमत्वसंशयोऽप्युपपद्यते। भ्रमत्वग्रहं प्रति प्रामाण्यग्रहस्य तदभावव्याप्यवत्त्वाज्ञानमुद्रया अवच्छेदक-धर्मदर्शनविधया वा प्रतिबन्धकत्वादिति मणिकाराणामनुपपत्तिप्रदर्शनम्। तदपि शिथिलम् ॥७७॥**

---

तस्याः प्रामाण्याभावबुद्धयप्रतिबन्धकत्वात् नानुव्यवसाये प्रामाण्याभावावगाहिप्रामाण्य-संशयानुपपत्तिरिति भावः ॥७५॥

अनुव्यवसायस्य प्रामाण्यनिश्चयरूपत्वेऽपि कदाचिदनुव्यवसायानन्तरमपि प्रामाण्य संशयसम्भव इत्याह "**एवमि**"ति। "**प्रामाण्यांशे भ्रमत्वसन्देहादि**"ति। भ्रमत्व-ज्ञानानास्कन्दितस्य प्रामाण्यनिश्चयस्य प्रामाण्यसंशयप्रतिबन्धकत्वात्, प्रामाण्यांशे भ्रमत्व सन्देहे तु अनुव्यवसायस्य भ्रमत्वज्ञानानास्कन्दितव्यवसायधर्मिकप्रामाण्यनिश्चयत्वाभावात्, तदनन्तरं व्यवसायधर्मिकप्रामाण्यसंशये बाधकाभावात्, तादृशस्थले अनुव्यवसायानन्तरमपि प्रामाण्यसंशय उत्पद्यत एवेति भावः ॥७६॥

"**यच्चात्रे**"ति। "**यत्**" मणिकाराणामनुपपत्तिप्रदर्शनमित्यनेनान्वयः। "**अत्रे**"ति। अनुव्यवसायधर्मिकभ्रमत्वसंशयाद् व्यवसायधर्मिकप्रामाण्यसंशय इत्यर्थः। अन्वयश्चास्य अनुपपत्तिप्रदर्शनमित्यत्र अनुपपत्तिप्रतियोगिनि उपपत्तौ। "**प्रागपेक्षितत्वादि**"ति। इदन्तु धर्मिज्ञानस्य संशयहेतुत्वाभ्युपगमे, तदनभ्युपगन्तृमीमांसकमते धर्मिज्ञानस्यानपेक्षणात्। "**तत्रे**"ति। अनुव्यवसायरूपधर्मिविषयकग्रहे। "**तत्प्रामाण्ये**"ति। अनुव्यवसायनिष्ठ-प्रामाण्येति। तथा च अनुव्यवसायेऽपि प्रामाण्यनिश्चयात् तत्र भ्रमत्वसंशयो न भवितुमर्हति, तदभावाच्च नानुव्यवसायविषये व्यवसाये प्रामाण्यसंशय इति भावः।

ननु तद्वति तत्प्रकारकत्वरूपप्रामाण्यस्य न तदभाववति तत्प्रकारकत्वरूपभ्रमत्वाभावरूप-तेति कथं प्रामाण्यनिश्चयस्य भ्रमत्वग्रहप्रतिबन्धकत्वमित्यत आह "**भ्रमत्वग्रहं प्रती**"ति। तदभाववति तत्प्रकारकत्वरूपभ्रमत्वाभावस्य व्याप्यं तद्वति तत्प्रकारकत्वरूपप्रामाण्यमिति प्रामाण्यनिश्चयस्य तदभावव्याप्यवत्तानिश्चयमुद्रया प्रतिबन्धकत्वम्, अथवा यद्धर्मावच्छेदेन यदभावो गृह्यते धर्मिणि तद्धर्मवत्तानिश्चयः तद्धर्मिकतद्वत्ताग्रहप्रतिबन्धक इति नियमात् प्रामाण्यावच्छेदेन भ्रमत्वाभावस्य गृहीतत्वाद् अनुव्यवसायरूपधर्मिणि प्रामाण्यनिश्चये

**यतस्तदानीं यत्र धर्मे तदभावव्याप्यत्वं गृह्यते तद्वत्ताज्ञानमेव तदभावव्याप्यवत्ताज्ञानविधया प्रतिबन्धकम्। तथा तदानीं यद्धर्मावच्छेदेन तदभावो गृह्यते तद्धर्मवत्तानिर्णय एव अवच्छेदकधर्मदर्शनविधया विरोधी। एवञ्च यदा प्रमात्वस्य भ्रमत्वाभावव्याप्यत्वं न गृहीतम्, न वा तदवच्छेदेन भ्रमत्वाभावो गृहीतस्तदा अनुव्यवसाये सत्यपि प्रमात्वग्रहे भ्रमत्वग्रहः, तन्मूलको व्यवसायधर्मिकप्रामाण्यसंशयश्च नानुपपन्न इति ॥७८॥**

**केचित्तु प्रकारित्वादिकं नातिरिक्तं किन्तु प्रकारत्वादिनिरूपकत्वमेव, तच्च नान्तःकरणयोग्यं वहिर्विषयवृत्तिप्रकारत्वादिघटितमिति मनसा न ग्रहीतुं शक्यते। अतो विनापि अतिरिक्तकार्यकारणभावकल्पनं प्रामाण्यस्य स्वतस्त्ववारणं सम्भवति ॥७९॥**

---

भ्रमत्वग्रहप्रतिबन्धकत्वमित्याह **"अवच्छेदकधर्म"**ति। **"तदपि शिथिलमि"**ति। पूर्वोक्तयुक्त्या अनुव्यवसाये प्रामाण्यांशे भ्रमत्वसन्देहस्यासम्भवेन अनुव्यवसायस्य प्रामाण्यांशे भ्रमत्वसन्देहाद् अनुव्यवसायोत्तरं यत्प्रामाण्यसंशयानुपपत्तिप्रदर्शनं तदपि शिथिलम् वक्ष्यमाणयुक्तेरिति भावः ॥७७॥

तदपि कथं शिथिलमित्याह **"यत"** इति। तदभावस्य प्रकृतव्याप्येऽपि धर्मे यदि तदानीं तदभावव्याप्यत्वं न गृह्यते तदा तादृशव्याप्यधर्मवत्ताज्ञानमपि न प्रतिबन्धकमिति तत्कालीनव्याप्यत्वेन गृहीतो यो धर्मस्तत्कालीनतद्धर्मवत्ताज्ञानमेव प्रतिबन्धकं वाच्यमित्याह **"तदानीमि"**त्यादिना। कदाचित् तद्धर्मावच्छेदेन तदभाववत्त्वग्रहेऽपि कालान्तरे तद्वत्तानिर्णयो न प्रतिबन्धक इति तद्धर्मावच्छेदेन तदभाववत्तानिश्चयकालीनतद्वत्तानिश्चयः प्रतिबन्धको वाच्य इत्याह **"तथा तदानीमि"**ति। एतेन किमायातमित्याह **"एवञ्चे"**ति। **"न गृहीतमि"**ति। तथा च तत्कालीनप्रमात्वनिर्णयस्य न भ्रमत्वग्रहं प्रति व्याप्यवत्ताज्ञानमुद्रया प्रतिबन्धकत्वमिति भावः। **"गृहीत"** इति। तथा च तत्कालीनावच्छेदकधर्मदर्शनस्य न प्रतिबन्धकत्वमिति भावः ॥७८॥

**"तच्च नान्तः करणयोग्यमि"**ति। अस्य हेतुगर्भविशेषणं वहिर्विषयवृत्तिप्रकारत्वादिघटितमिति। तथा च प्रकारतानिरूपकत्वं नान्तःकरणयोग्यं वहिर्विषयवृत्तिप्रकारताघटितत्वादित्यनुमानेनान्तःकरणायोग्यत्वं सिद्धमिति भावः। **"अतिरिक्तकार्यकारणभावकल्पनमि"**ति। प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यज्ञानत्वेन हेतुताकल्पनमित्यर्थः। **"स्वतस्त्ववारणमि"**ति। यथा अतिरिक्तकार्यकारणभावकल्पने ज्ञानग्राहकसामग्र्यतिरिक्तस्य प्रामाण्य-

**न च प्रकारत्वमतिरिक्तं तन्निरूपकत्वं प्रकारित्वम् प्रकारित्वमेवातिरिक्तं तन्निरूपकत्वमेव प्रकारत्वरूपमित्यत्र विनिगमकाभावात् प्रकारत्वं प्रकारित्वञ्चो-भयमेवातिरिक्तम्। एवं विशेष्यत्वविशेष्यित्वादिकमपीति वाच्यम् ॥८०॥**

**प्रकारित्वादीनामतिरिक्तत्वे अनुव्यवसायेन तद्घटितप्रामाण्यग्रहसम्भवात् प्रामाण्यसंशयानुपपत्तिरित्यस्यैव विनिगमकत्वात् ॥८१॥**

**न च प्रकारतानिरूपकत्वादेः प्रकारत्वादिस्वरूपत्वे तदवगाही इदं घटत्वेन जानामीत्याकारकोऽप्यनुव्यवसायस्तुल्ययुक्तयानुपपन्न इति वाच्यम्। तादृशा-**

---

ज्ञानस्यापेक्षणात् न ज्ञानग्राहकसामग्रीमात्रग्राह्यत्वरूपं स्वतस्त्वं तथा प्रामाण्यघटकीभूत-प्रकारतानिरूपकत्वस्य वहिर्विषयप्रकारताघटितत्वेन वहिरिन्द्रियस्यापेक्षणाज्ज्ञानग्राहकसामग्र्य-तिरिक्तस्य वहिरिन्द्रियस्य प्रामाण्यग्रहप्रयोजकत्वाज्ज्ञानग्राहकसामग्रीमात्रग्राह्यत्वरूपं स्वतस्त्वं न सम्भवतीति शङ्कार्थः ॥७६॥

"**प्रकारत्वं प्रकारित्वञ्चोभयमेवातिरिक्तदि**"ति। तथा च ज्ञानमात्रनिष्ठं प्रकारित्वं मनसैव गृह्यत इति ज्ञानग्राहकसामग्रीमात्रग्राह्यत्वात् स्वतस्त्वमव्याहतमिति भावः। तद्वद्विशेष्यित्वावच्छिन्नतत्प्रकारित्वस्य प्रामाण्यपदार्थतया, तत्र विशेष्यित्वस्य विशेष्यता-निरूपकत्वात्मकत्वे नान्तःकरणयोग्यत्वं वहिर्विषयवृत्तिविशेष्यताघटितत्वेन ज्ञानग्राहकातिरिक्त-वहिरिन्द्रियस्यापेक्षितत्वाद् विशेष्यिताघटितप्रामाण्यस्य न ज्ञानग्राहकमात्रग्राह्यत्वरूपस्वतो-ग्राह्यत्वमित्यत आह "**एवमि**"ति ॥८०॥

"**तद्घटितप्रामाण्यग्रहसम्भवादि**"ति। तथा चातिरिक्तानां ज्ञानमात्रवृत्तीनां प्रकारित्वविशेष्यित्वादीनां ज्ञानग्राहकसामग्रीमात्रग्राह्यत्वात् तद्घटितं प्रामाण्यमपि ज्ञान-ग्राहकसामग्रीमात्रग्राह्यमेवेत्यनुव्यवसायमात्रेणैव प्रामाण्यस्य विषयीकरणात् प्रामाण्य-संशयानुपपत्तिरित्यनुभवसिद्धप्रामाण्यसंशयोपपत्त्यर्थं प्रामाण्यघटकानां प्रकारित्वादीनां ज्ञानग्राहकातिरिक्तग्राह्यत्वमवश्यं स्वीकार्यं तच्च प्रकारित्वादीनां प्रकारतानिरूपकतात्मकत्वे एव सम्भवतीति विनिगमनादेव प्रकारित्वं नातिरिक्तमित्यर्थः ॥८१॥

"**तदवगाही**"ति। प्रकारित्वाद्यवगाही। "**इदं घटत्वेन जानामीत्याकारक**" इति। इदमिति द्वितीयया विशेष्यित्वमवगम्यते तच्च जानामीति ज्ञाधात्वर्थे विशेषणं, एवं घटत्वेनेति तृतीयया प्रकारित्वं बोध्यते तदपि ज्ञाधात्वर्थे विशेषणम्, एवञ्च इदंविशेष्यिता-शालिघटत्वप्रकारिताशालिज्ञानवानहम् मित्याकारकानुव्यवसायः, अनुव्यवसायस्य मनो जन्यत्वात् प्रकारित्वादेः प्रकारतानिरूपकतारूपत्वे मनोग्राह्यत्वाभावान्न प्रकारित्वादिविशेषण-

**नुव्यवसाये प्रकारित्वादेः सम्बन्धविधयैव भानोपगमात् संसर्गविधया भाने च सन्निकर्षस्यानपेक्षिततया अनुपपत्त्यभावादित्याहुः ॥८२॥**

**तदपि न। एवमपि संशयस्यानुपपादितत्वात् ॥८३॥**

**अपरे तु माभूत् प्रकारित्वादिविशिष्टबुद्धौ तज्ज्ञानहेतुता, स्वरूपतः प्रकारिता-त्वादिना विशिष्टबुद्धौ तु स्वरूपतस्तदवगाहिज्ञानस्य हेतुत्वकल्पनमावश्यकम्।**

---

कानुव्यवसायरूपव्यवसायविषयकज्ञानं मनसा भवितुमर्हति। ज्ञानाद्यन्तर्विषये वहिरिन्द्रिय-स्यायोग्यत्वाद् अन्येन्द्रियेनापि अनुव्यवसायो न स्यात्। न च निरूपकत्वांशे प्रकारत्वादेरुपनयमर्यादया भासते इति नानुपपत्तिरिति वाच्यम्। व्यवसायस्य प्रकार-त्वाद्यविषयकत्वेन तदुपनायकत्वाभावात्, तदुपनयार्थं ज्ञानान्तरकल्पने च व्यवसायनाशाद् अनुव्यवसायानुपपत्तेः।

इदं घटत्वेन जानामीत्यनुव्यवसाये विशेष्यित्वसम्बन्धेन इदं पदार्थस्य, प्रकारिता-सम्बन्धेन च घटत्वस्य ज्ञाने विशेषणात् प्रकारित्वविशेष्यित्वयोः संसर्गविधया भान-मित्यभिप्रेत्य समाधत्ते "**तादृशानुव्यवसाय**"इति। "**सन्निकर्षस्यानपेक्षिततये**"ति। इदन्त्वभ्युपगमवादेन। वस्तुतः प्रत्यक्षे संसर्गविधया भानेऽपि सन्निकर्षस्यापेक्षितत्वात्। अन्यथा संसर्गभानानुपपत्तिः, सर्वसंसर्गभानापत्तिर्वा स्यात्। न च बाधाभावबलादेव कदाचित् कश्चित् संसर्गः प्रत्यक्षविषय इति वाच्यम्, यत्र बहुषु संसर्गविषयेषु बाधाभावस्तत्र बहुसंसर्गभानापत्तिः। ननु यत्र बहुषु संसर्गेषु सन्निकर्षो विद्यते तत्र सन्निकर्षनियामकत्व-पक्षेऽपि बहुसंसर्गभानापत्तिरिति चेत्, सत्यं; तत्राननुगतसन्निकर्षस्य तत्तद्व्यक्तित्वेन हेतुत्वं प्रकल्प्याभिमतसंसर्गसन्निकर्षस्य हेतुत्वेनानभिमतसंसर्गभानापत्तिवारणात्। एतत्तु संसर्गसन्निकर्षहेतुतामते एव सम्भवतीति संसर्गसन्निकर्षस्य हेतुत्वमवश्यमभ्युपेयमिति ध्येयम् ॥८२॥

पूर्वोक्तं मतं खण्डयति "**तदपि ने**"ति। "**संशयस्यानुपपादितत्वादि**"ति। "**संशयस्य**" प्रामाण्यसंशयस्य। "**अनुपपादितत्वात्**" उपपादयितुमशक्यत्वादित्यर्थः। अयमभिसन्धिः—प्रामाण्यसंशयोऽपि मनसैवोत्पद्यते, प्रामाण्यस्य वहिर्विषयवृत्तिप्रकारता-निरूपकत्वरूपप्रकारिताघटिततया प्रामाण्यस्य मनसोऽयोग्यत्वात् मनसा प्रामाण्यसंशयस्याप्य-सम्भवात् प्रामाण्यसंशयानुपपत्तिरिति ॥८३॥

प्रकारित्वादीनां प्रकारितात्वेन प्रामाण्यघटकता, तत्र च प्रकारितात्वस्य स्वरूपतो भानं, एवञ्च विशिष्टबुद्धौ विशेषणज्ञानस्याहेतुत्वेऽपि स्वरूपतः प्रकारितात्वावगाहिबुद्धिं प्रति

**अन्यथा प्रमेयत्वादिना तत्प्रकारकप्रत्यक्षदशायां नियमेण स्वरूपतस्तत्प्रकारकप्रत्यक्षोत्पादप्रसङ्गात्। एवञ्च प्रकारितात्वाद्युपस्थितिविरहेण कथं स्वरूपतस्तत्प्रकारकप्रामाण्यावगाह्यनुव्यवसाय उत्पत्स्यते ॥८४॥**

**न च स्वरूपतः प्रकारितात्वाद्युपनीतभानं प्रत्येव तादृशप्रकारितात्वादिज्ञानस्य हेतुत्वं कल्प्यते। न तु तल्लौकिकप्रत्यक्षेऽपि। लौकिकप्रत्यक्षे स्वरूपतः प्रकारितात्वादिभाननैयत्यात्। एवञ्च प्रकारितात्वाद्यंशे लौकिकप्रामाण्यभाने न तदुपस्थित्यपेक्षेति वाच्यम् ॥८५॥**

---

स्वरूपतः प्रकारितात्वज्ञानस्य हेतुत्वावश्यकत्वात् स्वरूपतः प्रकारितात्वाद्युपस्थितिविरहेण कथमनुव्यवसायेन प्रामाण्यं गृह्यत इत्याशङ्क्यते "**अपरे त्वि**"त्यादिना।

"**स्वरूपतस्तदवगाही**"ति। स्वरूपतः प्रकारितात्वावगाहीत्यर्थः। "**प्रमेयत्वादिना तत्प्रकारकप्रत्यक्षदशायामि**"ति। प्रमेयत्वेन प्रकारितात्वप्रकारकप्रत्यक्षदशायामित्यर्थः। "**स्वरूपतस्तत्प्रकारके**"ति। स्वरूपतः प्रकारितात्वप्रकारकेत्यर्थः। "**प्रसङ्गादि**"ति। स्वरूपतः प्रकारितात्वप्रकारकप्रत्यक्षसामग्र्यास्तत्रापि सत्तया नियमेन स्वरूपतः प्रकारितात्वप्रकारकप्रत्यक्षापत्तिः स्यादित्यर्थः। प्रामाण्यावगाहिज्ञानस्य स्वरूपतः प्रकारितात्वाद्यवगाहितया स्वरूपतः प्रकारितात्वावगाहिज्ञानसामग्र्यास्तत्रापेक्षितत्वात्, तादृशी च सामग्री स्वरूपतः प्रकारितात्वज्ञानघटितैवेति स्वरूपतः प्रकारितात्वाद्युपस्थितिविरहेण कथमनुव्यवसाये प्रामाण्यभानमित्याह "**एवञ्चे**"ति ॥८४॥

ननु प्रकारितात्वाद्युपनीतभानं कदाचित् स्वरूपतस्तदवगाहि, कदाचिच्च प्रमेयत्वादिना तदवगाहीति, तन्नियामकतया स्वरूपतः प्रकारितात्वाद्युपनीतभानं प्रति स्वरूपतः तज्ज्ञानं हेतुः, प्रमेयत्वेन तदुपनीतभानं प्रति प्रमेयत्वेन तज्ज्ञानमिति कार्यकारणभाव आवश्यकः। प्रकारितात्वादिलौकिकप्रत्यक्षन्तु नियमेन स्वरूपतः प्रकारितात्वाद्यवगाह्येव, न तु कदाचिदपि प्रमेयत्वादिना प्रकारितात्वाद्यवगाहीति तल्लौकिकप्रत्यक्षं प्रति तादृशकार्यकारणभावकल्पनमनर्थकमिति प्रकारितात्वाद्यनुपस्थितौ अपि स्वरूपतः प्रकारितात्वादिघटितप्रामाण्यस्यानुव्यवसाये लौकिकभानं भवितुमर्हतीत्याशङ्क्यते "**न चे**"ति। वाच्यमितिपरेणान्वयः। "**न तदुपस्थित्यपेक्षे**"ति। न प्रकारितात्वाद्युपस्थित्यपेक्षेत्यर्थः। अनुव्यवसाये प्रामाण्यघटकीभूतप्रकारितात्वाद्यंशे लौकिकतया प्रकारितात्वादिलौकिकभानं प्रति प्रकारितात्वादिज्ञानस्याहेतुत्वादिति भावः ॥८५॥

उपनीतभानस्थले तादृशोपस्थितिहेतुत्वे सिद्धे लाघवात् तथैव लौकिकान्यत्वमनिवेश्य लौकिकालौकिकसाधारणस्य स्वरूपतस्तद्विशिष्टबुद्धित्वस्यैव जन्यतावच्छेदकत्वोपगमादित्याहुः ॥८६॥

तदप्यसत्, एवमपि प्रामाण्यादिज्ञानप्रामाण्यस्वतस्त्वानपायात्। तादृशाव्यवसाये नियमतः प्रकारितात्वाद्यवगाहित्वात् ॥८७॥

अत्रोच्यते, उपदर्शितसामग्रीबलात् विशृङ्खलप्रामाण्यघटकीभूतनिखिलपदार्थविषयितानामनुव्यवसाये सिद्धावपि विशिष्टप्रामाण्यविषयितायां मानाभावात् ॥८८॥

---

उपनीतभानत्वं लौकिकान्यज्ञानत्वं, तथाच स्वरूपतः प्रकारितात्वादिलौकिकान्यभानं प्रति स्वरूपतः प्रकारितात्वादिज्ञानं हेतुरिति कार्यकारणभावोऽत्र पर्यवसितः, तत्र कार्यतावच्छेदककुक्षौ लौकिकान्यत्वनिवेशेन गौरवात् लौकिकालौकिकसाधारणरूपेण स्वरूपतः प्रकारितात्वादिभानं प्रति स्वरूपतः प्रकारितात्वादिज्ञानं हेतुरिति लघुतरकार्यकारणभावस्यैवौचित्यात्। तथाच स्वरूपतः प्रकारितात्वाद्यनुपस्थितौ न स्वरूपतः प्रकारितात्वादिघटितप्रामाण्यप्रत्यक्षमिति नानुव्यवसाये प्रामाण्यभानमित्यभिप्रेत्य अपरेत्वित्यादिनोक्तं पूर्वपक्षं द्रढयति "**उपनीतभानस्थल**" इत्यादिना ॥८६॥

अपरेत्वित्याद्युक्तं पूर्वपक्षं निरस्यति "**तदप्यसदि**"ति। "**प्रामाण्यादिज्ञानप्रामाण्यस्वतस्त्वानपायादि**"ति। प्रामाण्यज्ञाननिष्ठं यत्प्रामाण्यं तस्य स्वतस्त्वानपायात् स्वाश्रयग्राहकसामग्रीमात्रग्राह्यत्वानपायादित्यर्थः, प्रामाण्यज्ञानानुव्यवसायग्राह्यत्वादिति यावत्। "**तादृशाव्यवसाय**"इति। प्रामाण्यज्ञानात्मकव्यवसाय इत्यर्थः। "**प्रकारितात्वाद्यवगाहित्वात्**" प्रामाण्यघटकीभूतप्रकारितात्वादिभानात्। तथा च प्रामाण्यज्ञाननिष्ठप्रामाण्ये तादृशप्रामाण्याश्रयीभूतं यत्प्रामाण्यज्ञानं तद्ग्राहकसामग्रीमात्रग्राह्यत्वात् तादृशप्रामाण्यस्य स्वतस्त्वमिति भावः ॥८७॥

'**अत्र वदन्ति बहव**' इत्यादिनोक्तं मुरारिमिश्रमतानुयायिनां प्रामाण्यस्यानुव्यवसायग्राह्यत्वाभ्युपगन्तॄणां केषाञ्चित्प्राचीननैयायिकानां मतं दूषयति "**अत्रोच्यत**"इति। "**अत्र**" प्रामाण्यस्य स्वतस्त्वे। "**उच्यत**"इति। प्रामाण्यस्यानुव्यवसायग्राह्यत्वानभ्युपगन्तृभिर्नैयायिकैरुच्यत इत्यर्थः, वक्ष्यमाणदूषणमिति शेषः। "**विशिष्टप्रामाण्यविषयितायां मानाभावादि**"ति। तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वरूपविशिष्टस्यैव प्रामाण्यत्वं, अनुव्यवसाये प्रकारकत्वविशेष्यकत्वादिविषयितासत्त्वेऽपि तादृशविशिष्टप्रामाण्यविषयितायां मानाभावादित्यर्थः ॥८८॥

**न च ताद्दशविशिष्टविषयितानियामकबाधाभावादिघटितसामग्रीबलात् अनुव्यवसायादेस्ताद्दशविषयिताशालित्वे बाधकाभाव इति वाच्यम् ।**

**बाधाभावादिना ताद्दशविशिष्टप्रामाण्यावगाहिज्ञानजनने तत्तत्प्रकारिताविशेष्यिताज्ञानस्य सहकारित्वात् ॥८९॥**

**न च प्रामाण्यग्रहे प्रकारिताविशेष्यिताज्ञानस्य हेतुताया अक्लृप्तत्वात् कथं बाधाभावादीनां प्रामाण्यग्रहजनने तस्यापेक्षेति वाच्यम् ।**

**मन्मते प्रकारित्वादिज्ञानानन्तरमेव प्रामाण्यग्रहोत्पत्त्या तत्र लौकिकान्यप्रकारित्वादिविषयितानियमात् । ताद्दशबोधे उपनायकज्ञानविधयैव प्रकारित्वादिज्ञानहेतुतायाः क्लृप्तत्वात् । तस्माल्लौकिकान्यप्रकारित्वादिरूपव्यापकधर्मावच्छिन्नसामग्रीविरहान्न प्रकारित्वादिज्ञानशून्यकाले बाधाभावादि-**

---

ननु विशिष्टप्रामाण्यभाननियामकमेव विशिष्टप्रामाण्यविषयितायां मानं, बाधाभावादिघटितसामग्री च ताद्दशप्रामाण्यभाननियामिका इत्याशङ्क्यते "**न चे**"ति । "**ताद्दशविषयिताशालित्वे**" विशिष्टप्रामाण्यविषयिताशालित्वे । "**बाधकाभाव**"इति । व्यवसायनिष्ठयोः प्रकारित्वविशेष्यित्वयोः संयुक्तसमवेतविशेषणतासम्बन्धेन मनःसन्निकृष्टयोरनुव्यवसाये भासमानयोः बाधाभावबलात् निरूपकत्वसम्बन्धेन विशेषणविशेष्यभावसिद्धेः, तथा च ताद्दशप्रकारित्वांशे ताद्दशविशेष्यकत्वस्य निरूपकत्वसम्बन्धेन विशेषणात् अनुव्यवसाये विशेष्यकत्वविशिष्टप्रकारत्वभानात् विशिष्टप्रामाण्यविषयितायां बाधकाभाव इत्यर्थः ।

परिहरति "**बाधाभावादिने**"ति । "**तत्तत्प्रकारिताविशेष्यिताज्ञानस्य सहकारित्वादि**"ति । तथा च पूर्वमनुपस्थितयोः प्रकारिताविशेष्यितयोः न विशेषणविशेष्यभाव इत्यनुव्यवसाये न प्रामाण्यभानमिति भावः ॥८६॥

पुनः शङ्कते "**न चे**"ति । "**हेतुताया अक्लृप्तत्वादि**"ति । विशेषणज्ञानस्याहेतुत्वाल्लौकिकसन्निकर्षसत्त्वाच्च न प्रकारिताविशेष्यिताज्ञानं हेतुरित्यर्थः ।

परिहरति "**मन्मत**"इति । न्यायमते इत्यर्थः । न्यायमते च प्रामाण्यज्ञाने प्रकारित्वादीनां उपनीतभानम् । लौकिकान्यतद्विषयिताशालिज्ञानं प्रति तज्ज्ञानत्वेन हेतुत्वात् लौकिकान्यप्रकारित्वादिविषयितायामपि प्रकारितादिज्ञानं नियामकं तदभावात् कथं प्रकारित्वादिघटितप्रामाण्यग्रह इत्यर्थः । ननु भवत्वेतत् न्यायमते, मिश्रमते तु प्रकारित्वादीनां लौकिकभानात् न तत्र प्रकारितादिज्ञानहेतुतेति ताद्दशविशिष्टप्रामाण्यभाने बाधकाभाव इति चेत्; मैवं लौकिकज्ञाने विशेष्यविशेषणभावे न बाधाभावमात्रं नियामकः, गवि अश्वे च

**बलात् प्रामाण्यग्रहप्रसङ्ग इति कथं सामग्रीबलात् प्रामाण्यस्य स्वतोग्राह्यतेति ॥९०॥**

**अथैवमपि प्रामाण्यादिघटितप्रामाण्यस्य स्वतो ग्राह्यत्वं दुर्वारमेव प्रामाण्यग्रहकाले विशेष्यिताप्रकारिताद्युपस्थितेरावश्यकत्वादिति चेत् ॥९१॥**

**भ्रान्तोऽसि नहि सामान्यतः प्रकारिताद्युपनीतभानं प्रति प्रकारिताज्ञानत्वादिना हेतुता। एकप्रकारितादिव्यक्तिज्ञानात् प्रकारितादिव्यक्त्यन्तरोपनीतभानप्रसङ्गात्। किन्तु तत्तत्प्रकारितादिविषयकोपनीतभाने तत्तत्प्रकारितादिविषयकज्ञानत्वेन हेतुता। एवञ्च घटत्ववद्विशेष्यकत्वादिघटितप्रामाण्यग्रहकाले घटादिविशेष्यकत्वघटत्वादिप्रकारकत्वादीनामेव भाननैयत्यं तेषां तादृशप्रामाण्यघटकत्वात्। न तु तादृशप्रामाण्यप्रकारित्वादीनाम्। तथा च न प्रामाण्यघटितप्रामाण्यस्य स्वतोग्रहापत्तिः ॥९२॥**

---

समकालेन्द्रियसन्निकर्षदशायां गवि अश्वत्वस्य अश्वे च गोत्वस्य बाधासत्त्वे गवि अश्वत्वस्य, अश्वे च गोत्वस्यापि विशेषणतापत्तिः। अतो गोत्वे गोघटितसन्निकर्ष एव गवि गोत्वस्य विशेषणत्वनियामकः। लौकिकान्यविशेष्यविशेषणभावस्थले तु बाधाभाव एव नियामकः, तथा च प्रकारित्वविशेष्यित्वयोः बाधाभावादिबलात् विशेष्यविशेषणभावस्वीकारे तयोर्लौकिकान्यभानं स्वीकार्यं, लौकिकान्यज्ञाने तयोः ज्ञानस्याप्यपेक्षितत्वात् नानुपस्थितयोस्तयोरनुव्यवसाये भानमिति दिक् ॥९०॥

ननु प्रामाण्यज्ञानानुव्यवसायस्य प्रामाण्यज्ञाननिष्ठप्रामाण्यविषयकत्वे बाधाभावः। तत्र व्यवसायस्य प्रामाण्यघटकीभूतप्रकारित्वादियावत्पदार्थविषयकत्वादिति प्रामाण्यज्ञाननिष्ठप्रामाण्यस्य स्वाश्रयीभूतप्रामाण्यज्ञानग्राहकसामग्रीग्राह्यत्वरूपस्वतस्त्वमव्याहतमित्याशङ्कते "**अथैवमि**"ति। "**एवमपी**"ति। प्रामाण्यज्ञानं प्रति प्रामाण्यघटकीभूतप्रकारित्वादिज्ञानस्य हेतुत्वेऽपीत्यर्थः। "**प्रामाण्यघटितप्रामाण्यस्य**" प्रामाण्यवद्विशेष्यकत्वावच्छिन्नप्रामाण्यप्रकारित्वात्मकस्य। "**प्रामाण्यग्रहकाले**" तादृशप्रामाण्यघटकीभूतप्रामाण्यग्रहकाले, व्यवसायकाल इति यावत्। "**आवश्यकत्वादि**"ति। व्यवसायविषयीभूतप्रामाण्यघटकीभूतप्रकारित्वविशेष्यित्वादीनामुपस्थितेरावश्यकत्वादित्यर्थः ॥९१॥

समाधत्ते "**भ्रान्तोऽसी**"ति। "**न तु तादृशप्रामाण्यप्रकारित्वादीनामि**"ति। प्रामाण्यघटितप्रामाण्यप्रकारित्वादीनामित्यर्थः। तथा च प्रामाण्यज्ञानानुव्यवसाये न प्रामाण्य-

**अथैवं पृथिवीति ज्ञाने जाते इत्यादिना द्वितीयव्यवसाये प्रामाण्यग्रहाभिधानं मिश्राणां नोपपद्यते, प्रथमानुव्यवसाये प्रथमव्यवसायनिष्ठप्रकारित्वादीनामेव भानात्, द्वितीयव्यवसायवृत्तिप्रकारित्वादीनामनुपस्थित्या तद्घटिततदीयप्रामाण्यस्य भानासम्भवादिति चेत् ॥९३॥**

**स्यादियमनुपपत्तिस्तदैव यदि ज्ञानव्यक्तिभेदेन प्रकारितादिकं भिद्यते। न चैवं मानाभावात्, विषयभेदेन प्रकारित्वादिभेदस्तु अन्यत्र व्यवस्थापितः ॥९४॥**

**अस्तु वा ज्ञानव्यक्तिभेदेनापि प्रकारिताभेदः, तथापि सामान्यलक्षणायाः प्रत्यासत्तित्वमङ्गीकुर्वतां नैयायिकानां तथाविधोदीच्यानुव्यवसायेन प्रामाण्य-**

---

वद्विशेष्यकत्वावच्छिन्नप्रामाण्यप्रकारित्वरूपप्रामाण्यभानम् सम्भवति। व्यवसाये प्रामाण्यज्ञाने प्रामाण्यप्रकारित्वादीनामविषयत्वादिति भावः ॥६२॥

यत्र पृथिवीति ज्ञानानन्तरं तदनुव्यवसायस्तदनन्तरं पुनः पृथिवीति ज्ञानं तदनुव्यवसायेन च विशेष्यिताप्रकारिताविषयकपूर्वानुव्यवसायरूपज्ञानप्रत्यासत्तिबलात् प्रामाण्यं गृह्यत इति चिन्तामणिकारोक्तप्रथमविप्रतिपत्तिघटकयावत्त्वविशेषणस्य सार्थक्यविचारे पक्षधरमिश्रैरुपवर्णितं तन्नोपपद्यते ज्ञानव्यक्तिभेदेन प्रकारित्वादीनां भेदात्। प्रथमानुव्यवसायेन प्रथमानुव्यवसायनिष्ठप्रकारित्वादीनां ग्रहणात्, तत्तु न द्वितीयव्यवसाये, द्वितीयव्यवसायनिष्ठं प्रामाण्यमपि न प्रथमव्यवसायनिष्ठप्रकारित्वादिघटितमिति द्वितीयव्यवसायनिष्ठप्रामाण्यघटकप्रकारित्वादीनां प्रथमानुव्यवसायेनाग्रहणात्, न द्वितीयानुव्यवसायेनापि प्रामाण्यं ग्रहितुं शक्यत इत्याशङ्कते "**अथैवमि**"ति ॥६३॥

ज्ञानव्यक्तिभेदेन प्रकारित्वादीनां भेदाभावादुक्तानुपपत्तिं वारयति "**स्यादियमि**"त्यादिना। ज्ञानव्यक्तिभेदेन प्रकारित्वादिनामभेदे प्रथमव्यवसायवृत्तिप्रामाण्यघटकीभूतप्रकारित्वादीनां द्वितीयव्यवसायवृत्तिप्रामाण्यघटकीभूतप्रकारित्वादीनाञ्चैक्यात् प्रथमानुव्यवसायेनैव द्वितीयव्यवसायवृत्तिप्रामाण्यघटकप्रकारित्वादीनामुपस्थित्या तद्घटिततदीयप्रामाण्यभानसम्भवादिति भावः। "**व्यवस्थापित**" इति। घटत्वप्रकारित्वस्य पटत्वप्रकारित्वस्य चैक्ये घटइत्याकारकज्ञानमपि पटत्वप्रकारकं स्यादिति विषयभेदेन प्रकारिताभेदो व्यवस्थापित इति भावः ॥६४॥

ननु प्रकारित्वादीनां स्वरूपसम्बन्धात्मकत्वात् ज्ञानस्वरूपमेव प्रकारित्वादिकमिति ज्ञानव्यक्तिभेदेन प्रकारित्वादिभेदो दुर्वार इत्यत आह "**अस्तु वे**"ति। ज्ञानप्रामाण्यं

**ग्रहे बाधकाभावः। तथाहि प्रथमव्यवसायानन्तरं ज्ञानत्वप्रकारित्वादीनां निर्विकल्पकम्, तदुत्तरं पृथिवीत्वप्रकारित्वादिविशिष्टज्ञानत्वेन तदनुव्यवसाये प्रकारितात्वादिसामान्यज्ञानात् निखिला एव प्रकारितादयो भासन्ते। एवञ्च उदीच्यव्यवसायवृत्तिप्रकारित्वादीनामपि ज्ञानसत्त्वात् तदनुव्यवसायेन तद्घटितप्रामाण्यं गृह्यत एवेति ॥९५॥**

**अथ विशिष्टप्रामाण्योपस्थितिं विना न प्रत्यक्षमिति चेन्नैयायिकमतं तदा प्रकारिताविशेष्यिताज्ञानस्य प्रामाण्यग्रहहेतुताया च क्लृप्तत्वेऽपि न निर्वाहः। विशृङ्खलप्रकारित्वादिपदार्थज्ञानात् प्रामाण्यग्रहस्य दुर्वारत्वादिति चेन्न ॥९६॥**

**तन्मते घटविशेष्यकत्वविशिष्टघटत्वप्रकारकत्वादिप्रामाण्यग्रहस्य घटविशेष्यकत्वविशिष्टघटत्वप्रकारकत्वादिवैशिष्ट्यावगाहितया तत्र विशिष्टप्रामाण्य-**

---

तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं नवेति मणिकारीयप्रथमविप्रतिपत्तौ तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वाभावरूपनैयायिककोटौ यावत्त्वनिवेशसार्थक्यप्रदर्शनवेलायां मिश्रैस्तदभिहितमिति न्यायमतेन तादृशाभिधानं मिश्राणामित्यवगम्यते। नैयायिकास्तु सामान्यलक्षणां प्रत्यासत्तिं स्वीकुर्वन्तीति प्रथमानुव्यवसाये ज्ञानलक्षणप्रत्यासत्त्या प्रकारितात्वेन यावत्प्रकारिताविषयकत्वात् द्वितीयव्यवसायवृत्तिप्रकारित्वादीनामुपस्थित्या तद्घटितप्रामाण्यभाने बाधाभाव इत्याह **"तथापी"**ति। सामान्यलक्षणप्रत्यासत्त्या यावत्प्रकारिताज्ञानोत्पत्तौ प्रकारमाह **"तथाही"**ति। **"निर्विकल्पकमि"**ति। सामान्यलक्षणया ज्ञानजनने सामान्यज्ञानस्यापेक्षितत्वात्, न्यायमते विशिष्टबुद्धौ विशेषणज्ञानस्यापेक्षितत्वाच्च प्रथमानुव्यवसायपूर्वं प्रकारित्वादीनां निर्विकल्पकज्ञानानुसरणम् ॥९५॥

न्यायमते विश्रृङ्खलरीत्या प्रामाण्यघटकप्रकारित्वादिसकलपदार्थज्ञानात् न विशिष्टप्रामाण्यग्रहो भवतीति तन्निर्वाहाय विशिष्टप्रामाण्यग्रहं प्रति विशिष्टप्रामाण्योपस्थितेरेव हेतुता न्यायमते वाच्या। न तु प्रकारिताविशेष्यिताज्ञानस्य हेतुता, तथात्वेऽपि विश्रृङ्खलरीत्या प्रामाण्यघटकपदार्थज्ञानात् प्रामाण्यग्रहानुत्पादस्यानिर्वाहात्। तथा च पूर्वोपदर्शितस्थले कथं द्वितीयानुव्यवसायेन प्रामाण्यग्रहः। प्रथमानुव्यवसायेन विशिष्टप्रामाण्यस्यानुपस्थितेरित्याशयेन शङ्कते **"अथे"**ति ॥९६॥

इदं ज्ञानं घटत्ववति घटत्वप्रकारकमित्याकारकप्रामाण्यज्ञानस्य घटत्ववद्विशेष्यकत्वविशिष्टघटत्वप्रकारकत्वप्रकारकतया घटत्ववद्विशेष्यकत्वविशिष्टघटत्वप्रकारकत्ववैशिष्ट्यावगा-

ग्रहस्य विशेषणतावच्छेदकप्रकारकज्ञानमुद्रया हेतुतायाः क्लृप्तत्वात् तत्-सहकारेणैव बाधाभावादिघटितसामग्र्याः प्रामाण्यग्राहकत्वोपगमेन विशिष्ट-प्रामाण्योपस्थितिं विना प्रामाण्यग्रहानवकाशात् ॥९७॥

न च विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकज्ञानहेतुताया मीमांसकैरनभ्युपगमादिति तादृशकारणताया एवाधिक्यं नैयायिकमते इति वाच्यम् ॥९८॥

विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयहेतुताकल्पने बहुधालाघवस्य विशिष्टवैशिष्ट्यबोधविचारे दर्शितत्वात्। तत्कल्पनाधिक्य-स्याकिञ्चित्करत्वादिति ॥९९॥

---

हित्वात् विशिष्टवैशिष्ट्यावगाहिज्ञाने च विशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्य हेतुत्वात् घटत्ववद्विशेष्यकत्वप्रकारकघटत्वप्रकारकत्वज्ञानमेव प्रामाण्यभाननियामकमिति न विश्रृङ्खलप्रकारितादिज्ञानात् प्रामाण्यभानापत्तिरिति समाधत्ते **"तन्मत"** इति। न्यायमते इत्यर्थः। प्रामाण्यघटकघटत्ववद्विशेष्यकत्वरूपविशेषणतावच्छेदकप्रकारकज्ञानात् प्रामाण्यभानोपगमे विशिष्टप्रामाण्योपस्थितिं विना न प्रामाण्यग्रहः सम्भवतीत्याह **"विशिष्टे"**ति ॥९७॥

विशिष्टवैशिष्ट्यावगाहिज्ञानं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वसिद्धावेव विशेष्यिताप्रकारित्वादीनां विश्रृङ्खलोपस्थितिदशायां विशिष्टप्रामाण्यग्रहापत्तिवारणं सम्भवति तदेवासिद्धं विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति विशेषणतावच्छेदकादेर्युगपदिन्द्रिय-सन्निकर्षो हेतुः, तादृशानुमित्यादिकं प्रति तु तादृूप्येण व्याप्त्यादिज्ञानं हेतुः। तथा च क्लृप्तहेतुतयैव निर्वाहेऽतिरिक्तविशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुत्वं गौरवग्रस्त-मित्याशङ्कते **"नचे"**ति ॥९८॥

विशिष्टबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुत्वं व्यवस्थाप्य नचेत्याद्युक्तं पूर्वपक्षं खण्डयति **"विशिष्टवैशिष्ट्ये"**ति। **"दर्शितत्वादि"**ति। कदाचित् संयोगेन दण्डादिविशिष्टस्य प्रकारता कदाचित् सम्बन्धान्तरेणैव तद्विशिष्टस्येत्यस्य उपपत्त्यर्थं अननुगतानां तत्तत्सन्निकर्षाणां तत्तद्व्यक्तित्वेन तत्तत्प्रत्यक्षं प्रति हेतुत्वं वाच्यम्। तथा चानन्तकार्यकारणभावकल्पनापत्तिस्तदपेक्ष्य तत्तत्सम्बन्धेन तत्तद्विशिष्टविषयकज्ञानस्य तादृशविशिष्टप्रकारकज्ञानहेतुत्वकल्पने लाघवमित्यादिलाघवस्य दर्शितत्वादित्यर्थः ॥९९॥

**अथ प्रामाण्यानुमित्याद्यनन्तरं तदुपनीतप्रामाण्यविशेष्यकमानसस्यापि प्रसिद्ध्या तस्योक्तविशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकानाक्रान्ततया विशृङ्खलप्रकारितात्वाद्युपस्थितिकाले तादृशप्रामाण्यग्रहस्य दुर्वारतेति चेत्।**

**तर्हि प्रामाण्यप्रत्यक्षत्वावच्छिन्नं प्रति प्रामाण्यविषयकोपस्थितेः पृथगेव हेतुत्वं कल्प्यते ॥१००॥**

**न चैवं कल्पनाधिक्याद्गौरवमित्याशङ्कनीयम्, तादृशकारणताकल्पने इच्छाविशिष्टप्रामाण्योपनीतभानसामग्र्या अनुमित्यादिप्रतिबन्धकतायां लाघवात्।**

---

ननु प्रामाण्यप्रकारकबोधं प्रति विशेषणतावच्छेदकप्रकारकज्ञानमुद्रया तद्वद्विशेष्यकत्वादिप्रकारकज्ञानस्य हेतुत्वेन विशृङ्खलविशेष्यकत्वादिज्ञानात् प्रामाण्यप्रकारकप्रत्यक्षापत्तिवारणेऽपि प्रामाण्यविशेष्यकप्रत्यक्षापत्तिर्दुर्वारा। तत्र प्रामाण्यघटकीभूतविशेष्यकत्वादिप्रकारकज्ञानस्याहेतुत्वादित्याशङ्कते "**अथे**"ति। ननु प्रामाण्यविशेष्यकप्रत्यक्षस्य प्रसिद्धत्वे एव तदापत्तिः सम्भवतीत्यतः प्रथमं तस्यैव प्रसिद्धिं दर्शयति "**प्रामाण्यानुमित्याद्यनन्तरमि**"त्यादिना। तत्र प्रामाण्यस्योपनयार्थं प्रामाण्यानुमितीत्युक्तम्। प्रामाण्यविशेष्यकलौकिकप्रत्यक्षाप्रसिद्ध्या "**तदुपनीते**"ति। प्रामाण्योपनीतेत्यर्थः। बहिरिन्द्रियजन्यज्ञाने उपनीतं विशेषणतयैव भासते इति नियमात् उपनीतप्रामाण्यविशेष्यकचाक्षुषाद्यप्रसिद्ध्या मानसग्रहणम्, मानसे तु नायं नियमः, अतः उपनीतविशेष्यकमानससम्भवादिति भावः।

"**तस्ये**"ति। प्रामाण्यविशेष्यकमानसस्येत्यर्थः। "**तादृशप्रामाण्यग्रहस्य**" प्रामाण्यविशेष्यकमानसप्रत्यक्षस्येत्यर्थः।

समाधत्ते "**तर्ही**"ति। "**कल्प्यत**" इति। तथा च विशृङ्खलरीत्या विशेष्यकत्वाद्युपस्थितिदशायां विशिष्टप्रामाण्योपस्थितेरभावान्न तादृशमानसप्रत्यक्षम्। प्रामाण्यानुमित्याद्यनन्तरन्तु विशिष्टप्रामाण्योपस्थितिसत्त्वात् तादृशप्रत्यक्षम् ॥१००॥

ननु प्रामाण्यविषयकज्ञानत्वेनातिरिक्तकारणत्वकल्पनात् गौरवमित्याशङ्कते "**नन्वेवमि**"ति। परिहरति "**तादृशे**"ति। "**तादृशकारणताकल्पन**"इति। प्रामाण्यविषयकोपस्थितेः कारणताकल्पन इत्यर्थः। "**इच्छाविशिष्टप्रामाण्योपनीतभानसामग्र्या**" इति। यत्र प्रामाण्योपनीतभानं जायतामितीच्छा, प्रामाण्योपनीतभानसामग्री च विद्यते, एवमनुमितिसामग्र्यप्यस्ति तत्र प्रामाण्योपनीतभानमेव भवेत् नत्वनुमितिः।

**तथाहि तादृशसामग्रीप्रतिबन्धकतायाम् एतन्मते घटत्ववद्विशेष्यकत्व-विशिष्टघटत्वप्रकारकत्वविषयकज्ञानं यत्र निवेशनीयम्, भवतां तत्स्थलीय-प्रामाण्यघटकीभूतप्रकारिताविशेष्यिताप्रभृतिपदार्थानामुपस्थितिकूटस्य निवेशः। तत्र च तावतीनामुपस्थितीनां परस्परविशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्यम्, अवच्छेदकगौरवञ्च स्फुटतरमेव ॥१०१॥**

**मन्मते घटत्ववद्विशेष्यकत्वविषयतानिरूपिता या घटत्वप्रकारकत्वविषयता तच्छालिज्ञानत्वेन, घटत्वप्रकारकत्वविषयतानिरूपितघटविशेष्यकत्वविषयता-शालिज्ञानत्वादिना वा प्रामाण्योपस्थितेर्निवेश इत्यत्र विनिगमकाभावेन कतिपयकारणताबाहुल्येऽपि उपस्थितिकूटस्य निवेशापेक्षया कार्यकारणभावाना-मल्पता, अवच्छेदकलाघवञ्च मन्यताम्। उक्तपूर्वपक्षसमाधानादिकन्तु तन्मता-वलम्बनेनैव ॥१०२॥**

---

इच्छाघटितसामग्र्या बलवत्त्वात्। एवञ्च तत्रानुमितिवारणार्थमनुमितिं प्रति इच्छाविशिष्ट-प्रामाण्योपनीतभानसामग्र्याः प्रतिबन्धकत्वं वाच्यम्। तथा च तादृशकारणताकल्पने अल्पकारणघटितसामग्र्याः प्रतिबन्धकत्वकल्पनात् लाघवमित्यर्थः।

उक्तलाघवमेव दर्शयति मूले "**तथाही**"ति। ननु प्रामाण्यघटकीभूतसकलपदार्थोप-स्थितीनां एकोपस्थितिविशिष्टापरोपस्थितीत्यादिक्रमेण एकैव कारणतेत्येतत् कल्पेऽपि न कारणता-बाहुल्यमित्यत आह "**तत्र चे**"ति। "**विनिगमनाविरहेणे**"ति। तथा च प्रकारितो-पस्थितिविशिष्टविशेष्यितोपस्थितित्वेन, विशेष्यितोपस्थितिविशिष्टप्रकारितोपस्थितित्वेन हेतुत्व-मित्यत्र विनिगमनाविरहादित्यर्थः। "**अवच्छेदकगौरवञ्चे**"ति। विशेषणीभूततत्तदुप-स्थितीनां कारणतावच्छेदकत्वापत्त्या कारणतावच्छेदकगौरवमित्यर्थः ॥१०१॥

ननु घटविशेष्यकत्वविशिष्टघटत्वप्रकारकत्वं प्रामाण्यं, तादृशप्रामाण्यज्ञानस्य घटविशेष्य-कत्वविषयतानिरूपितघटत्वप्रकारकत्वविषयताशालिज्ञानत्वेन हेतुत्वं, घटत्वप्रकारकत्वविषयता-निरूपितघटविशेष्यकत्वविषयताशालिज्ञानत्वेन वेत्यत्र विनिगमकाभावात् प्रामाण्यविषयकज्ञान-हेतुतामतेऽपि कारणताबाहुल्यमित्याशङ्कायामाह "**मन्मत**"इति। "**उपस्थितिकूटस्ये**"ति। प्रामाण्यघटकीभूत-प्रकारकत्व-विशेष्यकत्व-घट-घटत्वाद्युपस्थितीनामित्यर्थः। "**कार्यकारण-भावानामल्पते**"ति। बहूनामुपस्थितीनां कारणत्वे कार्यकारणभावानां बहुत्वं स्यात् प्रामाण्यज्ञानत्वेन हेतुतामते तु पूर्वोक्तक्रमेण विनिगमनाविरहेऽपि द्वैविध्यमेवेति प्रामाण्यज्ञानस्य हेतुतामते लाघवमिति भावः। यदि एकोपस्थितिविशिष्टापरोपस्थितीत्यादिक्रमेण कार्य-

**पक्षधरमिश्रास्तु तादृशनियममनभ्युपगम्यैव विशृङ्खलविशेष्यिताप्रकारितादिज्ञानात् प्रामाण्योपनीतभानं स्वीकृतवन्त इति तु ध्येयम् ॥१०३॥**

**परे तु प्रामाण्यस्य स्वतस्त्वमेव वारयन्ति। धर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नत्वविशिष्टमेव विशेषणप्रकारकत्वमनुव्यवसायो गृह्णाति। न तु धर्मान्तरविशिष्टविशेष्यकत्वावच्छिन्नविशिष्टम्। अयञ्च घटश्चेत्याद्याकारकसमूहालम्बनानन्तरमिदं विशेष्यकत्वावच्छिन्नत्वविशिष्टघटत्वप्रकारकत्वादिप्रकारकस्य अत्र घटत्वं जानामीत्याद्याकारकानुव्यवसायस्यानुदयात् ॥१०४॥**

---

कारणाभावः कल्प्येत, तदापि विनिगमनाविरहेण कारणताबाहुल्यमवच्छेदकगौरवञ्च स्यादित्याह "**अवच्छेदकगौरवञ्चे**"ति। "**उक्त पूर्वपक्षसमाधानादिकन्त्वि**"ति। विशृङ्खलविशेष्यित्वाद्युपस्थितिदशायां प्रामाण्यविशेष्यकप्रत्यक्षापत्तिः स्यादित्यादिपूर्वपक्षस्य समाधानादिकमित्यर्थः। "**तन्मतावलम्बनेनैवे**"ति। पूर्वोक्तलाघवादियुक्त्या प्रामाण्यप्रत्यक्षत्वावच्छिन्नं प्रति प्रामाण्यज्ञानत्वेन हेतुत्वस्य क्लृप्तत्वात् तन्मतावलम्बनेनैव पूर्वपक्षस्य समाधानमित्यर्थः ॥१०२॥

ननु विशिष्टप्रामाण्योपस्थितिं विना न प्रामाण्यप्रत्यक्षमिति यदि नैयायिकानां मतं तदा विशृङ्खलविशेष्यितादिज्ञानात् कथं पक्षधरमिश्राणां प्रामाण्यभानाभ्युपगम इत्याशङ्कायामाह "**पक्षधरमिश्रास्त्वि**"ति। "**तादृशनियमम्**" विशिष्टप्रामाण्योपस्थितिं विना न प्रामाण्यप्रत्यक्षमिति नियममित्यर्थः ॥१०३॥

पर्वतो वह्निमानित्यादिव्यवसायस्यानुव्यवसायेन पर्वतत्वविशिष्टविशेष्यकत्वावच्छिन्नवह्निप्रकारकत्वं गृह्यते, तत्तु न प्रामाण्यम्; प्रामाण्यन्तु वह्निविशिष्टविशेष्यकत्वावच्छिन्नवह्निप्रकारकत्वं, तत्तु नानुव्यवसायेन गृह्यत इति कुतः प्रामाण्यस्य स्वतस्त्वमित्यभिप्रायेण केचिन्नैयायिकाः प्रामाण्यस्य स्वतस्त्वमेव खण्डयन्ति तन्मतमुत्थापयति "**परेत्वि**"ति। "**धर्मितावच्छेदकविशिष्टे**"ति। अयं घट इत्यादि व्यवसायस्थले धर्मितावच्छेदकीभूतेदन्त्वविशिष्टविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वमनुव्यवसायो गृह्णातीति भावः। "**न तु धर्मान्तरविशिष्टे**"ति। धर्मितावच्छेदकभिन्नो यो धर्मो घटत्वं तद्विशिष्टविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वं नानुव्यवसायो गृह्णातीत्यर्थः। धर्मितावच्छेदकभिन्नधर्मावच्छिन्नविशेष्यकत्वावच्छिन्नप्रकारकत्वस्यानुव्यवसायग्राह्यत्वे दोषमाह "**अयञ्च घटश्चे**"त्यादि। अयं घट इत्यादिव्यवसायस्यानुव्यवसाये यदि घटत्वांशे धर्मितावच्छेदकभिन्नं यत् घटत्वं तद्वि-

**अत एवोत्पत्तिवादे व्यापकविषयकप्रत्यक्षस्य व्याप्यविषयकत्वनियमे तदनुव्यवसायेन व्याप्यवति व्यापकप्रकारकत्वरूपव्यापकप्रत्यक्षीयप्रमात्वव्याप्यधर्मस्य ग्रहात् तत्तत्संशयो न स्यादित्यत्रानुमिताविवेति चिन्तामणिकारीयदृष्टान्तप्रदर्शनस्य लिङ्गोपहितलैङ्गिकभानाभिप्रायकत्वं दीधितिकृता वर्णितम् ॥१०५॥**

---

शिष्टविशेष्यकत्वावच्छिन्नप्रकारकत्वमवगाहते, तदा अयञ्च घटश्चेति समूहालम्बनस्यानुव्यवसायेऽपि घटत्वांशे धर्मितावच्छेदकभिन्नं यदिदन्त्वं तद्विशिष्टविशेष्यकत्वावच्छिन्नप्रकारकत्वमवगाहेतेति तादृशसमूहालम्बनव्यवसायस्यानुव्यवसाये अत्र घटत्वं जानामीत्याकारकत्वापत्तिः स्यादिति भावः ॥१०४॥

अनुव्यवसाये व्यवसायीयधर्मितावच्छेदकधर्मविशिष्टविशेष्यकत्वमेवावगाहते न तु तद्भिन्नधर्मविशिष्टविशेष्यकत्वमित्यत्र दीधितिकाराणां सम्मतिमाह "**अतएवे**"त्यादि। "**व्याप्यविषयकत्वनियम**" इति। यत्रेन्द्रियसन्निकर्षादिबलात् रूपत्वप्रत्यक्षं तत्र तादृशप्रत्यक्षे रूपत्वव्याप्यानां नीलत्वादिजातीनां अन्यतमस्याप्यवश्यं भानात् तत्र प्रत्यक्षस्य नीलरूपमित्याकारकतया व्याप्यधर्मनीलत्वं धर्मितावच्छेदकीकृत्य रूपत्वमवगाहते इति भावः। "**तदनुव्यवसायेन**" नीलो रूपमित्याद्याकारकव्यवसायस्यानुव्यवसायेन। "**व्याप्यवति व्यापकप्रकारकत्वरूपे**"ति। नीलत्ववति रूपत्वप्रकारकत्वरूपेत्यर्थः। नीलत्वविशिष्टविशेष्यकत्वावच्छिन्नरूपत्वप्रकारकत्वमिति यावत्। "**व्याप्यधर्मस्ये**"ति। व्यापकप्रत्यक्षीयप्रमात्वन्तु रूपत्वविशिष्टविशेष्यकत्वावच्छिन्नरूपत्वप्रकारकत्वं तद्व्याप्यं नीलत्ववति रूपत्वप्रकारकत्वं तादृशव्याप्यधर्मग्रहादित्यर्थः। "**नस्यादि**"ति। तत्तत् प्रामाण्यसंशयो न स्यादित्यर्थः, तत्तत्प्रामाण्यसंशयं प्रति तत्तत्प्रामाण्यव्याप्यधर्मवत्त्वग्रहस्यापि प्रतिबन्धकत्वादिति भावः। "**इत्यत्रे**"ति। तादृशस्थले अनुव्यवसायस्य प्रमात्वव्याप्यधर्मग्रहे इत्यर्थः। दृष्टान्तप्रदर्शनस्येति परेणान्वयः। दृष्टान्तमाह "**अनुमिताविवेती**"ति। पर्वतो वह्निमानित्यनुमितेरनुव्यावसायेन यथा धूमरूपव्याप्यविशिष्टविशेष्यकत्वावच्छिन्नवह्निप्रकारकत्वं गृह्यते, तथा नीलो रूपमिति प्रत्यक्षस्यानुव्यवसायेनापि नीलत्वरूपव्याप्यधर्मविशिष्टविशेष्यकत्वावच्छिन्नरूपत्वप्रकारकत्वं गृह्यत इति चिन्तामणिकारा दृष्टान्तं प्रदर्शितवन्तः। तत्तु न सङ्गच्छते, धर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नप्रकारकत्वस्यानुव्यवसायग्राह्यत्वनियमात्, धूमरूपव्याप्यधर्मस्यानुमितौ धर्मितावच्छेदकत्वाभावद्वित्याशङ्कायां दीधितिकृता लिङ्गोपहितलैङ्गिकभानाभिप्रायेण "**अनुमिताविवे**"ति चिन्तामणिकाराणां दृष्टान्तप्रदर्शनमिति व्याख्यातम्। लिङ्गो-

**यदि च विशेष्यतानवच्छेदकधर्मविशिष्टविशेष्यकत्वाच्छेदेनापि विशेषणप्रकारकत्वमनुव्यवसायो गृह्णीयात् तदा तदसङ्गतमेव स्यात्, लिङ्गोपहितलैङ्गिकभानानभ्युपगमेऽपि परामर्शोपनीतव्याप्यधर्मविशिष्टविशेष्यकत्वावच्छेदेन साध्यप्रकारकत्वस्यानुमित्यनुव्यवसायेन ग्रहीतुं शक्यत्वात् ॥१०६॥**

**अथ लिङ्गोपहितलैङ्गिकभानानभ्युपगमे परामर्शोपनीतव्याप्यवद्विशेष्यकत्वावच्छेदेन व्यापकप्रकारकत्वमनुमित्यनुव्यवसायो न ग्रहीतुमिष्टे। तज्ज्ञानानुव्यवसायस्य तज्ज्ञानप्रकारविशिष्टविशेष्यकत्वाच्छेदेनैव ज्ञानप्रकारप्रकारकत्वग्राहकत्वादिति धर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छेदेनैव विशेषणप्रकारकत्वं गृह्यत इत्यत्र न तादृशदीधितिकारग्रन्थः साधकः ॥१०७॥**

---

पहितलैङ्गिकभानमते तु अनुमितेर्वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्याकारकतया धूमरूपव्याप्यधर्मस्यापि धर्मितावच्छेदकतया अनुव्यवसायस्य धूमविशिष्टविशेष्यकत्वावच्छिन्नवह्निप्रकारकत्वविषयकत्वं सम्भवतीति भावः। दीधितिकृतामेतादृशव्याख्यानेन धर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नप्रकारकत्वमेवानुव्यवसायग्राह्यमिति दीधितिकाराणां मतमित्यवगम्यत इति भावः ॥१०५॥

दीधितिकृतां तादृशं मतं कथमवगम्यत इत्याह "**यदि चे**"ति। "**तदसङ्गतमि**"ति। तादृशदृष्टान्तस्य लिङ्गोपहितलैङ्गिकभानाभिप्रायकत्ववर्णनमसङ्गतमित्यर्थः। ननु लिङ्गोपहितलैङ्गिकभानानभ्युपगमे कथमनुमित्यनुव्यवसाये व्याप्यधर्मस्य भानं, तदभाने तु कथं व्याप्यधर्मविशिष्टविशेष्यकत्वावच्छिन्नसाध्यप्रकारकत्वमनुव्यवसायो गृह्णीयादित्यत आह "**परामर्शोपनीते**"ति ॥१०६॥

ननु तज्ज्ञानानुव्यवसायस्य तज्ज्ञानप्रकारविशिष्टविशेष्यकत्वावच्छेदेन तज्ज्ञानप्रकारप्रकारकत्वग्राहकत्वनियमेऽपि तादृशदृष्टान्तप्रदर्शनस्य लिङ्गोपहितलैङ्गिकभानाभिप्रायकत्वोपवर्णनं सङ्गच्छत इति न तादृशाभिप्रायकत्वोपवर्णनेन तज्ज्ञानानुव्यवसायस्य तज्ज्ञानधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छेदेन तज्ज्ञानप्रकारप्रकारकत्वग्रहत्वसिद्धिरित्याशङ्कते "**अथे**"ति। "**न ग्रहीतुमिष्ट**" इति। लिङ्गोपहितलैङ्गिकभानानभ्युपगमे परामर्शोपनीतव्याप्यविशिष्टविशेष्यकत्वावच्छेदेन व्यापकप्रकारकत्वग्राहकत्वमनुमित्यनुव्यवसायस्य न सम्भवति व्याप्यस्य तज्ज्ञानप्रकारत्वाभावात्। लिङ्गोपहितलैङ्गिकभानाभ्युपगमे तु व्याप्यस्यानुमितौ पक्षांशे प्रकारत्वात् तादृशानुमित्यनुव्यवसायस्य व्याप्यविशिष्टविशेष्यकत्वावच्छिन्नसाध्यप्रकारकत्वावगाहित्वसम्भवात्। तथा च व्याप्यस्यानुमितिप्रकारत्वसम्पादनार्थमेव लिङ्गोपहित-

**किञ्च यदि धर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छेदेनैव विशेषण-प्रकारकत्वमनुव्यवसायो गृह्णीयात्, तदा व्याप्यविषयकव्यापकप्रत्यक्षमात्रे एव व्याप्यस्य धर्मितावच्छेदकत्वानैयत्याद् व्यापकप्रत्यक्षस्य व्याप्यविषयकत्व-नियमेऽपि न प्रामाण्यसंशयानुपपत्तिरिति चिन्तामणिग्रन्थ एव वाऽसङ्गतः स्यात् ॥१०८॥**

**अपि च 'अनुमिताविवे'ति अनुमितिसामान्यस्य दृष्टान्तत्वपरम्। यत्-किञ्चिद्व्यक्तेर्दृष्टान्तत्वे शाब्दादिपरित्यागस्य निर्बीजत्वापत्तेः।**

---

लैङ्गिकभानाभ्युपगमः। तेनैव व्याप्यविशेष्यकत्वावच्छिन्नव्यापकप्रकारकत्वमनुव्यवसायस्य सम्भवात्। अतो न तादृशदीधितिग्रन्थेन अनुव्यवसायस्य धर्मितावच्छेदकविशिष्ट-विशेष्यकत्वावच्छिन्नविशेषणप्रकारकत्वावगाहित्वसिद्धिरिति भावः ॥१०७॥

धर्मितानवच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नविशेषणप्रकारकत्वस्यानुव्यवसायाग्राह्यत्वे साधका-भावं प्रदर्श्य बाधकमप्याह **"किञ्चे"**ति। **"धर्मितावच्छेदकत्वानैयत्यादि"**ति। व्यापकविषयकप्रत्यक्षमात्रस्य व्याप्यविषकत्वनियमेऽपि व्याप्यस्य व्यापकांशे धर्मिताव-च्छेदकत्वमेवेत्यत्र नियमाभावात्, कदाचिद् व्याप्यस्य धर्मितावच्छेदकत्वं, कदाचिद् व्यापकस्य, कदाचिच्च एकत्रोभयमिति रीत्योभयं प्रकारतयैव भासत इत्यर्थः। **"न प्रामाण्यसंशयानुपपत्तिरि"**ति। यत्र व्याप्यस्य व्यापकांशे न धर्मितावच्छेदकत्वं तत्रानु-व्यवसाये व्याप्यवद्विशेष्यकत्वावच्छिन्नव्यापकप्रकारकत्वरूपस्य प्रामाण्यव्याप्यस्याग्रहान् न प्रामाण्यसंशयानुपपत्तिरित्यर्थः। **"असङ्गतः स्यादि"**ति। तादृशरीत्या प्रामाण्यसंशयानु-पपत्तिप्रदर्शकस्य व्यापकविषयकप्रत्यक्षस्य व्याप्यविषयकत्वनियमे तदनुव्यवसायेन व्याप्यवति व्यापकप्रकारकत्वरूपस्य व्यापकप्रत्यक्षीयप्रामाण्यव्याप्यधर्मस्य ग्रहात् प्रामाण्यसंशयो न स्यादित्या-युत्पत्तिवादीयचिन्तामणिग्रन्थस्यासङ्गतिः स्यादित्यर्थः। धर्मितानवच्छेदकविशिष्ट-विशेष्यकत्वावच्छिन्नप्रकारप्रकारकत्वस्याप्यनुव्यवसायग्राह्यत्वे व्याप्यस्य धर्मितानवच्छेदकत्व-स्थलेऽपि तद्वद्विशेष्यकत्वावच्छिन्नव्यापकप्रकारत्वस्याप्यनुव्यवसायेन ग्रहणाच्चिन्तामणिग्रन्थः सङ्गच्छत इति भावः ॥१०८॥

ननु धर्मितावच्छेदकधर्मविशिष्टविशेष्यकत्वावच्छिन्नप्रकारकत्वमपि यद्यनुव्यवसायो गृह्णीयात् तदा अनुमिताविवेति मूलोक्तदृष्टान्तस्य 'लिङ्गोपधानपक्षे' इति दीधितिकारव्याख्या न सङ्गच्छते, लिङ्गानुपधानमतेऽपि परामर्शोपनीतव्याप्यवद्विशेष्यकत्वावच्छिन्नव्यापक-प्रकारकत्वग्रहसम्भवादित्यत आह **"अपि चे"**ति। **"निर्बीजत्वापत्तेरि"**ति। यत्किञ्चिद-

**एवञ्च लिङ्गानुपधानकल्पे विनश्यदवस्थपरामर्शजन्यानुमितौ उपनायकाभावेन व्याप्यवद्विशेष्यकत्वाग्रहादनुमितिसामान्यस्य दृष्टान्तत्वं नोपपद्यत इत्यभिप्रेत्यैव अनुमिताविति लिङ्गोपधानपक्ष इति दीधितिकृतोक्तम् ॥१०९॥**

**एवञ्च उपदर्शितसमूहालम्बनाद्यनन्तरमपि तादृशानुव्यवसाय इष्ट एवेति चेन्न ॥११०॥**

---

नुमितिव्यक्तेर्दृष्टान्तत्वे वह्निव्याप्यवान् वह्निमानित्यादिशब्दजन्ययत्किञ्चिच्छाब्दबोधस्यापि व्याप्यविशिष्टविशेष्यकत्वसत्त्वात् तादृशशाब्दानुव्यवसायस्य व्याप्यविशिष्टविशेष्यकत्वावच्छिन्नव्यापकप्रकारकत्वरूपप्रामाण्यव्याप्यधर्मग्रहात् तस्यापि दृष्टान्तत्वसम्भवः। सामान्यस्य च दृष्टान्तत्वे शाब्दबोधसामान्यस्य व्याप्यवद्विशेष्यकत्वासत्त्वात् शाब्दसामान्यस्य न दृष्टान्तत्वमिति भावः। लिङ्गानुपधानमतेऽप्यनुमितिसामान्यस्य न दृष्टान्तत्वसम्भव इति लिङ्गोपधानपक्षे एव 'अनुमिताविवे'ति दृष्टान्तप्रदर्शनमिति दीधितिकारेणोक्तमित्याह "**एवञ्चे**"ति। अनुमितिसामान्यस्य दृष्टान्तत्वादेवेत्यर्थः। "**उपनायकाभावेने**"ति। लिङ्गानुपधानमते अनुमित्यनुव्यवसाये परामर्शोपनीतस्य व्याप्यस्य पक्षांशे भानाद् व्याप्यवद्विशेष्यकत्वादिग्रहः, परन्तु यत्र परामर्शोत्पत्तितृतीयक्षणे अनुमितिस्तादृशानुमित्यनुव्यवसायोत्पत्तिपूर्वक्षणे व्याप्योपनायकस्य परामर्शस्याभावाद् व्याप्यभानासम्भवेन तादृशानुमित्यनुव्यवसायो न व्याप्यवद्विशेष्यकत्वावच्छिन्नव्यापकप्रकारकत्वं गृह्णातीति नानुमितिसामान्यस्य दृष्टान्तत्वं सम्भवतीत्यर्थः। "**लिङ्गोपधानपक्ष**"इति। लिङ्गोपधानमते अनुमितिमात्रस्यैव व्याप्यविषयकत्वनियमेन व्याप्योपनायकतया तदनुव्यवसाये व्याप्यविशेष्यकत्वे बाधकाभावादिति भावः। "**दीधितिकृतोक्तमि**"ति। तथा च अनुव्यवसायस्य धर्मितानवच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नविशेषणप्रकारकत्वग्राहकत्वेऽपि 'अनुमिताविति लिङ्गोपधानपक्षे'- इति दीधितिकारग्रन्थसङ्गतेस्तादृशग्रन्थस्य न धर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नविशेषणप्रकारकत्वमनुव्यवसायो गृह्णातीति नियामकत्वाभावादिति भावः ॥१०६॥

"**एवञ्चे**"ति। धर्मितानवच्छेदकविशिष्टविशेष्यकत्वादेरप्यनुव्यवसायग्राह्यत्व इत्यर्थः। "**उपदर्शिते**"ति। अयञ्च घटश्चेति समूहालम्बनेत्यर्थः। "**तादृशानुव्यवसाय**"इति। "अत्र घटत्वं जानामी"त्याकारकानुव्यवसाय इत्यर्थः। "**इष्ट एवे**"ति। तथा च तादृशसमूहालम्बने इदन्त्वस्य धर्मितानवच्छेदकत्वेऽपि तदवच्छिन्नविशेष्यकत्वावच्छिन्नतत्प्रकारकत्वावगाह्यनुव्यवसाय इष्ट एवेत्यर्थः। तथा च "पर्वतो वह्निमान्", अयं घट"इत्यादौ वह्न्याद्यव्यवसायधर्मितावच्छेदकत्वविरहेऽपि वह्निविशिष्टविशेष्यकत्वावच्छिन्न-

**धर्मान्तरवद्विशेष्यकत्वावच्छेदेन विशेषणप्रकारकत्वस्यानुव्यवसायेन ग्रहणे आत्मतत्त्वविवेकटिप्पन्यां 'तद्धर्मविशिष्टविशेष्यकत्वावच्छेदेन तत्प्रकारकत्वमनुव्यवसायेन न गृह्यत इत्येव कल्प्यते, अनन्यगतिकत्वात्। गृह्यते तु विशेष्यतावच्छेदकविशिष्टविशेष्यकत्वावच्छेदेन विशेषणप्रकारकत्वमित्येतादृशदीधितिकारोक्तेरसङ्गत्यापत्तेः। तथा सति तदन्यधर्मविशिष्टविशेष्यकत्वावच्छेदेन तत्प्रकारकत्वं गृह्यत इत्यस्यैव वक्तुमुचितत्वात् ॥१११॥**

**मूलग्रन्थस्तु व्याप्यभासकसामग्रीसत्त्वे तस्य धर्मितावच्छेदकतयैव प्रायशो भानं सम्भवतीत्यभिप्रायकतया कथञ्चित् सङ्गमनीयः ॥११२॥**

---

वह्निप्रकारकत्वमप्यनुव्यवसायेन गृह्यत एवेति कथं प्रामाण्यस्य स्वतस्त्वं वार्यत इति पूर्वपक्षिणामाशय इति भावः ॥११०॥

धर्मितानवच्छेदकधर्मविशिष्टविशेष्यकत्वावच्छिन्नप्रकारकत्वस्यानुव्यवसायग्राह्यत्वं दीधितिकारमतविरोधेन निषेधयति "**धर्मान्तरे**"ति। "**अनन्यगतिकत्वादि**"ति। अयञ्च घटश्चेत्यादिसमूहालम्बनव्यवसायस्य अत्र घटत्वं जानामीत्याकारकानुव्यवसायापत्तेरवारणादित्यर्थः। "**असङ्गत्यापत्तेरि**"ति। तथा च दीधितिकारमतविरोधेन धर्मान्तरविशिष्टविशेष्यकत्वावच्छिन्नविशेषणप्रकारकत्वं नानुव्यवसायेन गृह्यत इत्येवावगन्तव्यमिति भावः। "**तदन्ये**"ति। विशेषणभिन्नेत्यर्थः। तथा च व्यवसायीयतद्धर्मप्रकारतानिरूपितविशेष्यतावच्छेदकविशिष्टविशेष्यकत्वावच्छेदेनैव तद्धर्मप्रकारकत्वमनुव्यवसायेन ग्रहणात् पर्वतो वह्निमानित्यादिव्यवसायस्य विशेष्यतावच्छेदकत्वं वह्निमत्त्वे विवक्षितादृशव्यवसायस्यानुव्यवसाये वह्निमद्विशेष्यकत्वावच्छेदेन वह्निप्रकारकत्वानवगाहनान्नानुव्यवसायस्य तादृशप्रामाण्यावगाहित्वसम्भावनेति भावः ॥१११॥

ननु व्यापकविषयकप्रत्यक्षस्य व्याप्यविषयकत्वनियमे तदनुव्यवसायेन व्याप्यवद्विशेष्यकत्वावच्छिन्नव्यापकप्रकारकत्वस्य ग्रहादिति चिन्तामणिकारोक्तिविरोधः। व्याप्यस्य सर्वत्र व्यापकांशे धर्मितानवच्छेदकत्वाद् धर्मितानवच्छेदकावच्छिन्नविशेष्यकत्वावच्छिन्नप्रकारकत्वस्यापि चिन्तामणिकारमतेऽनुव्यवसायग्राह्यत्वमावश्यकमिति दीधितिग्रन्थचिन्तामणिग्रन्थयोः परस्परविरोध इत्याशङ्कां निरस्यति "**मूलग्रन्थस्त्वि**"ति। "**प्रायशो भानं सम्भवती**"ति। तथा च यत्र व्याप्यस्य धर्मितावच्छेदकत्वं तत्रैव व्याप्यवद्विशेष्यकत्वावच्छिन्नव्यापकप्रकारकत्वमनुव्यवसायेन गृह्यत इत्यभिप्रायको मूलग्रन्थ इति भावः ॥११२॥

**एवञ्च तादृशसमूहालम्बनाद्यनन्तरं तथाविधानुव्यवसायवारणाय तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वग्रहे तद्धर्मावच्छिन्नविशेष्यतानिरूपिततत्प्रकारताशालिव्यवसायस्य हेतुत्वमावश्यकमिति 'अयं घट' इत्यादिज्ञानानुव्यवसायः कथं घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वादिरूपप्रामाण्यं गृह्णीयात्। घटत्वावच्छिन्नविशेष्यकघटत्वप्रकारकव्यवसायादेस्तद्ग्रहे हेतुत्वादिति न प्रामाण्यस्य स्वतस्त्वम् ॥११३॥**

**अथ तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वग्रहे तद्धर्मावच्छिन्नविशेष्यकतत्प्रकारकव्यवसायहेतुत्वे 'इयं पृथिवी'ति व्यवसायानन्तरं तदनुव्यवसाये**

---

ननु धर्मान्तरविशिष्टविशेष्यकत्वावच्छिन्नप्रकारकत्वग्रहसामग्रीसत्त्वे कथं तन्न स्यात्। न च धर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नविशेषणप्रकारकत्वमनुव्यवसायेन गृह्यत इति नियमभङ्गात् तन्न स्यादिति वाच्यम्। तादृशज्ञानसामग्रीसत्त्वे उक्तनियमभङ्गस्याकिञ्चित्करत्वात्। सामग्री कार्यं नार्जयेदिति तु न, इत्यतः कार्यकारणभावकल्पनया तादृशापत्तिं वारयति "**एवञ्च**"ति। धर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नविशेषणप्रकारकत्वस्यानुव्यवसायग्राह्यत्वादेवेत्यर्थः। "**तादृशसमूहालम्बने**"ति। अयञ्च घटश्चेत्यादिसमूहालम्बनाद्यनन्तरमित्यर्थः। "**तथाविधानुव्यवसाये**"ति। घटत्वांशे धर्मितानवच्छेदकेदन्त्वविशिष्टविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वप्रकारकानुव्यवसायेत्यर्थः। "**हेतुत्वमावश्यकमि**"ति। तथा च अयञ्च घटश्चेति समूहालम्बनस्थले इदन्त्वावच्छिन्नविशेष्यतानिरूपितघटत्वावच्छिन्नप्रकारताशालिव्यवसायविरहान्नेदन्त्वविशिष्टविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वमनुव्यवसायो गृह्णातीत्यर्थः। एवञ्चायं घट इत्यादिव्यवसायस्थले इदन्तावच्छिन्नविशेष्यतानिरूपितघटत्वावच्छिन्नप्रकारताशालिव्यवसायसत्त्वाद् इदन्त्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वमेवानुव्यवसायेन गृह्यते न तु घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रामाण्यमपीत्याह "**अयं घट**" इत्यादि। घटत्वावच्छिन्नविशेष्यतानिरूपितघटत्वावच्छिन्नप्रकारताशालिव्यवसायविरहाद् अयं घट इत्यादिज्ञानानुव्यवसायो घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रामाण्यं कथं गृह्णीयादित्यर्थः। "**न प्रामाण्यस्य स्वतस्त्वमि**"ति। तथा च प्रामाण्यस्य अनुव्यवसायग्राह्यत्वाभावादनुव्यवसायमात्रग्राह्यत्वरूपमुरारिमिश्रोक्तस्वतस्त्वं न सम्भवतीत्यर्थः ॥११३॥

यत्र पृथिवीति व्यवसायस्तदनन्तरं तदनुव्यवसायस्ततः पुनः पृथिवीति व्यवसायस्ततस्तदनुव्यवसायः प्रामाण्यं गृह्णाति, प्रथमानुव्यवसायेन प्रामाण्यघटकप्रकारित्वादिसकलपदार्थो-

**पुनस्तत्रैव विषये तथाविधव्यवसाये तदनुव्यवसायादिरपि प्रामाण्यं न गृह्णीयादिति चेन्न।**

**तद्धर्मवद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वप्रकारकलौकिकप्रत्यक्ष एव तथाविधव्यवसायस्य हेतुत्वात् तत्र च प्रामाण्यस्योपनीतभानोपगमेनानुपपत्त्यभावादिति ॥११४॥**

**तदसत्, यत्त्वतत्त्वयोरननुगमाद्विशिष्य धर्मितावच्छेदकं निवेश्यैव तादृशकार्यकारणभावः कल्पनीयः। एवञ्च इदन्त्वादिविशिष्टविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वादिग्रहे इदन्त्वाद्यवच्छिन्नविशेष्यकघटत्वादिप्रकारकव्यवसायहेतुताया उक्तापत्तिवारणाय कल्पनीयत्वेऽपि, घटत्वादिमद्विशेष्यकत्वावच्छिन्नघटत्वादिप्रकारकत्वग्रहे घटत्वावच्छिन्नविशेष्यकघटत्वादिप्रकारकज्ञानत्वेन हेतुता न कल्प्यते प्रयोजनविरहात् ॥११५॥**

---

पस्थापनादिति चिन्तामण्युक्तप्रथमविप्रतिपत्तिव्याख्याने यावत्त्वविशेषणव्यावृत्तिप्रदर्शनावसरे पक्षधरमिश्रैरुक्तम्। तथा च तादृशस्थले प्रामाण्यं तादृशानुव्यवसायेन गृह्यत इति पक्षधरमिश्राणामभिमतम्। तत्र सङ्गच्छत इत्याशङ्कयते "**अथे**"ति। "**प्रामाण्यं न गृह्णीयादि**"ति। अत्र च पृथिवीत्वविशिष्टविशेष्यकत्वावच्छिन्नपृथिवीत्वप्रकारकत्वं प्रामाण्यं तत्तु पृथिवीत्वावच्छिन्नविशेष्यतानिरूपितपृथिवीत्वप्रकारकव्यवसायजन्यं भवेत्, द्वितीयानुव्यवसायात् पूर्वं तादृशव्यवसायासत्त्वान्न द्वितीयानुव्यवसायोऽपि प्रामाण्यं गृह्णातीत्यर्थः। तथा च पक्षधरमिश्रस्य तादृशग्रन्थोऽसङ्गतः स्यादिति भावः।

प्रामाण्यलौकिकप्रत्यक्षे तादृशव्यवसायस्य हेतुत्वं, पूर्वोक्तस्थले च प्रामाण्यस्योपनीतभानमभ्युपगम्य समाधत्ते "**ने**"ति ॥११४॥

प्रामाण्यस्य स्वतस्त्ववारकं परे त्वित्यादिना यदुक्तं तत्खण्डयति "**तदसदि**"ति। यत्पदं तत्पदञ्च बुद्धिस्थे शक्तम्, बुद्धिस्थत्वञ्च बुद्धिविषयत्वं तच्च विषयभेदेन भिन्नं, तथा च यत्तत्पदं तत्तद्व्यक्तिपरमिति यत्त्वतत्त्वयोरननुगमाद् यत्त्वतत्त्वेन कार्यकारणभावकल्पने अननुगतकार्यकारणभावानामानन्त्यम्। तथा च तादृशकार्यकारणभावस्य प्रतिविषयविश्रान्ततया यद्विषयस्थले एतादृशकार्यकारणभावाकल्पने दोषस्तत्रैव कल्प्य न तु सर्वत्रेत्याह "**एवञ्चे**"ति। "**उक्तापत्तिवारणाये**"ति। अयञ्च घटश्चेति समूहालम्बनव्यवसायस्य इदन्त्वादिविशिष्टविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वावगाह्यनुव्यवसायवारणायेत्यर्थः। कुत्र तादृशकार्यकारणभावो न कल्प्य इत्याह "**घटत्वादिमदि**"ति। "**न**

**अथ घटत्ववद्विशेष्यकत्वावच्छिन्नत्वेन द्रव्यत्वप्रमेयत्वादिनानाधर्मप्रकारकत्वग्रहे 'घटो द्रव्यं' 'घटः प्रमेय' इत्यादि नानाविधव्यवसायानां विशिष्य द्रव्यत्वप्रमेयत्वादिविषयतां निवेश्य नानाकारणत्वकल्पनापेक्षया लाघवाद्विशिष्य द्रव्यत्वादिविषयतामनिवेश्य घटत्ववद्विशेष्यकत्वावच्छिन्नत्वप्रकारतानिरूपितप्रकारकत्वनिष्ठविशेष्यतानिरूपितनिरूपितत्वसंसर्गावच्छिन्नावच्छेदकता-**

---

**कल्प्यत",** इति। तथा च अनुव्यवसायस्यापि घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रामाण्यग्राहकत्वे बाधकाभाव इत्यर्थः। "**प्रयोजनविरहादि**"ति। यथा अयञ्च घटश्चेत्यादिसमूहालम्बनस्थले अत्र घटत्वं जानामीत्याद्यनुव्यवसायवारणाय उक्तकार्यकारणभाव आवश्यकस्तथा घटश्च घटश्चेत्यादिसमूहालम्बने घटत्ववति घटत्वं जानामीत्याद्यनुव्यवसायवारणायैवोक्तकार्यकारणभाव आवश्यक इति कथं प्रयोजनविरह इत्युक्तमिति वाच्यम्। इष्टापत्तेः। घटश्च घट इति व्यवसायस्य घटत्ववति घटत्वं जानामीत्याकारकानुव्यवसायस्वीकारे क्षतिविरहात्। तथा च तादृशस्थले उक्तकार्यकारणभावकल्पने प्रयोजनाभावात् न कल्प्य इति भावः ॥११५॥

लाघवात् तद्वद्विशेष्यकत्वावच्छिन्नत्वनिष्ठप्रकारतानिरूपितप्रकारतानिष्ठविशेष्यतानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतासम्बन्धेन मानसत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्नविशेष्यतानिरूपितप्रकारतासम्बन्धेन ज्ञानत्वेन हेतुता कल्प्या, तथा च नानुव्यवसायेन प्रामाण्यग्रहापत्तिरित्याशङ्कयते "**अथे**"ति। तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वप्रकारकग्रहे तद्धर्मावच्छिन्नविशेष्यतानिरूपिततत्प्रकारकत्वप्रकारकताकव्यवसायस्य हेतुत्वे गौरवमाह "**घटत्ववद्विशेष्यकत्वे**"त्यादि। 'घटो द्रव्यं, घटः प्रमेय' इत्यादिघटविशेष्यकद्रव्यत्वप्रमेयत्वादिनानाधर्मप्रकारकव्यवसायो जायते, तादृशव्यवसायस्याप्यनुव्यवसाय उत्पद्यते। तत्र घटत्वविशिष्टविशेष्यकत्वावच्छिन्नद्रव्यत्वप्रकारकत्वप्रकारकानुव्यवसायं प्रति घटत्वावच्छिन्नविशेष्यकद्रव्यत्वप्रकारकव्यवसायो हेतुः। एवं घटत्ववद्विशेष्यकत्वावच्छिन्नप्रमेयत्वप्रकारकत्वप्रकारकानुव्यवसायं प्रति घटत्वावच्छिन्नविशेष्यकप्रमेयत्वप्रकारकव्यवसायो हेतुरिति द्रव्यत्वप्रमेयत्वादिनानाविषयतां निवेश्य नानाकारणत्वकल्पने गौरवमिति भावः। तदपेक्षया लघुतरकार्यकारणभावमाह "**घटत्ववद्विशेष्यकत्वावच्छिन्नत्वे**"ति। तादृशानुव्यवसायस्य इदं ज्ञानं घटत्ववद्विशेष्यकत्वावच्छिन्नद्रव्यत्वप्रकारकत्ववदित्याकारकतया द्रव्यत्वप्रकारकत्वे घटत्ववद्विशेष्यकत्वावच्छिन्नत्वस्य विशेषणात् तादृशविशेष्यकत्वावच्छिन्नत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वं द्रव्यत्वप्रकारकत्वे, विशेष्यीभूततादृशप्रकारकत्वे च द्रव्यत्वस्य

सम्बन्धेन मानसत्वावच्छिन्नं प्रति घटत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतासम्बन्धेन ज्ञानत्वेन एकैव हेतुता कल्प्यते ॥११६॥

एवञ्च घटो घट इत्येतादृशव्यवसायशून्यकाले तादृशावच्छेदकतासम्बन्धेनानुव्यवसायोत्पत्त्यसम्भवान्न घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रामाण्यग्रह इति चेन्न ॥११७॥

एतादृशविषयनिष्ठप्रत्यासत्त्या व्यवसायस्यानुव्यवसायहेतुत्वोपगमे यत्र 'घटो द्रव्य'मित्याकारक एको व्यवसायस्तदुत्तरञ्च घटोद्रव्यश्चे ति समूहालम्बनात्मकोऽपरस्तत्र द्रव्यत्वे तादृशप्रकारतासम्बन्धेन पूर्वव्यवसायस्य सत्त्वाद्घटत्ववद्विशेष्यकत्वावच्छिन्नद्रव्यत्वप्रकारकत्वेन तादृशसमूहालम्बनमानसापत्तेः ॥११८॥

---

निरूपितत्वसंसर्गेण विशेष्यतावच्छेदकतया भानाद् द्रव्यत्वप्रकारकत्वनिष्ठविशेष्यताया निरूपितत्वसम्बन्धावच्छिन्नावच्छेदकत्वं द्रव्यत्वे विद्यते तत्र च घटो द्रव्यमित्याकारकव्यवसायस्य घटत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतासम्बन्धेन विद्यमानतया निरुक्तकार्यकारणभावः सङ्गच्छते इति भावः। "एकैव हेतुते"ति। तथा च तादृशकार्यकारणभावे द्रव्यत्वप्रमेयत्वादीनामप्रवेशाद् घटत्वावच्छिन्नविशेष्यकयावद्व्यवसायानामनुव्यवसायं प्रति घटत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतासम्बन्धेन ज्ञानत्वेन एकैव हेतुता, तथा च द्रव्यत्वप्रमेयत्वादिप्रकारभेदेन कार्यकारणभावभेदाभावाल्लाघवमिति भावः ॥११६॥

एतादृशकार्यकारणभावकल्पनेऽनुव्यवसायस्य न प्रामाण्यग्राहकत्वमित्याह '**एवञ्चे**'ति। तादृशकार्यकारणभावस्वीकारे च इत्यर्थः। घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रामाण्यज्ञानस्य घटत्ववद्विशेष्यकत्वावच्छिन्नत्वप्रकारतानिरूपितघटत्वप्रकारकत्वनिष्ठविशेष्यतानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकत्वसम्बन्धेन घटत्वे एव सत्त्वात। तत्र च "घटो द्रव्य" 'घटः प्रमेय' इत्यादिव्यवसायस्य घटत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतासम्बन्धेनासत्त्वात्, तादृशसम्बन्धेन ज्ञानरूपकारणविरहान् न घटो द्रव्यं घटः प्रमेय इत्यादिव्यवसायानां प्रामाण्यमनुव्यवसायैर्गृह्यते। घटो घट इत्येतादृशव्यवसायस्य घटत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतासम्बन्धेन घटत्वे सत्त्वात तादृशव्यवसायकाले प्रामाण्यस्यानुव्यवसायग्राह्यत्वसम्भवादाह "**तादृशव्यवसायशून्यकाल**" इति। न च तादृशव्यवसायकाले प्रामाण्यस्यानुव्यवसायग्राह्यत्वरूपस्वतस्त्वं सम्भवतीति वाच्यम्। स्वाश्रयग्राहकयावद्ग्राह्यत्वस्यैव स्वतस्त्वात्, तादृशानुव्यवसायशून्यकालीनप्रामाण्याश्रयग्राहकानुव्यवसायग्राह्यत्वाभावान् न स्वतस्त्वम् ॥११७॥

**न चेष्टापत्तिः, स्वविशेष्यतावच्छेदकविशिष्टविशेष्यकत्वावच्छेदेनैव विशेषणप्रकारकत्वमवगाहत इति दीधितिकृदुक्तिरसङ्गता स्यात्। यत्किञ्चिज्ज्ञानविशेष्यतावच्छेदकताया अव्यावर्तकत्वात्। तस्मादनायत्या द्रव्यत्वादिविषयतां निवेश्य व्यवसायनिष्ठप्रत्यासत्त्यैव कार्यकारणभावः कल्पनीयः ॥११९॥**

---

द्रव्यत्वप्रमेयत्वादिविषयतामनिवेश्य तादृशविषयनिष्ठप्रत्यासत्त्या हेतुत्वं न सम्भवतीत्याह "**एतादृशे**"ति। "**तादृशसमूहालम्बनमानसापत्तेरि**"ति। तादृशज्ञानद्वयानन्तरं तादृशज्ञानद्वयविषयकं समूहालम्बनमनुव्यवसायरूपं मानसं ज्ञानमुत्पद्यते। तत्तु घटत्ववति द्रव्यत्वं जानामि घटद्रव्यञ्च जानामीत्याकारकम्; तत्र घटद्रव्यञ्च जानामीत्यंशः समूहालम्बनव्यवसायस्यानुव्यवसायः। तदंशस्यापि घटत्ववति द्रव्यत्वं जानामीत्याकारकत्वापत्तिरित्यर्थः। तथाहि तादृशानुव्यवसाये द्रव्यत्वमिति द्वितीयार्थः प्रकारकत्वं घटत्ववतीतिसप्तम्यर्थविशेष्यकत्वावच्छिन्नत्वविशेषितस्य द्वितीयार्थप्रकारकत्वस्य जानामीति ज्ञाने विशेषणम्। एवञ्च तादृशानुव्यवसायस्य घटत्ववद्विशेष्यकत्वावच्छिन्नत्वप्रकारतानिरूपितप्रकारकत्वनिष्ठविशेष्यतानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतासम्बन्धेन द्रव्यत्वे आपत्तिः, तत्र च घटत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतारूपकारणतावच्छेदकसम्बन्धेन प्रथमोत्पन्नव्यवसायस्य ज्ञानात्मककारणस्य सत्त्वात्। कारणसत्त्वे कार्योत्पादे बाधकाभावादिति भावः ॥११८॥

घटो द्रव्यञ्चेत्याद्याकारकसमूहालम्बनानुव्यवसायस्य घटत्ववद्विशेष्यकत्वावच्छिन्नद्रव्यत्वप्रकारकत्वावगाहित्वे दोषमाह "**स्वविशेष्यते**"ति। स्वं ज्ञानं तदीयं यद्विशेष्यकत्वम् तदवच्छेदेनेत्यर्थः। "**अवगाहत**"इति। अनुव्यवसाय इति शेषः। "**असङ्गते**"ति। घटो द्रव्यञ्चेति समूहालम्बने घटत्वस्य द्रव्यत्वांशे विशेष्यतावच्छेदकत्वविरहाद् घटत्वावच्छिन्नविशेष्यकत्वावच्छेदेन द्रव्यत्वप्रकारकत्वावगाहने दीधितिकृदुक्तिरसंगता स्यादित्यर्थः। ननु विशेष्यतावच्छेदकविशिष्टविशेषणप्रकारकत्वमित्येव दीधितिकृदुक्तिः, तच्च उक्तज्ञानद्वयस्थले पूर्वज्ञानीयविशेष्यतावच्छेदकत्वमादायैव सम्भव इत्याशङ्कायामाह "**यत्किञ्चिदि**"ति। "**अव्यावर्तकत्वादि**"ति। क्वचिदेव ज्ञाने घटत्ववद्विशेष्यकत्वावच्छेदेन द्रव्यत्वादिप्रकारकत्वावगाहनं, क्वचिच्च न इति नियमो न स्यादित्यर्थः। तथा च विशेष्यतावच्छेदकविशिष्टविशेषणप्रकारकत्वमिति दीधितिग्रन्थस्य स्वविशेष्यतावच्छेदकविशिष्टविशेष्यकत्वावच्छेदेन विशेषणप्रकारकत्वमित्यर्थे एव तात्पर्यात् नोक्तसमूहालम्बनस्य घटत्ववद्विशेष्यकत्वावच्छिन्नद्रव्यत्वप्रकारकत्वसम्भव इति भावः। "**व्यवसायनिष्ठप्रत्यासत्त्यैवे**"ति।

**एवञ्च घटत्वादिमद्विशेष्यकत्वावच्छिन्नघटत्वादिप्रकारकत्वग्रहे व्यवसायानां विशिष्य हेतुत्वाकल्पनात् प्रामाण्यस्य स्वतस्त्वमीदृशयुक्त्या दुर्वारमेवेत्युपदर्शित रीतिरेवानुसरणीया ॥१२०॥**

**प्रामाण्यस्य परतस्त्वेऽनवस्थाभिया गृहीतप्रामाण्यकज्ञानत्वेन प्रवृत्त्यादि-हेतुता न सम्भवतीत्यप्रामाण्यग्रहाभावविशिष्टज्ञानत्वेन तथात्वं स्वीकरणीय-मिति गौरवमिति तु न वाच्यम् ॥१२१॥**

---

तथा च घटत्ववद्विशेष्यकत्वावच्छिन्नद्रव्यत्वप्रकारकत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन मानसत्वावच्छिन्नं प्रति घटत्वावच्छिन्नविशेष्यतानिरूपितद्रव्यत्वप्रकारताशालिव्यव-सायस्तादात्म्यसम्बन्धेन हेतुरित्येवं कार्यकारणभावः ॥११९॥

"**एवञ्चे**"ति । द्रव्यत्वप्रमेयत्वादिविषयतां निवेश्य पृथक् पृथक् कार्यकारणभाव-स्वीकारे चेत्यर्थः । "**हेतुताकल्पनादि**"ति । प्रयोजनाभावादित्यर्थः । **ईदृशयुक्त्ये**"ति । परे त्वित्यादिग्रन्थोक्तयुक्त्येत्यर्थः । "**उपदर्शितरीतिरि**"ति । प्रथमानुव्यवसायस्य प्रामाण्य-ग्राहकत्वे व्यवसायतृतीयक्षणे तद्धर्मिकप्रामाण्यसंशयानुत्पत्तिरित्यनायत्या प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यज्ञानत्वेन हेतुतेत्येव रीतिः । "**अनुसरणीये**"ति । तथा च प्राथमिकानु-व्यवसायात् पूर्वं प्रामाण्यज्ञानाभावेन न प्रथमानुव्यवसायेन प्रामाण्यं गृह्यत इति प्रामाण्य-स्यानुव्यवसायमात्रग्राह्यत्वाभावान्न स्वतोग्राह्यत्वमिति प्रामाण्यस्य स्वतोग्राह्यत्ववारणमिति भावः ॥१२०॥

"**अनवस्थाभिये**"ति । प्रवृत्तिजनकेष्टसाधनताज्ञाने ज्ञानान्तरेण प्रामाण्यं गृह्यते, तत्रापि च तदपरज्ञानेनेत्येवं रीत्या अनवस्थेत्यर्थः । "**गौरवमि**"ति । गृहीतप्रामाण्यकत्वन्तु प्रामाण्यज्ञानविशिष्टत्वं, वैशिष्ट्यञ्च विशेष्यत्वसामानाधिकरण्योभयसम्बन्धेन, सामानाधि-करण्यञ्च एककालावच्छेदेनैकात्मवृत्तित्वं तथा च गृहीतप्रामाण्यकज्ञानत्वेन हेतुतामते प्रामाण्यज्ञानं हेतुतावच्छेदकम् । अप्रामाण्यग्रहाभावविशिष्टज्ञानत्वेन हेतुतामते अप्रामाण्य-ग्रहाभावः कारणतावच्छेदकः, अत्र कारणतावच्छेदके अभावद्वयप्रवेशेन गौरवम् । अत्रापि अप्रामाण्यग्रहाभाववैशिष्ट्यं स्वविशेष्यत्व-स्वसामानाधिकरण्य-स्वकालीनत्वैतत्त्रितयसम्बन्धेन अप्रामाण्यज्ञानाभाववत्त्वमिति ध्येयम् ।

तथा च गौरवभयेन प्रामाण्यस्य स्वतस्त्वमेव स्वीकार्यमिति पूर्वपक्षिणामाशय इति भावः ॥१२१॥

यतः प्रामाण्यस्यानुव्यवसायग्राह्यत्वरूपस्वतस्त्वमते गृहीतप्रामाण्यक-ज्ञानत्वेन प्रवृत्त्यादिहेतुत्वेऽनवस्था दुर्वारैव। तथाहि, व्यवसायप्रामाण्यस्यानु-व्यवसायेन ग्रहेऽपि तत्प्रामाण्यनिश्चयं विना सोऽकिञ्चित्कर इति तस्यापि प्रामाण्यावगाही अनुव्यवसायोऽपेक्षणीय एवं तत्प्रभृतीनामपीति। तस्मात् तेनापि अप्रामाण्यग्रहानास्कन्दितत्वेनैव सर्वत्र निश्चयकार्यकारितोपगन्त-व्येति ॥१२२॥

वस्तुतो निश्चितप्रामाण्यकत्वेन निश्चयकार्यकारित्वे अननुव्यवसीयमाना-न्निश्चयात् कदाचिदपि तत्कार्यानुत्पद्येत, तच्चात्यन्तमनुभवविरुद्धमिति सर्व-थैवाप्रामाण्यज्ञानानास्कन्दितत्वेनैव तथात्वमुपगन्तव्यम् ॥१२३॥

---

समाधत्ते "**यत**" इति। "**तत्प्रामाण्यनिश्चयं विना सोऽकिञ्चित्कर**"इति। निश्चितप्रामाण्यकनिश्चयत्वेन हेतुतामते केवलार्थनिश्चयात न तत्कार्यमुत्पद्यते अपि तु अर्थ निश्चयधर्मिकप्रामाण्यनिश्चये सत्येव। तथा च केवलार्थनिश्चयस्य निश्चयकार्यकारितैव नास्तीति प्रामाण्यनिश्चयं विनार्थनिश्चयस्याकिञ्चित्करत्वमित्यर्थः। "**तस्मादि**"ति। प्रामाण्यस्य परतस्त्वपक्षवत् स्वतस्त्वपक्षेऽप्यनवस्थानादित्यर्थः। "**तेने**"ति। प्रामाण्य-स्यानुव्यवसायग्राह्यत्ववादिनापीत्यर्थः। "**सर्वत्र निश्चयकार्यकारिते**"ति। निश्चये अप्रामाण्यग्रहसत्त्वे निश्चयकार्यं न भवति तदभावसत्त्वे तु निश्चयः स्वकार्यजनने समर्थ इत्यप्रामाण्यग्रहाभावविशिष्टस्य निश्चयस्यैव स्वकार्यकारितेत्यर्थः। "**उपगन्तव्येती**"ति। तथा च अगत्या गौरवं स्वीकार्यमिति भावः ॥१२२॥

अप्रामाण्यज्ञानाभावविशिष्टज्ञानत्वेनैव हेतुतेत्यत्रानुभवं प्रमाणयति "**वस्तुत**"इति। "**अननुव्यवसीयमानान्निश्चयादि**"ति। यादृशव्यवसायस्यानुव्यवसायो नोत्पन्नस्तादृश-निश्चयादित्यर्थः। "**तत्कार्यानुत्पद्येते**"ति। तादृशनिश्चयस्य कार्यं प्रवृत्त्यादि नोत्पद्येत अनुव्यवसायाभावेन प्रामाण्यग्रहासम्भवादित्यर्थः। तत्कार्यानुत्पत्तौ का हानिरित्यत आह "**तच्चात्यन्तमनुभवविरुद्धमि**"ति। तथा चानुभवविरोधान् निश्चितप्रामाण्यकत्वेन प्रवृत्त्यादि-हेतुता न सम्भवतीति भावः। ननु अननुव्यवसीयमाननिश्चयात् कार्योत्पत्तौ प्रामाण्यज्ञानाभाव-विशिष्टज्ञानत्वेन हेतुत्वेऽपि अनुव्यवसीयमाननिश्चयात् कार्योत्पत्तौ निश्चितप्रामाण्यकनिश्चयत्वेन हेतुतास्त्वित्यत आह "**सर्वथैवे**"ति। तथा च उक्तद्विविधकार्यकारणभावकल्पनापेक्षया लाघवाद् एकरूपेणैव हेतुत्वकल्पनमुचितमिति भावः ॥१२३॥

**एतेन प्रवृत्त्यादिहेतुज्ञाने निश्चितप्रामाण्यकत्वमेव निवेश्यते। प्रामाण्यनिश्चये तु अनवस्थाभयेनाप्रामाण्यज्ञानानास्कन्दितत्वमित्यपि परास्तमिति दिक् ॥१२४॥**

**इदन्तु चिन्त्यते प्रामाण्यस्य परतस्त्वे यत्र घटत्वप्रकारकं ज्ञानं प्रमेत्येताद्दशानुमितिसामग्री अथ च प्रामाण्यप्रकारकघटत्वज्ञानलौकिकप्रत्यक्षं जायतामित्येताद्दशीच्छा घटत्वप्रकारकज्ञानस्य, तत्र नैयायिकमतेऽपि प्रामाण्याद्युपस्थितिघटितायाः प्रामाण्यांशे उपनीतभानात्मकज्ञानलौकिकप्रत्यक्षसामग्र्या इच्छाविशिष्टायाः सत्त्वेन ताद्दशप्रत्यक्षमेव जायते नत्वनुमितिः। तथा च**

---

"**एतेने**"ति। पूर्वोक्तदोषेणेत्यर्थः। परास्तमिति परेणान्वयः। निश्चितप्रामाण्यकनिश्चयत्वेन हेतुतामते कारणतावच्छेदकीभूतप्रामाण्यनिश्चये यदि प्रामाण्यनिश्चयस्यापेक्षा तदैवानवस्था, परन्तु तदेव नास्ति अनवस्थाभयेन कारणतावच्छेदकीभूतप्रामाण्यनिश्चये अप्रामाण्यज्ञानानास्कन्दितत्वमेव निवेश्यमित्याह "**प्रामाण्यनिश्चयेत्वि**"ति। "**परास्तमि**"ति। अननुव्यवसीयमानानिश्चयात् कदाचिदपि तत्कार्यानुपपत्तेरेतन्मतं परास्तमित्यर्थः ॥१२४॥

प्रामाण्यस्य स्वतस्त्वे प्रतिबध्यप्रतिबन्धकभावे लाघवं दर्शयति "**इदन्तु चिन्त्यत**" इति। "**अनुमितिसामग्री**"ति। घटत्वप्रकारकज्ञानधर्मिकप्रमात्वव्याप्यवत्त्वापरामर्शादिघटितसामग्रीत्यर्थः। "**इत्येताद्दशीच्छे**"ति। घटत्ववति घटत्वप्रकारकत्वप्रकारतानिरूपितघटत्वप्रकारकज्ञाननिष्ठविशेष्यताशालिलौकिकप्रत्यक्षं जायतामित्याकारिकेच्छेत्यर्थः। अत्र च घटत्वप्रकारकज्ञानांशे लौकिकत्वं बोध्यं न तु घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यांशे, न्यायमते प्रामाण्यस्य लौकिकप्रत्यक्षानभ्युपगमादित्येतल्लाभाय आह "**घटत्वप्रकारकज्ञानस्ये**"ति। "**इच्छाविशिष्टाया**" इति। ननु समानविषयकस्थले प्रत्यक्षसामग्र्या बलवत्त्वाद् इच्छाविरहेऽपि ताद्दशप्रत्यक्षमेव जायत इतीच्छाग्रहणमनर्थकम्। न च समानविषयकस्थले लौकिकप्रत्यक्षसामग्र्या एव बलवत्त्वं नतूपनीतभानसामग्र्याः, तथा च प्रामाण्यांशे न्यायमते उपनीतभानान् नोक्तप्रत्यक्षसामग्र्या बलवत्त्वमिति वाच्यम्। प्रामाण्यांशेऽलौकिकत्वेऽपि घटत्वज्ञानांशे लौकिकतया इच्छाविरहविशिष्टाया अपि तस्या अनुमितिसामग्र्यपेक्षया बलवत्त्वादिति चेन्न। यत्र वह्निव्याप्यधूमवान् पर्व्वत इति परामर्शः, तत्र वह्नेरप्युपनीततया पर्वतेन सहेन्द्रियसन्निकर्षसत्त्वेन च पर्वतांशे लौकिकस्य वह्न्यंशे चालौकिकस्य पर्वतो वह्निमानित्याकारकप्रत्यक्षस्यापत्तिः; अनुमानमात्रस्योच्छेदापत्तिश्चेति तद्वारणाय

तद्वारणाय तादृशानुमितौ तथाविधेच्छाविशिष्टघटत्वप्रकारकत्वेन प्रतिबन्धकता वाच्या। मिश्रमते तु तादृशानुमितौ घटत्वज्ञानत्वेनैव विरोधिता नतु इच्छा निवेश्यते। इच्छां विनापि घटत्वप्रकारकज्ञानकाले तदीयप्रामाण्यलौकिकप्रत्यक्षस्यैव तत्रोत्पत्त्या तदनुमितेरनुदयात्॥१२५॥

नैयायिकमते च इच्छानिवेशनमावश्यकमेव तन्मते प्रामाण्यस्य लौकिकप्रत्यक्षानभ्युपगमादुपनीतभानसामग्र्याश्चानुमितिसामग्र्यपेक्षया दुर्बलत्वादिच्छाशून्यकालेऽनुमितेरुत्पत्तेः॥१२६॥

नच मिश्रमते भिन्नविषयकानुमित्यादिकं प्रति प्रामाण्यलौकिकप्रत्यक्षं जायतामित्येतादृशेच्छाविशिष्टतल्लौकिकप्रत्यक्षसामग्रीप्रतिबन्धकताधिक्यमिति वाच्यम्।

---

तद्विधेयकानुमितिं प्रति तद्विषयकलौकिकप्रत्यक्षसामग्र्या बलवत्त्वम्, तदन्यविषयकलौकिकप्रत्यक्षसामग्रीसत्त्वे तु अनुमितिरेव जायते भिन्नविषयकस्थले अनुमितिसामग्र्या बलवत्त्वात्। न्यायमते च प्रामाण्यस्य लौकिकप्रत्यक्षानभ्युपगमात् तादृशेच्छापर्यन्तानुधावनम्। "**तथाविधेच्छाविशिष्टे**"ति। प्रामाण्यप्रकारकघटत्वज्ञानालौकिकप्रत्यक्षं जायतामित्याकारकेच्छाविशिष्टेत्यर्थः। "**घटत्वप्रकारकत्वेने**"ति। घटत्वप्रकारकज्ञानत्वेनेत्यर्थः। तादृशेच्छाविशिष्टस्य घटत्वसंस्कारादेरप्रतिबन्धकत्वात्। घटत्वप्रकारकज्ञानस्य तादृशमानसलौकिकप्रत्यक्षसामग्रीरूपतया तस्यैव प्रतिबन्धकत्वादिति भावः। मिश्रमते तु प्रामाण्यस्य लौकिकभानस्वीकारात् प्रामाण्यविधेयकानुमितिसामग्र्यपेक्षया प्रामाण्यलौकिकभानसामग्र्या बलवत्त्वाद् इच्छाविरहविशिष्टाया अपि तादृशसामग्र्या अनुमितिप्रतिबन्धकत्वेन प्रतिबन्धकतावच्छेदककुक्षौ इच्छानिवेशो व्यर्थ इति मिश्रमते लाघवमित्याह "**मिश्रमते त्वि**"ति॥१२५॥

न्यायमते इच्छानिवेशप्रयोजनं दर्शयति "**नैयायिकमते चे**"ति। "**अनुमितेरुत्पत्तेरि**"ति। तथाच न्यायमते इच्छाविशिष्टघटत्वप्रकारकज्ञानत्वेन प्रतिबन्धकता, मिश्रमते तु घटत्वप्रकारकज्ञानत्वेनेति न्यायमते इच्छायाः प्रतिबन्धकतावच्छेदककुक्षौ अधिकनिवेशाद् गौरवमिति भावः॥१२६॥

भिन्नविषयकस्थले अनुमितिसामग्र्या बलवत्त्वाद् यत्र प्रामाण्यलौकिकप्रत्यक्षसामग्री भिन्नविषयकानुमितिसामग्री च विद्येते तत्र मिश्रमतेऽनुमितिरेवोत्पद्यते, परन्तु यत्र प्रामाण्यलौकिकप्रत्यक्षं जायतामितीच्छा प्रामाण्यलौकिकप्रत्यक्षसामग्री भिन्नविषयकानुमितिसामग्री च वर्त्तन्ते तत्रेच्छाविशिष्टतादृशप्रत्यक्षसामग्र्या बलवत्त्वाद् भिन्नविषयकानुमितिं प्रति तादृशेच्छा-

**नैयायिकमते तावतैवापि तादृशेच्छाकाले भिन्नविषयकानुमित्यादीनामेवोपगन्तव्यतया तथाविधेच्छां निविश्य सामग्रीप्रतिबन्धकताया अकल्पनीयत्वात् ॥१२७॥**

**वस्तुतस्तु तादृशीच्छा सर्वसम्मतसिद्धैव परन्तु सा नैयायिकमते विसम्वादिनीति विशेषः। तथा च यत्र प्रामाण्यविषयकलौकिकप्रत्यक्षमिच्छामीति लौकिकप्रत्यक्षं जायतामित्येतादृशीच्छा अथ च तादृशीच्छापि वर्तते**

---

विशिष्टतादृशप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वमेव वाच्यम्। तथाच मिश्रमतेऽपि तादृशस्थले-भिन्नविषयकानुमितिप्रतिबन्धकतावच्छेदककुक्षौ इच्छानिवेशाद् गौरवमित्याशङ्क्यते "**नचे**"-ति। "**भिन्नविषयकानुमिती**"ति। प्रामाण्यान्यविषयकानुमितीत्यर्थः। "**तल्लौकिकप्रत्यक्षे**"ति। प्रामाण्यलौकिकप्रत्यक्षेत्यर्थः। "**आधिक्यमि**"ति। न्यायमते तादृशप्रतिबन्धकताया अकल्पनात् मिश्रमते तत्कल्पनाधिक्यमिति भावः।

ननु न्यायमतेऽपि प्रामाण्यलौकिकप्रत्यक्षं जायतामित्येतादृशेच्छाविशिष्टप्रामाण्यलौकिकप्रत्यक्षसामग्र्या भिन्नविषयकानुमितिप्रतिबन्धकत्वं कल्प्यमिति तुल्यमेवेति कुतो मिश्रमते गौरवमित्याह "**नैयायिकमत**" इति। '**उपगन्तव्यतये**"ति। भिन्नविषयकानुमितिसामग्रीत इच्छाविषयीभूतप्रत्यक्षसामग्र्या एव बलवत्त्वम्। न्यायमते तु प्रामाण्यस्य लौकिकप्रत्यक्षानभ्युपगमात् तादृशेच्छाविषयीभूतप्रामाण्यलौकिकप्रत्यक्षस्याप्रसिद्धतया तत् सामग्र्या अप्यप्रसिद्धत्वेन तस्याः प्रतिबन्धकत्वासम्भवेन तत्रानुमितिरेवोत्पत्तेर्न तत्र प्रतिबन्धकत्वकल्पनेति भावः ॥१२७॥

यत्र प्रामाण्यलौकिकप्रत्यक्षमिच्छामीति लौकिकप्रत्यक्षं जायतामिति प्रामाण्यलौकिकप्रत्यक्षेच्छाविषयकलौकिकप्रत्यक्षेच्छा अथ च प्रामाण्यलौकिकप्रत्यक्षेच्छा एवं घटादिभिन्नविषयकानुमित्यादिसामग्र्यपि विद्यते तत्र तादृशेच्छाविषयकलौकिकप्रत्यक्षेच्छाघटितसामग्रीबलात् तादृशेच्छाविषयकलौकिकप्रत्यक्षमेव उत्पद्यते, नतु भिन्नविषयकानुमित्यादिकम्। तथा च न्यायमते तत्र भिन्नविषयकानुमित्यादिवारणाय प्रामाण्यलौकिकप्रत्यक्षमिच्छामीति लौकिकप्रत्यक्षेच्छाविशिष्टप्रामाण्यलौकिकप्रत्यक्षेच्छाविषयकलौकिकप्रत्यक्षसामग्रीत्वेन प्रतिबन्धकत्वमावश्यकम्। मिश्रमते च तत्र प्रामाण्यलौकिकप्रत्यक्षेच्छाविशिष्टघटत्वादिप्रकारकज्ञानत्वेनेति मिश्रमते,लाघवमित्याशयेन समाधत्ते "**वस्तुतस्त्वि**"ति। "**विसम्वादिनी**"ति। न्यायमते प्रामाण्यस्य लौकिकप्रत्यक्षानभ्युपगमात् तन्मते तादृशीच्छा विसम्वादिनीति भावः। "**प्रामाण्यविषयकलौकिकप्रत्यक्षमिच्छामीती**"ति। प्रामाण्यविषयकलौकिकप्रत्यक्षमह-

तत्र घटानुमित्यादिसामग्रीसत्त्वेऽपि तादृशेच्छाप्रत्यक्षमेव जायते इच्छाघटितसामग्रीबलवत्त्वात्। अतस्तत्र घटानुमित्यादिवारणाय तत्र प्रामाण्यलौकिकप्रत्यक्षमिच्छामीति लौकिकप्रत्यक्षं जायतामित्येतादृशेच्छाविशिष्टायास्तादृशलौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वमावश्यकम्। तादृशसामग्रीदशायाञ्च तद्घटकीभूतस्य प्रामाण्यलौकिकप्रत्यक्षं जायतामित्येतादृशेच्छारूपविषयस्य सत्त्वमावश्यकम्। एवं तादृशेच्छाविषयतावच्छेदकघटकघटविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वादिरूपप्रामाण्यज्ञानस्यापि तादृशेच्छाभानोपयोगिनस्तदानीमावश्यकतया तादृशप्रामाण्याश्रयज्ञानस्याप्यावश्यकत्वम्, तादृशज्ञान एव प्रामाण्यघटकतया घटादौ घटत्वाद्यवगाहनात्। एवञ्च तादृशेच्छागोचरप्रत्यक्षेच्छामितरकारणञ्चानिवेश्य तादृशेच्छाविशिष्टप्रामाण्याश्रयज्ञानस्यैव प्रतिबन्धकत्वं मया कल्पनीयम्। एवञ्च प्रामाण्यलौकिकप्रत्यक्षं जायतामित्येता-

---

मिच्छामीत्याकारकं यल्लौकिकप्रत्यक्षं तज्जायतामितीच्छेति भावः। **"अथच तादृशीच्छापी"**ति। प्रामाण्यविषयकलौकिकप्रत्यक्षेच्छापीत्यर्थः। एतत्तु तादृशलौकिकप्रत्यक्षविषयसम्पत्त्यर्थमिति भावः। **"प्रतिबन्धकत्वमि"**ति। प्रामाण्यलौकिकप्रत्यक्षमिच्छामीत्याकारकं लौकिकप्रत्यक्षं तज्जायतामितीच्छा तद्विशिष्टायास्तादृशेच्छालौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वमित्यर्थः। **"तादृशसामग्रीदशायाञ्चे"**ति। तादृशलौकिकप्रत्यक्षसामग्रीदशायाञ्चेत्यर्थः। **"तद्घटकीभूतस्ये"**ति। तादृशलौकिकप्रत्यक्षसामग्रीघटकीभूतस्येत्यर्थः। **"सत्त्वमावश्यकमि"**ति। प्रत्यक्षे विषयस्य कारणत्वादित्यर्थः। **"तादृशेच्छाभानोपयोगिन"**इति। अत्र प्रामाण्यविषयकलौकिकप्रत्यक्षमिच्छामीत्याकारकेच्छाप्रत्यक्षे इच्छाया लौकिकभानम्, इच्छांशे तु तादृशप्रत्यक्षस्योपनीतभानम्, इच्छाविषयीभूतस्य तादृशप्रत्यक्षस्य सत्त्वे स्वविषयविरोधिन्यास्तादृशेच्छायाः सत्त्वासम्भवात्। एवं तादृशलौकिकप्रत्यक्षांशेऽपि प्रामाण्यस्योपनीतभानम्। तथाच तदुपनीतभाने तज्ज्ञानस्यावश्यकतया प्रामाण्यज्ञानस्यापि तादृशेच्छाभानोपयोगित्वं बोध्यमिति भावः। तादृशेच्छाप्रत्यक्षे प्रामाण्याश्रयघटत्वविशिष्टघटज्ञानस्याप्यावश्यकतया प्रामाण्याश्रयीभूतं घटत्वविशिष्टघटज्ञानमपि तादृशसामग्र्यन्तर्गतमितीच्छाविशिष्टस्य तस्यैव प्रतिबन्धकत्वसम्भवेन इतरकारणघटितसामग्र्याः प्रतिबन्धकत्वं न कल्प्यत इत्याह **"एवञ्च तादृशेच्छे"**ति। **"इतरकारणञ्चे"**ति। इन्द्रियसन्निकर्षादिकमित्यर्थः। **"प्रामाण्याश्रयज्ञानस्ये"**ति। तादृशेच्छाविषयीभूततादृशेच्छाप्रत्यक्षसामग्रीघटकघटादौ घटत्वावगाहिज्ञानस्येत्यर्थः। **"मये"**ति।

**दृशेच्छाविशिष्टतल्लौकिकप्रत्यक्षसामग्रीकाले उपदर्शितेच्छाविशिष्टतादृशेच्छा प्रत्यक्षसामग्रीकाले घटानुमित्यादिवारणमेतादृशैकप्रतिबन्धकतयैव निर्वहति। न प्रतिबन्धकत्वाधिक्यम् ॥१२८॥**

**परन्तु नैयायिकमत एव प्रामाण्यलौकिकप्रत्यक्षं जायतामित्येतादृशेच्छा-प्रत्यक्षसामग्र्याः प्रतिबन्धकतायां तादृशेच्छाप्रत्यक्षगोचरोपदर्शितेच्छायाः कारणान्तरस्य च वैशिष्ट्यनिवेशोऽधिक इति तेषामेव गौरवम् ॥१२९॥**

---

मिश्रेणेत्यर्थः। ननु तथापि प्रामाण्यलौकिकप्रत्यक्षं जायतामितीच्छाविशिष्टप्रामाण्य-लौकिकप्रत्यक्षकाले घटाद्यनुमितिवारणायैकं प्रतिबन्धकत्वमेवं प्रामाण्यलौकिकप्रत्यक्ष-मिच्छामीत्याकारकं यल्लौकिकप्रत्यक्षं तज्जायतामितीच्छाविशिष्टतादृशेच्छाप्रत्यक्षसामग्री-काले च घटाद्यनुमित्यादिवारणायापरं प्रतिबन्धकत्वं कल्पनीयमिति प्रतिबन्धकताद्वय कल्पनेन मिश्रमते गौरवमित्याशङ्कायामाह "**एवञ्च प्रामाण्ये**"ति। **तल्लौकिके**"ति। प्रामाण्यलौकिकेत्यर्थः। "**उपदर्शितेच्छाविशिष्टे**"ति। प्रामाण्यलौकिकप्रत्यक्षमिच्छामी-त्याकारकं यल्लौकिकप्रत्यक्षं तज्जायतामित्याकारकेच्छाविशिष्टेत्यर्थः। "**तादृशेच्छा-प्रत्यक्षसामग्रीकाल**"इति। प्रामाण्यलौकिकप्रत्यक्षमिच्छामीत्याकारकेच्छाप्रत्यक्षसामग्री-काल इत्यर्थः। "**न प्रतिबन्धकत्वाधिक्यमि**"ति। तथाचोभयत्रैव लौकिकप्रत्यक्षेच्छा-विशिष्टघटविशेष्यकघटत्वप्रकारकज्ञानत्वेनैकमेव प्रतिबन्धकत्वमिति न प्रतिबन्धकत्वाधिक्य-मिति भावः ॥१२८॥

नन्वेतेन किं लाघवमित्याह "**परन्त्वि**"ति। प्रामाण्यलौकिकप्रत्यक्षमिच्छामीति लौकिक-प्रत्यक्षं जायतामित्याकारकेच्छासत्त्वे तादृशेच्छाप्रत्यक्षसामग्रीसत्त्वे घटाद्यनुमितिवारणाय घटाद्यनुमितिं प्रति लौकिकेच्छाविशिष्टघटत्वावगाहिज्ञानत्वेन प्रतिबन्धकत्वं मिश्रमते कल्पितम्। एतत्तु न्यायमते न सम्भवति। प्रामाण्यलौकिकप्रत्यक्षं जायतामितीच्छादशायां घटादि-विषयकानुमितिन्यायसिद्धान्तसिद्धतया तदनुपपत्तेः, तत्रापि प्रामाण्यघटकीभूतघटत्वादि-ज्ञानसत्त्वात्, लौकिकप्रत्यक्षेच्छायाश्च विद्यमानत्वात्। तथाच न्यायमते प्रामाण्यलौकिक-प्रत्यक्षमिच्छामीतिलौकिकप्रत्यक्षं जायतामितीच्छादशायां प्रामाण्यलौकिकप्रत्यक्षेच्छाविषयक-प्रत्यक्षसामग्रीदशायाञ्च घटाद्यनुमितिवारणाय तादृशेच्छाविषयकेच्छाविशिष्टतादृशेच्छा-लौकिकप्रत्यक्षसामग्रीत्वेन प्रतिबन्धकत्वं कल्पनीयम्। एवञ्च घटज्ञानस्य प्रतिबन्धकत्वकल्पना-पेक्षया तादृशसामग्र्या प्रतिबन्धकत्वकल्पने गौरवमिति भावः ॥१२९॥

**यत्तु प्रामाण्यस्य लौकिकप्रत्यक्षमङ्गीकुर्वतां तादृशप्रत्यक्षे प्रामाण्यलौकिकप्रत्यक्षं जायतामित्येतादृशेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबन्धकत्वाधिक्यात् गौरवमिति ।**

**तदसत् उपदर्शितलाघवेन प्रामाण्यलौकिकप्रत्यक्षसिद्धौ विरोधिसामग्रीकाले तदापत्तिवारकप्रतिबन्धकताकल्पनगौरवस्य फलमुखत्वात् ॥१३०॥**

**वस्तुतस्तु मानसस्थलीयविरोधिसामग्रीप्रतिबन्धकतायामिच्छाया उत्तेज-**

---

यत्र प्रामाण्याभावग्रहसामग्री प्रामाण्यलौकिकप्रत्यक्षसामग्री प्रामाण्यलौकिकप्रत्यक्षं जायतामितीच्छा च विद्यते तत्र प्रामाण्यप्रत्यक्षोपपादनाय प्रामाण्यप्रत्यक्षं प्रति प्रामाण्यप्रत्यक्षं जायतामितीच्छाविरहाविशिष्टविरोधिसामग्र्याः प्रतिबन्धकत्वं प्रामाण्यलौकिकप्रत्यक्षमङ्गीकर्त्तृमते कल्प्यम् । तदनङ्गीकर्त्तृमते तु तत्र प्रामाण्यलौकिकप्रत्यक्षानभ्युपगमात् विरोधिसामग्रीमात्रस्यैव प्रतिबन्धकत्वं वाच्यम् । ननु तत्रेच्छाया विशेषणत्वमिति प्रामाण्यलौकिकप्रत्यक्षमङ्गीकुर्वतां मते गौरवमाशङ्कयते "**यत्त्वि**"ति । "**तादृशप्रत्यक्ष**" इति । प्रामाण्यलौकिकप्रत्यक्ष इत्यर्थः । "**विरोधिसामग्र्या**" इति । प्रामाण्याभावादिग्रहसामग्र्याः प्रतिबन्धकत्वं वाच्यं मिश्रमते । न्यायमते तु तादृशप्रामाण्यलौकिकप्रत्यक्षानभ्युपगमेन तादृशप्रतिबन्धकताया अकल्पनात् लाघवमिति ।

समाधत्ते "**तदसदि**"ति । "**उपदर्शितलाघवेने**"ति । यत्र घटत्वप्रकारकं ज्ञानं प्रमेत्येतादृशानुमितिसामग्री अथच प्रामाण्यप्रकारकघटत्वज्ञानलौकिकप्रत्यक्षं जायतामित्येतादृशीच्छा तत्रानुमितेर्वारणाय न्यायमते तादृशेच्छाविशिष्टघटत्वप्रकारकज्ञानत्वेन प्रतिबन्धकता वाच्या । मिश्रमते तु घटत्वज्ञानत्वेनैवेति लाघवम् । एवं यत्र प्रामाण्यविषयकलौकिकप्रत्यक्षमिच्छामीति लौकिकप्रत्यक्षं जायतामितीच्छा अथ च तादृशीच्छापि तत्र न्यायमते भिन्नविषयकानुमितिं प्रति तथाविधेच्छाविशिष्टतादृशप्रत्यक्षसामग्रीत्वेन प्रतिबन्धकता वाच्या, प्रामाण्यप्रत्यक्षमङ्गीकुर्वतां मिश्राणां मते तथाविधेच्छाविशिष्टघटत्वावगाहिज्ञानत्वेनेति सामग्र्यनिवेशजनितं लाघवमित्येतादृशपूर्वोपदर्शितबहुतरलाघवेनेत्यर्थः । "**फलमुखत्वादि**"ति । तथाच लाघवसिद्धस्य प्रामाण्यलौकिकप्रत्यक्षस्य पश्चात् गौरवप्रतिसन्धानं न पूर्व्वसिद्धस्य तस्य व्याघातकमित्यर्थः ॥१३०॥

यत्र प्रामाण्यलौकिकप्रत्यक्षं जायतामितीच्छा प्रामाण्यालौकिकप्रत्यक्षसामग्री तद्विरोधिसामग्री च विद्यते तत्र प्रामाण्यस्य नालौकिकप्रत्यक्षमिति प्रामाण्यालौकिकप्रत्यक्षं प्रति प्रामाण्यालौकिकप्रत्यक्षेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबन्धकत्वम् , एवं यत्र

**कत्वं विनैव वक्ष्यमाणक्रमेणोपपत्तेर्लौकिकालौकिकभेदेन विषयादिभेदेन च प्रतिबन्धकताभेदाभावादुपनीतभानादिस्थलीयप्रतिबन्धकतयैव निर्वाहः ।**

**तथाहि इच्छाधीनमानसे इच्छापि भासते, एवञ्च सामान्यतो विषयित्व-विषयत्वोभयसम्बन्धेन इच्छावदन्यमानसत्वमेव कार्यतावच्छेदकं विरोधि-सामग्र्यभावस्येत्युपेयते । इच्छाधीनमानसत्वञ्च तादृशोभयसम्बन्धेन इच्छा-विशिष्टत्वमेवेति न तत्र व्यभिचार इत्यलमिच्छाया उत्तेजकत्वेन ।**

---

प्रामाण्यालौकिकप्रत्यक्षं जायतामितीच्छा प्रामाण्यलौकिकप्रत्यक्षसामग्री तद्विरोधिसामग्री च तत्र प्रामाण्यस्य न लौकिकप्रत्यक्षमिति प्रामाण्यलौकिकप्रत्यक्षं प्रति प्रामाण्यलौकिकप्रत्यक्षेच्छाविरह-विशिष्टविरोधिसामग्र्याः प्रतिबन्धकत्वमिति लौकिकालौकिकभेदेन प्रतिबन्धकताभेदः । एवञ्च यत्र घटप्रत्यक्षं जायतामितीच्छा प्रामाण्यप्रत्यक्षसामग्री तद्विरोधिसामग्री च तत्र न प्रामाण्यस्य प्रत्यक्षमिति प्रामाण्यविषयकप्रत्यक्षं प्रति प्रामाण्यविषयकप्रत्यक्षेच्छाविरहविशिष्टविरोधि-सामग्र्याः प्रतिबन्धकत्वं कल्प्यमिति लौकिकालौकिकभेदेन विषयभेदेन च सर्वत्र प्रतिबध्य-प्रतिबन्धकभावकल्पनापेक्षया लाघवेन मानसस्थले विरोधिसामग्रीप्रतिबन्धकतायामिच्छाया-उत्तेजकत्वानभ्युपगमेन प्रतिबध्यप्रतिबन्धकभावमभ्युपगम्य प्रामाण्यस्य लौकिकभानाङ्गीकुर्वतां मतेऽपि गौरवं निराकरोति "**वस्तुतस्त्व**"ति । "**वक्ष्यमाणक्रमेणे**"ति । इच्छावदन्यमान-सत्वावच्छिन्नं प्रति विरोधिसामग्रीत्वेन प्रतिबन्धकत्वमित्यर्थः । "**उपनीतभानादिस्थलीय-प्रतिबन्धकतयैवे**"ति । यत्र प्रामाण्योपनीतभानं जायतामितीच्छा प्रामाण्योपनीतभान-सामग्री तद्विरोधिभानसामग्री च तत्र न्यायमतेऽपि प्रामाण्यस्योपनीतभानं भवेत्, तदुपपत्तये यादृशप्रतिबन्धकता तथाहीत्यादिना कल्प्या तयैवेत्यर्थः । "**निर्वाह**" इति । प्रामाण्य-लौकिकप्रत्यक्षमङ्गीकारमतेऽपि तादृशेच्छास्थले प्रामाण्यलौकिकभाननिर्वाह इत्यर्थः ।

मानसस्थलीयलघुतरप्रतिबध्यप्रतिबन्धकभावमाह "**तथाही**"ति । "**इच्छाऽपि-भासत**" इति । तादृशमानसपूर्वक्षणे इच्छाया विद्यमानत्वेन इच्छाभानसामग्र्यक्षतत्वा-दित्यर्थः । "**विषयित्वविषयत्वोभयसम्बन्धेने**"ति । प्रामाण्यलौकिकप्रत्यक्षं जायता-मितीच्छाधीनप्रामाण्यभानस्थले तादृशप्रामाण्यलौकिकप्रत्यक्षस्य तादृशेच्छाया विषयत्वात्, तादृशप्रत्यक्षे इच्छाया अपि भानादिच्छाविषयित्वाच्च तादृशप्रामाण्यभानं प्रति विरोधि-सामग्र्या न प्रतिबन्धकत्वमित्यर्थः । "**इच्छावदन्यमानसत्वमेवे**"ति । मानसत्वस्थले ज्ञानत्वनिवेशे यत्र घटविषयकचाक्षुषं जायतामितीच्छा घटविषयकचाक्षुषसामग्री तद्विरोधि-सामग्री च तत्र घटचाक्षुषानुत्पत्तिप्रसङ्गः । तादृशघटचाक्षुषे विषयत्वसम्बन्धेनेच्छावत्त्वेऽपि

**केवलविषयितासम्बन्धेनेच्छावदन्यत्वनिवेशे लौकिकप्रत्यक्षं जायतामित्ये-तादृशेच्छाविषयकस्य उपनीतभानस्य प्रतिबध्यतावच्छेदकानाक्रान्तत्वप्रसङ्ग इत्यतोविषयतायाः सम्बन्धमध्ये निवेशः ॥१३१॥**

**विरोधिसामग्र्यप्रतिबध्येच्छाधीनमानससामग्रीबलादिच्छां विना विरोधि-**

---

चाक्षुषे इच्छाभानाभावात् विषयित्वसम्बन्धेनेच्छावदन्यत्वेन विरोधिसामग्रीप्रतिबध्यतावच्छेदका-क्रान्तत्वादतो मानसत्वनिवेशः। "**विरोधिसामग्र्यभावस्ये**"ति। प्रतिबन्धकाभावस्य कार्यजनकत्वेन विरोधिसामग्र्याः प्रतिबन्धकत्वेन तदभावस्य कारणत्वादिति भावः। "**अलमिच्छाया उत्तेजकत्वेने**"ति। अनुगतरूपेण तादृशेच्छावदन्यत्वं प्रतिबध्यतावच्छेदक कुक्षौ निवेशेनैव सामञ्जस्ये अननुगतेच्छाया उत्तेजकत्वं न युक्तमिति भावः।

पूर्वोक्तसम्बन्धमध्ये विषयत्वनिवेशप्रयोजनमाह "**केवले**"ति। यत्र लौकिकप्रत्यक्षं जायतामितीच्छा प्रामाण्योपनीतभानसामग्री तद्विरोधिसामग्री च तत्र प्रामाण्यस्योपनीतभानं न भवेत्, अत उक्तस्थले विरोधिसामग्र्या प्रतिबन्धकत्वमावश्यकम्। तत्र विषयत्वानिवेशे तादृशस्थलीयविरोधिसामग्र्याः प्रतिबन्धकत्वाभावेन इच्छाविषयकस्य प्रामाण्योपनीतभानात्मकस्य मानसस्यापत्तिः। "**उपनीतभानस्ये**"ति। लौकिकप्रत्यक्षं प्रति तादृशेच्छाया उत्तेजकत्वेन लौकिकप्रत्यक्षस्येष्टत्वादित्युपनीतभानानुधावनम्। "**प्रतिबध्यतावच्छेदकानाक्रान्तत्व-प्रसङ्ग**" इति। तादृशमानसस्य विषयितासम्बन्धेनेच्छाविशिष्टतयेच्छावदन्यत्वाभावेन प्रतिबध्यतावच्छेदकानाक्रान्तत्वादिति भावः। "**विषयतायाः सम्बन्धमध्ये निवेश**" इति। तथाचापाद्यस्योपनीतभानात्मकस्य तादृशमानसस्येच्छाविषयत्वाभावात् विषयताघटितोभय-सम्बन्धेनेच्छावदन्यत्वात् प्रतिबध्यतावच्छेदकाक्रान्तत्वमिति भावः। यत्र घटो जायतामितीच्छा प्रामाण्यमानससामग्री तद्विरोधिभानसामग्री च तत्र मानसे इच्छाया भानात् विषयिता-सम्बन्धेन इच्छावत्वात् प्रतिबध्यतावच्छेदकानाक्रान्तत्वप्रसङ्ग इति विषयतानिवेशः। यत्र प्रामाण्यलौकिकप्रत्यक्षं जायतामितीच्छा तदनन्तरं दिवसादिविलम्बेन प्रामाण्यलौकिकप्रत्यक्ष-सामग्री तद्विरोधिसामग्री च तत्र प्रामाण्यलौकिकप्रत्यक्षापत्तिः तादृशप्रत्यक्षस्य विषयतादि सम्बन्धेन दिवसादिपूर्वोत्पन्नतादृशेच्छाविशिष्टतया प्रतिबध्यतावच्छेदकानाक्रान्तत्वादित्यतः विषयितानिवेश इति द्रष्टव्यम् ॥१३१॥

नचेच्छाधीनमानसप्रत्यक्षं न विरोधिसामग्रीप्रतिबध्यमिति तादृशमानसे विरोधिसामग्र्य-भावस्य नापेक्षा। तथाच तत्रापेक्षिताया आत्ममनःसंयोगादिघटिताया सामग्र्या विरोधिसामग्रीकालेऽपि विद्यमानतया इच्छां विनापि तादृशसामग्रीबलादेव कथं न

**सामग्रीकाले मानसापत्तिरिति तु न वाच्यम्। तादृशमानसे विषयमुद्रया इच्छाया हेतुत्वात् तद्विरहेण तादृशमानससामग्र्यास्तत्राभावादित्यधिकमन्यत्रानुसन्धेयम्।**

**तस्मात् प्रामाण्यलौकिकप्रत्यक्षस्वीकारेऽपि न तत्र विरोधिसामग्रीप्रतिबन्धकताधिक्यमित्यलं पल्लवितेन ॥१३२॥**

**प्रामाण्यस्य स्वतस्त्वे रक्तदण्डवानित्यादिविशिष्टवैशिष्ट्यावगाहिमानससामग्र्या इच्छाविशिष्टाया रक्तत्वप्रकारकज्ञानं न प्रमेत्याद्याकारकानुमित्यादौ**

---

तादृशमानसोत्पत्तिरित्याशङ्कते "**विरोधी**"ति। विरोधिसामग्र्यप्रतिबध्येति मानसविशेषणम्। तथाच विरोधिसामग्र्यप्रतिबध्यमिच्छाधीनञ्च यत् मानसं तादृशमानससामग्रीबलादित्यर्थः। "**इच्छां विने**"ति। एतन्मते इच्छाया अनुत्तेजकत्वादित्यर्थः। "**विरोधिसामग्रीकाल**"इति। तादृशेच्छाधीनमानसं प्रति विरोधिसामग्र्यभावस्याहेतुत्वादिति भावः ॥

इच्छाशून्यकालीनमानसस्य विषयितासम्बन्धेन इच्छावदन्यत्वात् तादृशमानसं प्रति विरोधिसामग्र्यभावस्य हेतुत्वात् तत्र तदभावघटितसामग्र्यभावात् न तादृशमानसापत्तिरिच्छाधीनमानसस्य तादृशोभयसम्बन्धेन इच्छावत्त्वात् तादृशमानसं प्रति विरोधिसामग्र्यभावस्याहेतुत्वेऽपि तादृशमानसे इच्छाविषयकत्वात् तत्र इच्छाया विषयमुद्रया हेतुत्वात् तदभावात् न तादृशमानसापत्तिरित्याशयेन समाधत्ते "**तादृशमानस**"इति। "**विषयमुद्रये**"ति। प्रत्यक्षे विषयहेतुत्वस्य सर्वसिद्धत्वादित्यर्थः। "**तद्विरहेणे**"ति। इच्छाविरहेणेत्यर्थः।

"**तस्मादि**"ति। विषयित्वविषयत्वोभयसम्बन्धेनेच्छावदन्यमानसत्वाच्छिन्नं प्रति विरोधिसामग्रीप्रतिबन्धकतयैव निर्वाहादित्यर्थः। "**प्रतिबन्धकताधिक्यमि**"ति। प्रामाण्यलौकिकप्रत्यक्षं जायतामितीच्छाविरहविशिष्टप्रामाण्यविरोधिसामग्र्याः प्रतिबन्धकताधिक्यम्। न्यायमते च प्रामाण्यलौकिकानभ्युपगमेन तत्र विरोधिसामग्र्याः प्रतिबन्धकत्वाकल्पनाल्लाघवमितिपूर्वमुक्तं परन्तु तादृशसम्बन्धेनेच्छावदन्यमानसं प्रति विरोधिसामग्रीत्वेन प्रतिबन्धकत्वमिति लघुतरप्रतिबध्यप्रतिबन्धकभावस्य स्वीकार्य्यत्वेन तेनैव निर्वाहात् प्रामाण्यलौकिकप्रत्यक्षं प्रति प्रामाण्यलौकिकप्रत्यक्षेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबन्धकत्वाकल्पनेन नैतन्मते प्रतिबन्धकत्वाधिक्यमिति भावः ॥१३२॥

प्रामाण्यस्यानुव्यवसायग्राह्यत्वरूपस्वतस्त्वपक्षे गौरवाभावं प्रदर्श्य लाघवमपि दर्शयति "**प्रामाण्यस्ये**"त्यादिना। "**विशिष्टवैशिष्ट्यावगाही**"ति। रक्तत्वविशिष्टः यो

**प्रतिबन्धकत्वं न कल्प्यते। तादृशविशिष्टवैशिष्ट्यबोधसामग्रीकाले रक्तो-दण्ड इत्याद्याकारकज्ञानस्यावश्यकतया तादृशविशिष्टवैशिष्ट्यावगाहिमानसस्य रक्तत्वप्रकारकज्ञानत्वविशिष्टे प्रामाण्यावगाहितया कार्य्यकाले सत्त्वेनैवानु-मितिवारणसम्भवात् ॥१३३॥**

**न च तादृशानुमितिजनकप्रामाण्याभावव्याप्यवत्त्वानिर्णयेन प्रतिबन्धात्**

---

दण्डस्तद्वैशिष्ट्यावगाहीत्यर्थः। एतत्तु विशेषणतावच्छेदकज्ञानमुद्रया रक्तोदण्ड इतिज्ञानस्यापि तादृशमानससामग्र्यन्तर्गतत्वलाभाय। "**मानससामग्र्या**" इति। चाक्षुषादिज्ञानस्य रक्तो दण्ड इत्यादिज्ञानानुव्यवसायरूपत्वाभावात् मानसानुधावनम्। "**इच्छाविशिष्टाया**" इति। इदन्तु मानससामग्र्यास्तादृशानुमितिसामग्र्यपेक्षया बलवत्त्वलाभार्थमन्यथा भिन्न-विषयकानुमितिसामग्र्या एव बलवत्त्वात् तादृशानुमितिसामग्र्या एव बलवत्त्वेन ग्रन्थासंगते-रिति भावः। "**न कल्प्यत**" इति। न्यायमते तु यत्र तादृशमानससामग्री मानसेच्छा, रक्तत्वप्रकारकं ज्ञानं न प्रमेत्याकारकानुमितिसामग्री च तत्र तादृशानुमितिवारणाय इच्छा-विशिष्टायास्तादृशमानससामग्र्याः प्रतिबन्धकत्वं कल्प्यम्, प्रामाण्यस्य स्वतस्त्वमते तु तन्न कल्प्यत इति लाघवमित्यर्थः।

प्रामाण्यस्यानुव्यवसायग्राह्यत्वमते तादृशप्रतिबन्धकत्वाकल्पनेनापि तादृशानुमितिवारण-प्रकारणं दर्शयति "**तादृशे**"त्यादि। "**तादृशविशिष्टवैशिष्ट्यबोधे**"ति। रक्तत्व-विशिष्टदण्डवैशिष्ट्यबोधेत्यर्थः। "**आवश्यकतये**"ति। एतत्तु विशिष्टवैशिष्ट्यावगाहि-ज्ञानं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वमते एव नतु मिश्रमते तैर्विशेषणता-वच्छेदकप्रकारकज्ञानस्य हेतुतानभ्युपगमात् इति नाशङ्क्यम् मिश्रमतेऽपि रक्तदण्डवानित्या-कारकमानसे रक्तदण्डस्योपनीतभानात् तदुपनीतभानं प्रति तन्मतेऽपि तज्ज्ञानस्यावश्यक-त्वेन रक्तदण्डज्ञानस्य तादृशसामग्र्यन्तर्गतत्वात्। '**प्रामाण्यावगाहितये**'ति। तादृश-मानसस्य पूर्वं कारणविधया रक्तो दण्ड इत्याकारकज्ञानस्यावश्यकत्वेन तादृशमानसे रक्तो दण्ड इत्याकारकज्ञानमपि भासते सामग्रीसत्त्वात्। तथाच तादृशमानसस्य रक्तो दण्ड इत्याकारकज्ञानानुव्यवसायरूपतया तत्र रक्तत्वप्रकारकज्ञाननिष्ठं प्रामाण्यमपि भासत इति तादृशमानसस्य रक्तत्वप्रकारकज्ञाने प्रामाण्यावगाहनात् न तदानीं प्रामाण्याभावानुमितिः। तत्र प्रामाण्यनिश्चयस्य कार्य्यकालवृत्तितयापि प्रतिबन्धकत्वस्वीकारादिति भावः ॥१३३॥

ननु यत्रेच्छाविशिष्टा रक्तदण्डवानित्यादिविशिष्टवैशिष्ट्यावगाहिमानससामग्री रक्तत्व-प्रकारकज्ञानं न प्रमेत्याद्याकारकानुमितिसामग्री च तत्र तादृशानुमितिजनकप्रामाण्या-

**तत्र प्रामाण्यं न भासत इति वाच्यम्। तदभावव्याप्यवत्त्वाज्ञानस्य लौकिकप्रत्यक्षाविरोधितया तत्र प्रामाण्यलौकिकप्रत्यक्षे बाधकाभावात् ॥१३४॥**

**यत्र प्रामाण्याभावादिगोचरतदिन्द्रियजन्यबाधबुद्धिस्तत्र च विशिष्टवैशिष्ट्य-बुद्धिसामग्र्येव नास्ति अप्रामाण्यग्रहाभावविशिष्टविशेषणतावच्छेदकप्रकारक-निर्णयविरहादिति तत्र जायत एवानुमितिरिति नापत्तिरिति।**

---

भावव्याप्यवत्त्वानिर्णयस्याप्यावश्यकतया तादृशमानससामग्रीजन्ये मानसे प्रामाण्यं नावगाहते तद्विरोधिनः प्रामाण्याभावव्याप्यवत्ताज्ञानस्य सत्त्वादिति कथं तादृशमानसस्य रक्तत्वप्रकारक-ज्ञानत्वविशिष्टे प्रामाण्यावगाहितेत्याशङ्कयते "**नचे**"ति। "**तत्र प्रामाण्यं न भासत**" इति। तथाच तादृशमानसस्य प्रामाण्यानवगाहित्वेन तादृशानुमितिप्रतिबन्धकत्वं न सम्भवतीति तत्रानुमित्यादिवारणाय प्रामाण्यस्य स्वतस्त्वपक्षेऽपीच्छाविशिष्टायाः तादृशमानस-सामग्र्या एव रक्तत्वप्रकारकज्ञानं न प्रमेत्याद्याकारकानुमितौ प्रतिबन्धकत्वं कल्प्यमिति कथं लाघवमिति पूर्व्वपक्षाभिप्रायः।

समाधत्ते "**तदभावव्याप्यवत्ताज्ञानस्ये**"ति। "**लौकिकप्रत्यक्षाविरोधितये**"ति। घटाभावव्याप्यवत्ताज्ञानेऽपि घटचक्षुःसंयोगादिघटितघटचाक्षुषादिसामग्रीसत्त्वे घटचाक्षुषा-द्युत्पत्त्या लौकिकप्रत्यक्षे न तदभावव्याप्यवत्त्वज्ञानस्य प्रतिबन्धकत्वमिति भावः। "**बाधका-भावादि**"ति। तथाच तत्र प्रामाण्यलौकिकप्रत्यक्षोत्पत्त्या तस्यैव कार्य्यकालवृत्तित्वेन तादृशप्रामाण्याभावानुमितिप्रतिबन्धकत्वसम्भवात् तत्र तादृशेच्छाघटितसामग्रीप्रतिबन्धकत्व-कल्पनं गौरवग्रस्तमिति भावः॥१३४॥

ननु यत्र रक्तदण्डवानित्यादिविशिष्टवैशिष्ट्यावगाहिमानसस्य विशेषणतावच्छेदकीभूत-रक्तत्वप्रकारकज्ञानादिघटितसामग्री, तादृशमानसज्ञानं जायतामितीच्छा रक्तत्वांशे अप्रामाण्य-ज्ञानञ्च तदनन्तरं तादृशमानसबोधे रेक्तोदण्ड इत्याकारकज्ञानावगाहित्वेऽपि स्वतस्त्वपक्षेऽपि रक्तत्वांशे प्रामाण्यानवगाहनात् रक्तत्वप्रकारकं ज्ञानं न प्रमेत्याकारकानुमित्यप्रतिबन्धकत्वात् तत्र तादृशमानसोत्पत्तिक्षणे तादृशानुमितिवारणाय तादृशानुमितिं प्रति तादृशप्रत्यक्ष-सामग्र्याः प्रतिबन्धकत्वं कल्प्यमेवेत्याशङ्कां परिहरति "**यत्रे**"ति। "**प्रामाण्याभावादि-गोचरे**"ति। रक्तत्वाद्यंशे प्रामाण्याभावविषयकेत्यर्थः। "**तदिन्द्रियजन्ये**"ति। तादृश-प्रामाण्याभावविषयकज्ञानस्य परोक्षत्वे न प्रात्यक्षिकप्रामाण्यनिश्चयविरोधित्वमिति बाधनिश्चये प्रात्यक्षिकत्वज्ञापनाय इन्द्रियजन्यत्वविशेषणम्। "**बाधबुद्धिरि**"ति। रक्तत्वप्रकारकत्वांशे प्रामाण्यभानप्रतिबन्धकीभूतबाधबुद्धिरित्यर्थः। "**विशिष्टवैशिष्ट्यबुद्धी**"ति। रक्तत्व-

**तदप्ययुक्तमेव यतस्तादृशविशिष्टवैशिष्ट्यबोधेन यत्र विशृङ्खलाप्रामाण्योपस्थित्यादिबलाज्ज्ञानांशेऽप्रामाण्यमपि विषयीकृतं तत्र तादृशज्ञानस्य प्रामाण्यनिर्णयानात्मकतया कार्यकाले बाधनिर्णयो नास्ति इत्युक्तसामग्रीप्रतिबन्धकत्वाकल्पने तत्रानुमित्यादेर्दुर्वारत्वैवेति ॥१३५॥**

**भट्टमते तु ज्ञाततालिङ्गकज्ञानानुमितिग्राह्यत्वमेव प्रामाण्यस्य स्वतस्त्वम् ॥१३६॥**

---

विशिष्टदण्डवैशिष्ट्यावगाहिबुद्धीत्यर्थः। **"अनुमितिरि"**ति। रक्तत्वप्रकारकं ज्ञानं न प्रमेत्याद्याकारिकानुमितिर्जायत एवेत्यर्थः। **"नापत्तिरिती"**ति। तत्र तादृशानुमितिप्रतिबन्धकत्वं न कल्प्यम्। तथाच प्रामाण्यस्य स्वतस्त्वे रक्तदण्डवानित्यादिविशिष्टवैशिष्ट्यावगाहिमानससामग्र्या इच्छाविशिष्टायाः रक्तत्वप्रकारकं ज्ञानं न प्रमेत्याद्याकारकानुमितिप्रतिबन्धत्वं न कल्प्यत इति भावः।

तथापि निरुक्तमानससामग्र्या स्तादृशानुमितिप्रतिबन्धकत्वमावश्यकमित्याह **"तदप्ययुक्तमेवे"**ति। तादृशप्रतिबन्धकत्वे प्रयोजनमाह **"यत"** इति। **"तादृशविशिष्टवैशिष्ट्यबोधेने"**ति। रक्तत्वविशिष्टदण्डवैशिष्ट्यबोधेनेत्यर्थः। **"ज्ञानांश"** इति। रक्तत्वप्रकारकज्ञानांश इत्यर्थः। **"प्रामाण्यनिर्णयानात्मकतये"**ति। अप्रामाण्यभासकसामग्रीसत्त्वात् स्वतस्त्वपक्षेऽपि तत्र प्रामाण्यं न भासत इति भावः। **"दुर्वारत्वैवेती"**ति। तथाच तादृशमानसस्य रक्तत्वांशे प्रामाण्यानवगाहनात् रक्तत्वप्रकारकं ज्ञानं न प्रमेत्याद्याकारकानुमित्यप्रतिबन्धकत्वेन तादृशमानसोत्पादक्षणे अनुमित्युत्पत्तिवारणाय तादृशमानससामग्र्याः प्रतिबन्धकत्वमावश्यकमिति भावः ॥१३५॥

भट्टमते प्रामाण्यस्य स्वतस्त्वमाह **"भट्टमते त्वि"**ति। **"प्रामाण्यस्य स्वतस्त्वमि"**ति। प्रामाण्याश्रयीभूतघटत्वप्रकारकज्ञानमपि ज्ञाततालिङ्गकानुमानेन गृह्यते तन्निष्ठं प्रामाण्यमपि तेनैव गृह्यत इति प्रामाण्यस्य स्वतस्त्वम्। तथाचात्र प्रामाण्यं ज्ञाततालिङ्गकानुमानग्राह्यं नवेति विप्रतिपत्तिः। तत्र विधिकोटिः भट्टानां निषेधकोटिः नैयायिकादीनाम्। ननु भट्टातिरिक्तमते ज्ञाततालिङ्गकानुमितेरप्रसिद्धया तद्ग्राह्यत्वाभावरूपनिषेधकोटिः कथं सङ्गच्छते? ज्ञाततालिङ्गकानुमितिग्राह्यत्वरूपविधिकोटेरपि नैयायिकाद्यसिद्धतया नैयायिकादीन् प्रति तत्साधनमप्यसङ्गतत्वापत्तेरिति चेन्न। प्रामाण्यं स्वाश्रयाग्राहकत्वेन भट्टमतसिद्धं यत्तदन्ययावद्ग्राह्यं नवेति विप्रतिपत्तेरभ्युपगमात्। तथाच भट्टमते स्वाश्रयाग्राहकत्वेन भट्टमतसिद्धा ज्ञाततालिङ्गकानुमानातिरिक्ताः सर्वे एव, तदन्ययावदन्तर्गतं ज्ञाततालिङ्गकानुमानमेव तद्-

**तथाहि घटत्वप्रकारकज्ञानानन्तरं अयं घटत्वेन ज्ञात इत्याद्याकारकश्चाक्षुषादि-प्रत्ययः सर्वजनानुभवसिद्धः। स च न घटत्वादिप्रकारकज्ञानविषयत्वावगाही चक्षुरादेर्ज्ञानाग्राहकत्वात् ॥१३७॥**

**न च ज्ञानस्य चक्षुराद्ययोग्यत्वेऽपि अनुव्यवसायोपनीतज्ञानभानं चक्षुरादितो निर्वहत्येवेति वाच्यम्।**

**ज्ञानस्यातीन्द्रियतया अनुव्यवसायस्यैवासम्भवाद्। ज्ञानलक्षणायाः प्रत्यासत्तित्वासिद्धेस्तद्बलात् ज्ञानभानासम्भवाच्च। तस्मादसौ अतिरिक्तं**

---

ग्राह्यत्वं प्रामाण्यघटकीभूतज्ञानत्वादौ प्रसिद्धं तस्य च प्रामाण्ये साधनात्, अनुव्यवसायस्य न्यायमतसिद्धत्वेऽपि स न प्रामाण्याश्रयाग्राहकत्वेन भट्टमतसिद्धः, अनुव्यवसायस्य भट्टमतेऽसिद्धत्वात्, अतो न्यायमतेऽपि प्रामाण्याश्रयाग्राहकत्वेन भट्टमतसिद्धत्वेन च व्यवसायादय एव ग्राह्याः तदन्ययावदन्तर्गतोऽनुव्यवसायस्तद्ग्राह्यत्वाभावरूपनिषेधकोटिस्तादृशानुव्यवसाय-विषये पदार्थान्तरे प्रसिद्धस्तस्य च प्रामाण्ये साधनात् न पूर्वोक्तदोषाणामवकाश इति ध्येयम् ॥१३६॥

ज्ञाततालिङ्गेन प्रामाण्यानुमानप्रकारं दर्शयितुं प्रथमतः ज्ञाततां साधयति "**तथाही**"ति। "**अयं घटत्वेन ज्ञात**" इति। अत्र 'इदं'पदार्थो विशेष्यः, तत्र च ज्ञातत्वं प्रकारः; घटत्वेनेति तृतीयया ज्ञातत्वान्वयिप्रकारकत्वं बोध्यते। तथाच घटत्वप्रकारकज्ञातत्ववानयमित्याकारको बोधः। ननूक्तज्ञानस्य चाक्षुषत्वे किं मानमित्याह "**सर्वजनानुभवसिद्ध**" इति। तथाच इदंरूपधर्मिणश्चक्षुषा सह सन्निकर्षादुत्पद्यमानत्वेनास्य चाक्षुषत्वं सर्वजनसिद्धमिति भावः। ननु ज्ञातत्वं ज्ञानविषयत्वं तथाचोक्तप्रत्ययेन ज्ञानविषयत्वं गृह्यते चेत् विषयत्वविशेषणीभूतं ज्ञानमपि गृह्यत एवेति ज्ञाततालिङ्गेन ज्ञानानुमानं व्यर्थमित्यत उक्तप्रत्ययस्य ज्ञानविषयत्वाव-गाहित्वं निराकुरुते "**स च ने**"ति। "**चक्षुरादेर्ज्ञानाग्राहकत्वादि**"ति। चक्षुरादिना सह ज्ञानस्य चाक्षुषाद्युत्पादकेन्द्रियसन्निकर्षविरहात् चक्षुरादेर्न ज्ञानग्राहकत्वमिति भावः ॥१३७॥

ननु ज्ञानेन सहेन्द्रियस्य लौकिकसन्निकर्षविरहेऽपि ज्ञानलक्षणरूपालौकिकसन्निकर्षेणैव ज्ञानभानं स्यादित्याशङ्कयते "**नचे**"ति। "**अनुव्यवसायोपनीतज्ञानभानमि**"ति। अनुव्यव-सायेन ज्ञानलक्षणरूपसन्निकर्षेण, उपनीतं सन्निकृष्टं यज्ज्ञानं तस्य भानमित्यर्थः। तथाचानु-व्यवसायरूपज्ञानलक्षणसन्निकर्षात् चाक्षुषादावपि ज्ञानभानं भवत्विति पूर्वपक्षाभिप्रायः।

समाधत्ते "**ज्ञानस्यातीन्द्रियतये**"ति। "**तस्मादि**"ति। अयं घटत्वेन ज्ञात इत्याकारकचाक्षुषप्रत्ययेऽवगाह्यमानस्य ज्ञातत्वस्य ज्ञानविषयत्वरूपत्वाभावात्॥ "**असावि**"ति।

**ज्ञातताख्यधर्मविशेषमेवावगाहते। ज्ञातता तु घटत्वादिप्रकारिका, घटत्वेन ज्ञात इत्यादिप्रकारत्वावगाहनात्। सविशेष्यकत्वे तु तस्या मानाभावः। ज्ञानविशेष्यीभूतघटादिस्तु तस्याः समवायिकारणम्। निमित्तकारणं स्वसमानप्रकारकज्ञानम् ॥१३८॥**

---

अयं घटत्वेन ज्ञात इत्याकारकचाक्षुषादिप्रत्यय इत्यर्थः। "**अतिरिक्तमि**"ति। ज्ञानविषयताभिन्नमित्यर्थः। "**धर्मविशेषमि**"ति। घटादिरूपविशेष्यनिष्ठं घटत्वादिभिन्नं विशेष्यतादिविषयताभिन्नञ्च धर्ममवगाहत इत्यर्थः। तथाच अयं घटत्वेन ज्ञात इत्याद्याकारकचाक्षुषादिप्रत्ययादेव ज्ञाततासिद्धिरिति भावः।

ननु घटत्वेन घटज्ञानीयज्ञातता द्रव्यत्वेन घटज्ञानीयज्ञातता च यद्येकैव तदा तादृशज्ञाततया घटत्वप्रकारकज्ञानव्याप्यत्वविरहाद् घटत्वप्रकारकज्ञानानुमापकत्वासम्भव इति द्रव्यत्वादिप्रकारकज्ञानीयज्ञातताः घटत्वादिप्रकारकज्ञानीयज्ञातता भिन्नैव वाच्या, तथाच घटत्वप्रकारकज्ञानीयज्ञाततायाः घटत्वप्रकारकज्ञानव्याप्यत्वेन तादृशज्ञाततहेतुना घटत्वप्रकारकज्ञानानुमानं सम्भवति। तथाच घटत्वप्रकारकज्ञानजन्या एका ज्ञातता, अन्या च द्रव्यत्वादिप्रकारकज्ञानजन्येति सिद्धम्, एवञ्च ज्ञाततानिष्ठजन्यतावच्छेदकस्यापि भेदो वाच्यः, अन्यथा व्यभिचारापत्तिरित्यतो ज्ञाततानिष्ठजन्यतावच्छेदकभेदं दर्शयति "**ज्ञातता त्वि**"ति। "**घटत्वादिप्रकारके**"ति। तथाच घटत्वप्रकारकज्ञाततात्वमेव घटत्वप्रकारकज्ञानजन्यतावच्छेदकमिति न व्यभिचार इति भावः। ननु ज्ञाततया घटत्वप्रकारकत्वे किं मानमित्याह "**घटत्वेने**"ति। अयं घटत्वेन ज्ञात इत्यादिप्रत्यये घटत्वेनेति तृतीयया ज्ञातत्वविशेषणीभूतप्रकारकत्वबोधनात् तादृशप्रत्ययादेव ज्ञातत्वे घटत्वादिप्रकारकत्वं सिद्ध्यतीति भावः। ननु ज्ञानीयविशेष्यभेदेनापि ज्ञातता भिन्नैव स्यादतो ज्ञाततायां प्रकारकत्ववद् विशेष्यकत्वमपि स्वीकार्यमित्याशङ्कायामाह "**सविशेष्यकत्वे त्वि**"ति। तथाचाश्रयभेदेन ज्ञाततभेदसिद्धौ विशेष्यकत्वस्य तद्भेदकत्वे मानाभावात्तस्यां विशेष्यकत्वस्वीकारो व्यर्थ इति भावः।

ननु ज्ञातता भावकार्या अतस्तस्य समवायिकारणं निमित्तकारणञ्च वक्तव्यमित्यपेक्षायामाह "**ज्ञानविशेष्यीभूते**"ति। "**स्वसमानप्रकारकज्ञानमि**"ति। तथाच घटत्वादिप्रकारकज्ञाततां प्रति घटत्वप्रकारकज्ञानस्य हेतुत्वमिति कार्यकारणभाव इति भावः। ननु ज्ञानस्यात्मनिष्ठत्वाज् ज्ञाततायाश्च घटादिनिष्ठत्वात्तयोर्हेतुहेतुमद्भावः कथमुपपद्यत इति चेन्न, समवायसम्बन्धेन घटत्वप्रकारकज्ञाततां प्रति विशेष्यतासम्बन्धेन घटत्वप्रकारकज्ञानत्वेन हेतुतेति घटादिनिष्ठत्वेन कार्यकारणभावस्वीकारात्।

**तथाच प्रमातारः प्रामाण्यविशिष्टमेव ज्ञानमनुमिमते। तत्तूयिप्रकारः घटत्वादिप्रकारकज्ञानेन घटादावुत्पादितायां ज्ञाततायां चक्षुःसंयुक्तसमवायादि-बलात्तदवगाहि "ज्ञात"इत्याद्याकारकचाक्षुषादिकमुत्पद्यते। घटत्वादिविशिष्टे ज्ञाततामवगाहमानेन च तेन समानसंवित्संवेद्यतया घटत्वादिप्रकारकज्ञात-तायां घटत्वादिसामानाधिकरण्यमप्यवगाहते ॥१३९॥**

**तादृशप्रणाल्या हेतुसिद्धौ च "इयं ज्ञातता घटविशेष्यकघटत्वप्रकारकज्ञान-जन्या घटत्वसमानाधिकरणघटत्वप्रकारकज्ञाततात्वा"दित्येतादृशज्ञाततापक्षका-**

---

अत्रेदमवधातव्यं ज्ञाततायाश्चक्षुरादीन्द्रियग्राह्यत्वेऽपि न सर्वा ज्ञातताः सर्वेन्द्रियग्राह्याः। चाक्षुषज्ञानजन्यज्ञातता चक्षुरिन्द्रियग्राह्या स्पार्शनज्ञानजन्यज्ञातता स्पर्शेन्द्रियग्राह्येत्यादि तत्तज्ज्ञातता तत्तदिन्द्रियग्राह्येति ॥१३८॥

ननु ज्ञाततासिद्धावपि तया ज्ञानस्यैवानुमानमिति प्रामाण्यस्य कथं ज्ञाततालिङ्गकानुमान-ग्राह्यत्वरूपं स्वतस्त्वमित्यत आह "**तथाचे**"ति। "**प्रामाण्यविशिष्टमेवे**"ति। तथाच प्रामाण्यविशिष्टस्य ज्ञानस्यानुमानविषयत्वे प्रामाण्यस्याप्यनुमानविषयत्वमिति भावः। ज्ञातता-लिङ्गकप्रामाण्यविशिष्टज्ञानानुमानप्रकारान् दर्शयति **तत्तूयी**त्यादिना। ननु घटत्वेन पटावगाहिज्ञानजन्याया घटत्वप्रकारिकायाः पटादिनिष्ठाया ज्ञाततायाः न घटत्वादिप्रामाण्य-विशिष्टज्ञानानुमापकता सम्भवति तस्यास्तादृशप्रामाण्यविशिष्टज्ञानस्य व्यभिचारित्वादिति घटत्वसामानाधिकरण्यविशिष्टाया एव तादृशज्ञाततायाः अनुमापकत्वं तथाच घटत्वसामानाधि-करण्यविशिष्टघटत्वप्रकारकज्ञाततैव हेतुर्वाच्या। "**अयं घटत्वेन ज्ञात**" इत्यादिज्ञाने घटत्व-प्रकारकज्ञाततावगाहित्वेऽपि ज्ञातत्वांशे घटत्वसामानाधिकरण्यानवगाहनान्न हेतुतावच्छेदक-विशिष्टहेतुसिद्धिरित्यत आह "**घटत्वादिविशिष्ट**" इति। "**समानसंवित्संवेद्य-तये**"ति। तथाच घटे ज्ञातत्वावगाहने ज्ञातत्वेऽपि घटनिरूपितवृत्तित्वमवगाहते। एवञ्च घटे घटत्वस्याप्यवगाहनाद् घटत्ववन्निरूपितवृत्तित्वरूपघटत्वसामानाधिकरण्यमपि ज्ञाततायां भासत इति तादृशप्रत्ययादेव घटत्वसामानाधिकरण्यविशिष्टज्ञाततासिद्धिरित्यर्थः ॥१३९॥

अनुमापकहेतुं साधयित्वाऽनुमानप्रकारान् दर्शयति "**इयं ज्ञातते**"ति। इयं ज्ञातता घटविशेष्यकघटत्वप्रकारकज्ञानजन्या घटत्वसमानाधिकरणघटत्वप्रकारकज्ञाततात्वादिति ज्ञाततापक्षकानुमानम्। अत्र च घटविशेष्यकघटत्वप्रकारकज्ञानजन्यत्वसिद्धौ साध्यघटकी-भूतस्य घटविशेष्यकघटत्वप्रकारकत्वरूपप्रामाण्यस्यापि सिद्धिः। ननु पूर्वोक्तानुमाने घटविशेष्य-कत्वं घटत्वप्रकारकत्वञ्च ज्ञाने विशेषणम्। तथाच यत्र घटत्वेन पटावगाही पटत्वेन च

**नुमानेन, "घटो घटे घटत्वप्रकारकज्ञानविषयः घटत्वसमानाधिकरणघटत्व-प्रकारकज्ञाततावत्त्वा"दित्येतादृशविषयपक्षकानुमानेन वा स्वजनकज्ञानवत्त्वादि-लक्षणपरम्परासम्बन्धेन चात्मन्यपि ज्ञातताया वृत्तेः "अहं घटविशेष्यक-**

---

घटावगाही समूहालम्बनो भ्रमः, तादृशभ्रमेऽपि घटविशेष्यकत्वघटत्वप्रकारकतयोः सत्त्वान्न घटविशेष्यकघटत्वप्रकारकत्वं प्रामाण्यं न वा तत्सिद्धौ प्रामाण्यसिद्धिः। अपि तु घटविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वस्यैव प्रामाण्यत्वात्, उक्तज्ञाततापक्षकानुमाने च अवगाह्मानयोः परस्परावच्छेद्यावच्छेदकभावानापन्नयो र्विशेष्यकत्वप्रकारकत्वयोः प्रामाण्य-रूपताभावादिति चेन्न। अत्र साध्यघटकीभूतज्ञाने घटत्वप्रकारकत्वस्य विशेषणत्वं तादृश-प्रकारकत्वविशिष्टज्ञाने च घटविशेष्यकत्वस्य विशेषणादुद्देश्यतावच्छेदकविधेययोः परस्परा-वच्छेद्यावच्छेदकभावमहिम्ना तादृशविशेष्यकत्वप्रकारकत्वयोरवच्छेद्यावच्छेदकभावमप्यनुमितावगाहत इति घटविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वविशिष्टज्ञानजन्यत्वानुमानेन तादृश-प्रामाण्यस्यापि सिद्धेः।

घटत्वेन पटावगाहिज्ञानजन्यायां ज्ञाततायां घटविशेष्यकघटत्वप्रकारकज्ञानजन्यत्वरूप-साध्यविरहेण तत्र च घटत्वप्रकारकज्ञाततात्वसत्त्वाद्व्यभिचारवारणाय सामानाधिकरण्यान्तं ज्ञातताविशेषणम्। अत्र घटत्वादिसामानाधिकरण्यञ्च प्रकारतावच्छेदकसम्बन्धेन घटत्वादि-मत्समवेतत्वं तेन घटत्वेन पटावगाहिज्ञानजन्यज्ञाततायां कालिकादिसम्बन्धेन घटत्वसामाना-धिकरण्यसत्त्वेऽपि न क्षतिः। पटत्वेन घटावगाहिज्ञानजन्यज्ञाततायां व्यभिचारवारणाय घटत्वप्रकारकेति।

तादृशज्ञानजन्यत्वापेक्षया तादृशज्ञानविषयत्वस्य लघुत्वेन तादृशज्ञानविषयत्वसाध्यकं द्वितीयानुमानं दर्शयति "**घट**" इति। "**घटे घटत्वप्रकारकज्ञानविषय**" इति। घटविशेष्यकघटत्वप्रकारकज्ञानविषय इत्यर्थः। तथाच घटो घटविशेष्यकघटत्वप्रकारकज्ञानविषयः घटत्वसमानाधिकरणघटत्वप्रकारकज्ञाततावत्त्वादिति विषयपक्षकानुमानम्। अत्रापि घट-विशेष्यकघटत्वप्रकारकज्ञानविषयत्वसिद्धौ साध्यघटकीभूतस्य घटविशेष्यकघटत्वप्रकारकत्वरूप-प्रामाण्यस्यापि सिद्धिरिति भावः।

अयं घट इत्यादिज्ञानानन्तरं घटविशेष्यकघटत्वप्रकारकज्ञानवानहमित्याद्यनुभवः सर्वजन-सिद्धस्तदुपपादनाय आत्मपक्षकानुमानं दर्शयितु विषयनिष्ठज्ञाततया हेतोरात्मरूपपक्षे विरहेण स्वरूपासिद्धिशङ्कां निरसितुं ज्ञाततया आत्मवृत्तित्वं साधयति "**स्वजनके**"ति। स्वं ज्ञातता तज्जनकं यज्ज्ञानं तद्वत्त्वमित्यर्थः। तथाच तादृशसम्बन्धेन ज्ञाततया आत्मनि

**घटत्वप्रकारकज्ञानवान् घटत्वसमानाधिकरणघटत्वप्रकारकज्ञाततावत्त्वा"दित्ये- तादृशात्मपक्षकानुमानेन वा प्रामाण्यविशिष्टज्ञानानुमानमिति ॥१४०॥**

**अथ प्रामाण्यस्य ज्ञानस्य चातीन्द्रियतया साध्यतावच्छेदकविशिष्टसाध्य- प्रसिद्धिविरहेण कथमनुमानावतारः। अनुमानान्तरात्तत्प्रसिद्धिस्वीकारे तत्रापि तत्प्रसिद्धेरपेक्षिततया अनवस्थितिप्रसङ्गेन फलानिष्पत्तिरिति चेत्, मैवम्। प्रागभवीयसंस्कारमूलकप्रामाण्यविशिष्टज्ञानस्मरणाधीनव्याप्त्यादिग्रहात् प्राथमिकघटादिज्ञानानन्तरं प्रामाण्यविशिष्टतदनुमितिः। तज्जन्यसंस्कारा-**

---

सत्त्वेन न स्वरूपासिद्धिरिति भावः। "**प्रामाण्यविशिष्टज्ञानानुमानमि**"ति। तथाच प्रामाण्यस्य स्वाश्रयज्ञानग्राहकोक्तानुमानग्राह्यत्वात् स्वतस्त्वमिति भावः ॥१४०॥

भट्टमतोपरि शङ्कते अथेति। "**कथमनुमानावतार**" इति। व्याप्तिग्रहासम्भवादि- त्यादिः। ननु धूमाभावस्य साध्यत्वे वह्न्यभावस्य च हेतुत्वे धूमाभावाभावत्वेन साध्याभावस्य धूमाभावाभावस्य व्यापकत्वावगाहिनः धूमाभावाभावव्यापकीभूताऽभावप्रतियोगिवह्न्यभाववान् ह्रद इत्याकारकव्यतिरेकपरामर्शाद् यथा ह्रदे धूमाभावानुमितिस्तथा धूमत्वेन साध्याभावस्य धूमाभावाभावस्य धूमरूपस्य व्यापकत्वावगाहिनो धूमव्यापकीभूताभावप्रतियोगिवह्न्यभाववान् ह्रद इत्याकारकपरामर्शादपि ह्रदे धूमाभावानुमितिर्भवेत्। अयमेवाप्रसिद्धसाध्यकपरामर्श उच्यते, अत्र च परामर्शे व्याप्त्यंशे साध्यतावच्छेदकरूपेण धूमाभावस्याप्रवेशात्। तथाचा- प्रसिद्धसाध्यकपरामर्शजन्यानुमितौ साध्यज्ञानस्यानपेक्षिततया प्रामाण्यस्याप्यप्रसिद्धसाध्यक- परामर्शादनुमितिः स्यादिति चेन्न। भावसाध्यकस्थले व्यतिरेकव्याप्तेरपि साध्यघटिततया भावसाध्यकानुमितेरप्रसिद्धसाध्यकत्वविरहात्। भट्टमते व्यतिरेकव्याप्तिज्ञानस्यानुमितिजन- कत्वाभावादप्रसिद्धसाध्यकानुमित्यसम्भवाच्च। "**अनुमानान्तरादि**"ति। तादृशज्ञातता- हेतुकप्रामाण्यविशिष्टज्ञानानुमानान्तरादित्यर्थः। "**अनवस्थितिप्रसङ्गेने**"ति। तादृश- रीत्यानवस्थाभयेन व्याप्तिग्रहासम्भवादित्यर्थः। "**फलानिष्पत्तेरि**"ति। व्याप्तिज्ञानविरहेण तादृशानुमित्यनुत्पत्तेरित्यर्थः।

समाधत्ते "**मैवमि**"ति। "**प्रागभवीये**"ति। पूर्वजन्मोत्पन्नेत्यर्थः। "**प्रामाण्य- विशिष्टज्ञाने**"ति। साध्यतावच्छेदकविशिष्टसाध्येत्यर्थः। "**स्मरणाधीने**"ति। तथाच व्याप्त्यंशे विशेषणीभूतस्य साध्यस्य ज्ञानात्तादृशव्याप्तिज्ञानं नासम्भवीति भावः। द्वितीयादि- घटज्ञानानन्तरं प्रामाण्यविशिष्टज्ञानानुमितौ न पूर्वजन्मोत्पन्नसंस्कारजन्यसाध्यतावच्छेदक- विशिष्टसाध्यज्ञानापेक्षा प्राथमिकप्रामाण्यविशिष्टज्ञानानुमितिरूपसाध्यग्रहमूलकाद्व्याप्तिज्ञानादेव

**धीनस्मरणमूलकव्याप्तिग्रहाद्यधीना चोत्तरोत्तरघटादिज्ञानानुमितिपरम्परेति नानुपपत्तिः ॥**

**प्राग्भवीयप्राथमिकज्ञानानुमितावपि जन्मान्तरीयज्ञानाधीनस्मरणमेव मूलम् । जन्मप्रवाहस्य चानादित्वान्नेयमनवस्था कार्योत्पत्तिविरोधिनी वीजाङ्कुरादिस्थलीयानवस्थावदिति भट्टमतनिगर्वः ॥१४१॥**

**अत्र नैयायिका ज्ञातो घट इत्यादिप्रत्ययो यदि ज्ञानविषयत्वं नावलम्बते अपि त्वतिरिक्तां ज्ञाततां तदातीतघटादिविषयकज्ञानाद्यनन्तरं तथाविधप्रत्ययानुपपत्तिः । तत्र विषयरूपसमवायिकारणस्यातीतत्वाज् ज्ञाततानुत्पत्तेः ॥१४२॥**

---

तत्र तादृशानुमितिसम्भवादित्याह "**प्राथमिके**"ति। "**तदनुमितिरि**"ति। प्रामाण्यविशिष्टज्ञानानुमितिरित्यर्थः। "**तज्जन्ये**"ति। प्रामाण्यविशिष्टज्ञानानुमितिजन्येत्यर्थः। "**अनुमितिपरम्परे**'ति। तथाच द्वितीयादिज्ञानानन्तरं प्रामाण्यविशिष्टज्ञानानुमितौ न जन्मान्तरीयसंस्कारजनितस्मरणकल्पनापेक्षेति भावः।

नन्वेवमपि कथं पूर्वजन्मनि प्राथमिकज्ञानानुमितिस्तत्रापि साध्यप्रसिद्धेरपेक्षितत्वात्, तदभावेन च जन्मान्तरीणसंस्कारस्यैवासिद्धत्वादित्यत आह "**प्राग्भवीये**"ति। "**स्मरणमेवे**"ति। तत्पूर्वजन्मजज्ञानाधीनस्मरणमित्यर्थः। "**मूलं**" व्याप्तिग्रहे कारणम्।

ननु तत्रापि तत्पूर्वजन्मजसंस्काराधीनस्मरणमेवं तत्रापि तत् पूर्वमित्यादिरीत्या पुनरनवस्थेत्यत आह "**जन्मप्रवाहस्ये**"ति। "**कार्योत्पत्तिविरोधिनी**"ति। तत्रैवानवस्था कार्योत्पत्तिविरोधिनी स्याद् यत्र कार्यकारणप्रवाहस्य सादित्वम्, प्रथमस्य कारणं कल्पयितुमशक्यत्वात्। यत्र तु कार्यकारणप्रवाहोऽनादिस्तत्र कार्यकारणकल्पनाया अनादित्वेन कल्पनाया अविश्रामात् सा न कार्योत्पत्तिविरोधिनीति भावः ॥१४१॥

भट्टमतं निरसितुमाह "**अत्र नैयायिका**"इति। "**अत्र**" प्रामाण्यस्य ज्ञाततालिङ्गकानुमानग्राह्यत्वरूपस्वतस्त्वे। वदन्तीति पूरणीयम्। भट्टोक्तानुमानहेतुज्ञाततां निरसति "**ज्ञातो घट**" इत्यादिना। "**ज्ञाततानुत्पत्तेरि**"ति। विषयतारूपत्वे तु विषयतां प्रति विषयस्य कारणताविरहेण नानुपपत्तिः। नच ज्ञानसमानकालीना विषयनिष्ठा विषयता, तथाचातीतघटादिविषयकज्ञानविषयतैवासिद्धा आश्रयविरहादिति वाच्यम्। केन चिज्ज्ञानेन कस्य चिद्विषयस्य सम्बन्धो वाच्यः, अन्यथा ज्ञानविशेषेण विषयविशेषप्रकाशनियमो न स्यात्, स च सम्बन्धः विषयता। एवञ्च येन ज्ञानेन यस्य विषयस्य प्रकाशो भवेत् तेन ज्ञानेन तस्य

अथ तत्र ज्ञानविषयत्वमेव तादृशप्रत्ययोऽवलम्बत इत्युपेयते? तर्हि विद्यमानविषयकज्ञानानन्तरोत्पन्नतथाविधप्रत्यक्षस्यापि ज्ञानविषयतालम्बनत्वमेवोपेयतां किमतिरिक्तज्ञाततया ॥१४३॥

यत्तु ज्ञातताऽनुपगमे विषयस्य ज्ञानकर्मत्वानुपपत्त्या ज्ञानार्थकधातोः सकर्मकत्वानुपपत्तिः। तथाहि क्रियाजन्यफलशालित्वमेव कर्मत्वं, ज्ञातताऽनुपगन्तॄणां मते च ज्ञानरूपा क्रिया न विषये किमपि फलमादधातीति विषयस्य तत्कर्मता न निर्वहति। तदुपगमे च ज्ञानजन्यतादृशफलवत्तयैव विषयस्य कर्मतोपपद्यत इति ज्ञाततायाः आवश्यकत्वमिति।

तदप्यसत्, यथेच्छार्थकधातूनां विषयतात्वेन विषयतारूपविभक्त्यर्थान्वयिस्वार्थबोधकत्वं सकर्मकत्वं तथा ज्ञानार्थकधातूनामपीति ज्ञातताऽस्वीकारवैयर्थ्यात्। तथाच ज्ञाततायाः शशविषाणायमानतया तल्लिङ्गकानुमितिरपि तादृश्येवेति गतं तथाविधानुमितिग्राह्यत्वरूपस्वतस्त्वेनापि ॥१४४॥

---

विषयस्य विषयताख्यः सम्बन्धः स्वीकार्य्यः। तथाच मृतपित्रादिविषयकज्ञानेन मृतपित्रादीनामपि सम्बन्धोऽङ्गीकार्य्यः अन्यथा तेन ज्ञानेन पित्रादीनां प्रकाश एव न स्यादित्यकामेनाप्यतीतविषयानां ज्ञानेन सह विषयताख्यसम्बन्धाभ्युपग आवश्यक इति हृदयम् ॥१४२॥

भाट्टाः शङ्कन्त "**अथे**"ति। "**तत्रे**"ति। अतीतघटादौ। "**तादृशप्रत्यय**" इति। अतीतघटादिविषयकज्ञानानन्तरोत्पन्नो "ज्ञातोघट"इत्यादिप्रत्यय इत्यर्थः।

समाधत्ते "**तर्हि**"त्यादि। "**किमतिरिक्तज्ञाततये**"ति। अतीतविषयकस्थले अवश्यकल्प्यविषयतयैव विद्यमानविषयकस्थलेऽपि निर्वाहादतिरिक्तज्ञातताङ्गीकारे गौरवमिति भावः ॥१४३॥

क्रियाजन्यफलबोधकत्वं सकर्मकत्वमित्यभिमानेन शङ्कते "**यत्त्वि**"ति। सकर्मकत्वानुपपत्तिं दर्शयति "**तथाही**"ति। ज्ञातताभ्युपगमे ज्ञानार्थकधातोः सकर्मकत्वमुपपादयति "**तदुपगमे चे**"ति। "**आवश्यकत्वमि**"ति। तथाच ज्ञाधातोः ज्ञातताऽनुकूलज्ञानबोधकत्वेन धात्वर्थतावच्छेदकीभूतं धात्वर्थज्ञानजन्यं यत् फलं ज्ञातता, तद्बोधकतया सकर्मकत्वमिति भावः ॥

द्वितीयार्थान्वितस्वार्थबोधकत्वं सकर्मकत्वमित्यभ्युपगम्य समाधत्ते "**तदप्यसदि**"ति। ज्ञातता निरासेन प्रामाण्यस्यापि स्वतस्त्वं निरस्तमिति प्रतिपादयति "**तथाचे**"ति। ज्ञातताऽनभ्युपगमे चेत्यर्थः ॥१४४॥

**एवं ज्ञानस्यातीन्द्रियत्वमप्यनुपपन्नमिच्छासुखादिप्रत्यक्षानुरोधेनात्मसमवेतप्रत्यक्षं प्रति क्लृप्तकारणभावस्य मनःसंयुक्तसमवायस्य ज्ञानेऽपि सत्त्वेन तत्प्रत्यक्षे बाधकाभावात्। संस्कारादृष्टादेरिव ज्ञानस्यापि प्रत्यक्षं प्रति प्रतिबन्धकत्वकल्पने गौरवात्॥१४५॥**

**अथ भवन्मते निर्विकल्पकस्य प्रत्यक्षवारणाय प्रत्यक्षं प्रति तस्य प्रतिबन्धकत्वमावश्यकं तत्र च निर्विकल्पकत्वापेक्षया लघोर्ज्ञानत्वस्यैव प्रतिबन्धकतावच्छेदकत्वमुचितम्। न च ज्ञानभाने विषयभासकसामग्र्याः सहकारितया निर्विकल्पकस्य च विषयानुपनायकतया उपनायकीभूतसप्रकारकज्ञानघटित-**

---

भट्टसम्मतां ज्ञाततां निरस्य तन्मतसिद्धं ज्ञानस्यातीन्द्रियत्वं निरसति "**एवमि**"ति। "**तत्प्रत्यक्ष**"इति। ज्ञानप्रत्यक्ष इत्यर्थः। "**बाधकाभावादि**"ति। आत्मसमवेतप्रत्यक्षत्वावच्छिन्नं प्रति मनःसंयुक्तसमवायत्वेन कारणत्वाज् ज्ञानेऽपि मनःसंयुक्तसमवायसत्त्वाज् ज्ञानप्रत्यक्षे बाधकाभावादित्यर्थः। ननु तादृशकार्यकारणभावकल्पने आत्मसमवेतसंस्कारादृष्टादावपि मनःसंयुक्तसमवायसत्त्वात् संस्कारादीनां प्रत्यक्षापत्तिरतस्तद्वारणाय विषयतासम्बन्धेन प्रत्यक्षत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन संस्कारत्वेन प्रतिबन्धकत्वं वाच्यम्, एवमेव ज्ञानस्यापि प्रत्यक्षत्ववारणाय ज्ञानत्वेनापि प्रतिबन्धकत्वं कल्पनीयम्; तथाच ज्ञानस्य न प्रत्यक्षमित्यत आह "**संस्कारादृष्टादेरि**"ति। "**गौरवादि**"ति। तथाच संस्कारस्याप्रत्यक्षत्वं सर्वमतसिद्धमिति संस्कारत्वेन प्रतिबन्धकत्वमवश्यमभ्युपगन्तव्यं ज्ञानस्य तु प्रत्यक्षत्वे विवाद इति ज्ञानत्वेन प्रतिबन्धकत्वकल्पनं भट्टमते गौरवग्रस्तमिति भावः॥१४५॥

ननु न्यायमते निर्विकल्पकस्य प्रत्यक्षानुदयात् प्रत्यक्षं प्रति निर्विकल्पकस्य प्रतिबन्धकत्वमावश्यकम्, तत्र निर्विकल्पकत्वेन प्रतिबन्धकत्वापेक्षया लाघवेन ज्ञानत्वेनैव प्रतिबन्धकत्वं कल्पनीयमिति कथं ज्ञानस्य प्रत्यक्षत्वमित्याशङ्कते "**अथे**"ति। "**भवन्मते**" न्यायमते। "**तस्य**" निर्विकल्पकस्य। "**लघोर्ज्ञानत्वस्यैवे**"ति। निर्विकल्पकत्वं निष्प्रकारकज्ञानत्वं तदपेक्षया ज्ञानत्वमात्रस्य लघुत्वादिति भावः। "**उचितमि**"ति। तथाच प्रतिबन्धकसत्त्वाज् ज्ञानस्य न प्रत्यक्षमिति भावः।

"**सहकारितये**"ति। ज्ञानप्रत्यक्षात् पूर्वं विषयभासकसामग्र्या नियमतोऽपेक्षणीयत्वेन तद्विषयकज्ञानप्रत्यक्षं प्रति तद्विषयभासकसामग्रीत्वेन हेतुतयेत्यर्थः। "**विषयानुपनायकतये**"ति। ज्ञानस्य प्रत्यक्षं मानसमेव भवेद् वहिर्विषये मनसः स्वातन्त्र्याभावाज्ज्ञानलक्षणारूपोपनायकवशादेव मानसप्रत्यक्षे वहिर्विषयो भासते। एवञ्च ज्ञानप्रत्यक्षे ज्ञानांशे विषयस्योपनीत-

**विषयभासकसामग्रीविरहादेव निर्विकल्पकप्रत्यक्षापत्तिवारणसम्भवान् निर्विकल्पकस्य प्रतिबन्धकत्वमसिद्धमिति वाच्यम् ॥१४६॥**

**विषयभासकसामग्रीं विनापि मनःसंयुक्तसमवायेन सुखाद्यात्मसमवेतमानसत्वरूपस्वीयकार्यतावच्छेदकावच्छिन्नजननेन तदवच्छिन्नोत्पत्तौ विषयभासकसामग्रीविरहस्याकिञ्चित्करतया निर्विकल्पकस्य प्रतिबन्धकताया आवश्यकत्वात्, तस्मात् तत्र लाघवेन ज्ञानत्वेन प्रतिबन्धकताकल्पनाज् ज्ञानस्यातीन्द्रियत्वं निराबाधमिति चेत् ॥१४७॥**

---

भानमेव भवेत्। तच्च निर्विकल्पकज्ञानांशे न सम्भवति। तथाहि जात्यखण्डधर्मातिरिक्तस्य स्वरूपतोभानासम्भवाज् ज्ञानांशे घटादेः स्वरूपतो भानायोगाद्घटत्वादिकिञ्चिद्धर्मोपरागेणैव तद्भानमावश्यकम्। तन्न सम्भवति, उपनीतभाने येन रूपेण पदार्थो भासते तेन रूपेण तस्य ज्ञानमुपनायकम्। तथाच निर्विकल्पकस्थले घटत्वादिकिञ्चिद्धर्मोपरागेण घटाद्युपनायकाभावाद् घटत्वादिना घटादिविषयभासकसामग्रीविरहेण न निर्विकल्पकस्य प्रत्यक्षम्। न च निर्विकल्पकस्य घटत्वादिरूपेण घटाद्युपनायकत्वाभावेऽपि घटत्वस्य जातिरूपतया निर्विकल्पकोपस्थितस्य तस्य ज्ञानांशे स्वरूपतो भानसम्भवेन निर्विकल्पकस्य प्रत्यक्षापत्तिर्दुर्वारेति वाच्यम्। समवायान्यसम्बन्धेन जातेः स्वरूपतोभानाभावाज्ज्ञानांशे घटत्वं विषयितासम्बन्धेनैव भासेतेति तत्र स्वरूपतो घटत्वस्य भानासम्भवात्। घटत्वत्वेन घटत्वादे र्ज्ञानाभावेन च घटत्वत्वेन घटत्वभासकसामग्र्यभावाद् घटत्वत्वेन घटत्वादीनां निर्विकल्पकज्ञानांशे भानं न सम्भवतीति न निर्विकल्पकस्य प्रत्यक्षम्। "**प्रतिबन्धकत्वमसिद्धमि**"ति। तथाच प्रत्यक्षं प्रति ज्ञानत्वेन प्रतिबन्धकत्वं न कल्प्यत इति भावः ॥१४६॥

ननु ज्ञानमानसत्वावच्छिन्नं प्रति विषयभासकसामग्रीत्वेन हेतुत्वान्निर्विकल्पकानन्तरं ज्ञानमानसत्वावच्छिन्नोत्पत्तिवारणेऽपि आत्मसमवेतसुखादिप्रत्यक्षस्य केवलान्मनःसंयुक्तसमवायरूपसन्निकर्षादेवोत्पद्यत इति आत्मसमवेतमानसत्वावच्छिन्नं प्रति मनःसंयुक्तसमवायसन्निकर्षत्वेनैव हेतुता तत्र विषयभासकसामग्र्यनपेक्षणात्। एवञ्च निर्विकल्पकेऽपि मनःसंयुक्तसमवायसन्निकर्षसत्त्वेन तत्रात्मसमवेतमानसत्वरूपकार्यतावच्छेदकावच्छिन्नस्यापत्तिसम्भवेन तद्वारणाय निर्विकल्पकस्य प्रतिबन्धकत्वं वाच्यम्, तत्र लाघवेन ज्ञानत्वेनैव प्रतिबन्धकत्वं युक्तमित्याशयेन अभ्युपगतं पूर्वपक्षं समर्थयते "**विषयभासके**"त्यादिना। "**स्वीयकार्यतावच्छेदकावच्छिन्ने**"ति। स्वं मनःसंयुक्तसमवायः तस्य यत्कार्यतावच्छेदकम् आत्मसमवेतमानसत्वं

**मैवं ज्ञानस्यातीन्द्रियत्वमते यत्र घटज्ञानवानहमित्याकारकशाब्दबोधस्य तथाविधानुमितेश्च सामग्र्यौ तत्रानुमितिवारणाय तादृशशाब्दसामग्र्यास्तथाविधसमानविषयकानुमितिं प्रति प्रतिबन्धकता कल्पनीया ॥१४८॥**

**मन्मते च तत्र ज्ञानादेः सत्त्वेन घटज्ञानवानहमित्याकारकप्रत्यक्षसामग्र्या आवश्यकत्वात्, तत्प्रतिबन्धकतयैवोपपत्तेः। तथाविधशाब्दसामग्र्याः प्रतिबन्धकत्वं न कल्प्यत इति लाघवम् ॥१४९॥**

---

तदवच्छिन्नेनेत्यर्थः। "**तदवच्छिन्नोत्पत्तावि**"ति। आत्मसमवेतज्ञानत्वावच्छिन्नोत्पत्तावित्यर्थः। "**अकिञ्चित्करतये**"ति। सुखादिप्रत्यक्षे व्यभिचारादित्यर्थः ॥१४७॥

अथेत्याद्युक्तापत्तिं समाधत्ते "**मैवमि**"त्यादिना। "**अनुमितिवारणाये**"ति। समानविषयकशाब्दसामग्र्या बलवत्त्वात् तत्र शाब्दबोध एवोत्पद्यते नत्वनुमितिरिति तत्रानुमितिवारणायेत्यर्थः। "**तादृशशाब्दसामग्र्या**"इति। समानविषयकशाब्दसामग्र्या इत्यर्थः।

ननु घटज्ञानवानहमित्याकारकानुमितिं प्रति घटज्ञानवानहमित्यादिशब्दघटितसामग्र्या घटं जानामीत्यादिशब्दघटितसामग्र्याश्च प्रतिबन्धकत्वमनुभवसिद्धम्। समानविषयकशाब्दसामग्रीत्वेन प्रतिबन्धकत्वे तन्न निर्वहति। तथाहि घटज्ञानवानहमित्याकारकानुमितौ पक्षे आत्मनि समवायेन घटज्ञानं प्रकारीभूय भासते, घटज्ञानवानहमित्याकारकशाब्दबोधे च आत्मनि घटज्ञानवतस्तादात्म्येनैव प्रकारत्वमित्युक्तानुमितिशाब्दबोधयोः कथं समानविषयकत्वम्। नच समवायसम्बन्धावच्छिन्नघटज्ञानत्वावच्छिन्नप्रकारतानिरूपितात्मत्वावच्छिन्नविशेष्यताशाल्यनुमितिं प्रति समवायसम्बन्धावच्छिन्नघटज्ञानत्वावच्छिन्नावच्छेदकतानिरूपिततादात्म्यसम्बन्धावच्छिन्नप्रकारतानिरूपितात्मत्वावच्छिन्नविशेष्यताशालिशाब्दसामग्रीत्वेन प्रतिबन्धकत्वान्नानुपपत्तिरितिवाच्यम्। घटं जानाम्यहमित्याकारकशाब्दसामग्र्याः प्रतिबन्धकत्वासम्भवात्। तत्रात्मनि तादात्म्येन घटज्ञानवदप्रकारकत्वादिति चेन्न। तादृशानुमितिं प्रति तादात्म्येन घटज्ञानवत्प्रकारकात्मविशेष्यकशाब्दसामग्रीत्वेन घटज्ञानवानहमित्याकारकशाब्दसामग्र्या घटज्ञानाश्रयत्वप्रकारकात्मविशेष्यकशाब्दसामग्रीत्वेन घटमहं जानामीत्याकारकशाब्दसामग्र्याश्च प्रतिबन्धकत्वकल्पनात्। तादृशद्विविधशाब्दसामग्र्योः प्रतिबन्धकत्वसम्भवात् ॥१४८॥

न्यायमते तादृशशाब्दसामग्र्याः प्रतिबन्धकत्वाकल्पनेन लाघवमित्याह "**मन्मत**"इति। "**मम**" नैयायिकस्य मत इत्यर्थः। "**तत्रे**"ति। तादृशानुमितिशाब्दसामग्रीकाल इत्यर्थः। "**ज्ञानादेः सत्त्वेने**"ति। अनुमितिसामग्रीकाले साध्यघटितव्याप्तिज्ञानसत्त्वात् तादृशघटज्ञानस्यावश्यकत्वात् शाब्दसामग्रीकाले च अवान्तरवाक्यार्थज्ञानस्य महावाक्यार्थबोधहेतुत्वेन घटज्ञानवानहमित्याकारकशाब्दबोधं प्रति घटज्ञानमित्याकारकावान्तरवाक्यार्थज्ञानस्यावश्यकत्वा-

**ताद्दशशाब्दसामग्रीस्थानीयभट्टमतासिद्धताद्दशप्रत्यक्षसामग्रीप्रतिबन्धकताकल्पनान्न लाघवावकाश इति तु न शङ्कनीयम् ।**

**यत आकाङ्क्षायोग्यतासत्तिज्ञानप्रभृतिबहुतरकारणघटितशाब्दसामग्र्यपेक्षया विषयीभूतघटज्ञानाद्यात्मकप्रत्यक्षसामग्री अतीव लघीयसीति प्रतिबन्धकतासाम्येऽप्यवच्छेदकलाघवादिति संक्षेपः ॥१५०॥**

**इति महामहोपाध्यायहरिरामतर्कवागीशकृतप्रामाण्यवादः समाप्तः ।**

---

दित्युभयत्र घटज्ञानसत्त्वम् । "**घटज्ञानवानहमित्याकारकप्रत्यक्षसामग्र्या आवश्यकत्वादि**"ति । ताद्दशशाब्दसामग्रीकाले अनुमितिसामग्रीकाले च घटज्ञानसत्त्वात् तत्र च मनःसंयुक्तसमवायरूपसन्निकर्षसत्त्वेन ताद्दशप्रत्यक्षसामग्र्या आवश्यकत्वादिति भावः । "**तत्प्रतिबन्धकतयैवे**"ति । प्रत्यक्षसामग्र्याः प्रतिबन्धकतयैवेत्यर्थः । सामानविषयकस्थले प्रत्यक्षसामग्र्या बलवत्त्वात् प्रत्यक्षसामग्र्याः प्रतिबन्धकतेति भावः । "**उपपत्तेरि**"ति । ताद्दशप्रतिबन्धकत्वेनैव तत्रानुमितिवारणसम्भवादित्यर्थः । ननु ताद्दशशाब्दसामग्रीकाले अनुमितिसामग्रीकाले च ताद्दशप्रत्यक्षसामग्र्या नियमेन सत्त्वात् ताद्दशसामग्र्याश्च प्रतिबन्धकत्वात् ताद्दशानुमितिशाब्दबोधयोरपलापापत्तिरिति चेन्न । इच्छाघटितताद्दशसामग्र्या अनुमित्याद्युत्पत्तिसम्भवात् ॥१४६॥

ननु भट्टमते ज्ञानस्यातीन्द्रियतया तत्र शाब्दसामग्रीमात्रस्यैव प्रतिबन्धकत्वमिति भट्टमतेऽपि प्रतिबन्धकत्वाधिक्याभावान्न गौरवमित्याशङ्कते "**ताद्दशशाब्दसामग्रीस्थानीये**"ति । "**भट्टमतासिद्धे**"ति । भट्टमते ज्ञानस्यातीन्द्रियतया ताद्दशज्ञानप्रत्यक्षसामग्रेवासिद्धेति ताद्दशप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वं नास्ति । न्यायमते तु ताद्दशप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वकल्पनात् भट्टमतीयशाब्दसामग्र्याः प्रतिबन्धकत्वस्थलीयमेव ताद्दशप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वमिति कथं लाघवमिति शङ्कार्थः ।

भट्टमते प्रतिबन्धकत्वाधिक्याभावेऽपि प्रतिबन्धकतावच्छेदकगौरवमित्यभिप्रायेण समाधत्ते "**यत**"इति । शाब्दसामग्र्याः प्रतिबन्धकतावच्छेदकगौरवं दर्शयति "**आकाङ्क्षायोग्यते**"त्यादि । प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वे लाघवं दर्शयति "**विषयीभूते**"त्यादि । "**लाघवादि**"ति । तथाच ज्ञानस्य नातीन्द्रियत्वं नानाविधगौरवादिति भावः ॥१५०॥

श्रीविश्वबन्धुभट्टाचार्येण विरचिता हरिरामतर्कवागीशकृतप्रामाण्यवादस्य प्रभाख्या टीका समाप्ता ।

# CALCUTTA SANSKRIT COLLEGE RESEARCH SERIES, TEXTS AND STUDIES ALREADY PUBLISHED

| Texts :— | Rs. |
|---|---|
| 1. Chandogya Brahmana | 15 00 |
| 2. Ravanavaha | 40'00 |
| 3. Kavyaprakasa (Part-I, Ullasas I-IV.) | 12'00 |
| 4. Jnanalaksanavicara-rahasyam | 9'00 |
| 5. Muktivadavicara | 10'00 |
| 6. Savasutakasaucaprakarana | 5'00 |
| 7. Anumitermanasatvavicara | 8'00 |
| 8. Sangita-Damodara | 15 00 |
| 9. Dhvamsa-Janyabhavayoh karya-karanabhava-rahasyam | 5'00 |
| 10. Kavyaprakasa (Part-II, Ullasas V—X.) | 20 00 |
| 11. Atmabodhaprakarana | 5'00 |
| 12. Mahavastu Avadana, (Vol I) | 25'00 |
| 13. Narada Smriti | 3'50 |
| 14. Udvahatattva | 5'00 |
| 15. Kundamala | 22'50 |
| 16. Paippalada Samhita (Book I) | 10'00 |
| 17. Mahavastu Avadana (Vol. II) | 40'00 |

| Studies :— | Rs |
|---|---|
| 1. Studies in the Upapuranas (Vol. I.) | 25'00 |
| 2. Philosophy of Word and Meaning | 20'00 |
| 3. Studies in the Upanisads | 15 00 |
| 4. Studies in Nyaya-Vaisesika Theism | 15'00 |
| 5. Veda Mimamsa (Vol. I) | 10'00 |
| 6. Harappa Culture and the West | 7'00 |
| 7. Sanskrita Colleger Itihas (Part-II.) | 2'00 |
| 8. Vedartha-Vicara | 15'00 |
| 9. Studies in the Upapuranas (Vol-II.) | 30 00 |
| 10. Descriptive Catalogue of Manuscripts of Sanskrit College Library | 7'50 |
| 11. Epic Sources of Sanskrit Literature | 15'00 |
| 12. Medhatithi Bhasya (in four volumes) | 21'75 |
| 13. Sanskrita Colleger Itihas (Part-I.) | 2'00 |
| 14. Tantra o Agamasastrer Digdarsan | 5'00 |
| 15. Samskrita Sahitye Hasyarasa | 15'00 |
| 16. Jottings on Sanskrit Metrics | 5'00 |

## SHORTLY TO BE PUBLISHED

1. **Studies in Kusana Genealogy and Chronology** by *Dr. Bratindranath Mukherjee*, M.A., Ph.D., F.S.A.
2. **Veda-Mimamsa** ( Vol-III) (in Bengali) by *Shri Anirvan.*
3. **Economics in Kautilya** by *Dr. B. C. Sen*, M. A., LL.B., Ph. D. (London), P.R.S., F.A.S.
4. **Paippalada Samhita,** (Book II) by *Professor Durgamohan Bhattacharya.*
5. **Kautilya Studies** by *Dr. R.C.Hazra*, M.A., Ph.D., D.Litt.
6. **Padacandrika** (a commentary on the Amarakoṣa) of Rāyamukuṭa —edited by *Dr. Kali Kumar Dutta Sastri.*
7. **Pratyaksalokarahasya** edited by *Dr. Gaurinath Sastri*, M.A., P R.S., D. Litt.
8. **Mahavastu Avadana** ( Vol. III ) edited by *Dr. R. G. Basak*, M.A., Ph.D.
9. **Magadhi and its Formation** by *Dr. Muniswar Jha*
10. **Padma-Purana** (a critical study) by *Dr. Asoke Chatterjee, M.A.*, Panchatirtha.
11. **A Tri-lingual Dictionary** ( Sanskrit-Bengali-English) edited by *Dr. Govinda Gopal Mukhopadhyaya* and *Dr. Gopikamohan Bhattacharyya.*